The membership of the society is open both to the weavers and non-weavers of the village. This provision restricts those weavers in the neighbouring villages within a radius of five miles from joining the society. The weavers in the hamlets around Sulurpeta suffer from the lack of any organization. If the membership of the society at Sulurpeta is extended to them, not only will the society be strengthened but those weavers also will benefit.

At present the membership comprises of more non-weavers than weavers. Out of a total of 102 members, only 43 are weavers. Placed as it is the society cannot expect to achieve any progress in the way of the improvement of handloom industry and of the economic condition of the weavers. Only a few weavers at Sulurpeta have joined the society with the main object of obtaining loans. If the weavers join the society only to borrow, their indebtedness will be increased and their progress will be impeded. The society should be only for the welfare of the weavers and membership should be exclusively for the weavers. In Sulurpeta there is another cooperative union for persons other than the weavers and it is surprising that the weavers' society should have a provision in the byelaws for including non-weavers also. Though the byelaw lays down that the non-weavers should not exceed weaver members, in actual practice this rule is not observed. If lack of strength of weaver members and a consequent dissolution of the society is feared, the jurisdiction of the society can be extended to other neighbouring villages also. In any case it is better to restrict membership only to weavers. To attract weaver members several facilities may be offered. For example, the share amount may be lowered; the activities of the society may be multiplied. A reorientation of the activities of the society can be brought about by separating different kinds of work of the society. The issue of loans may be in the charge of the credit department of the society.

Another aspect of work of the society is the securing of wholesale orders from the agency companies and buying yarn for distribution among weavers. The profits which go into the pockets of the middlemen may either go to the weavers or may be pooled in a common fund to be made available for their common good. Looms may be bought at cheap rates and stocked by the society. Where weavers want to instal more looms to produce more cloth and consequently augment their income, the society can sell them looms at cheap rates on instalment basis or on hire purchase system. If owners of looms are not weavers, looms can be hired. In that case more labourers also will be employed.

The society can buy the finished products from the members and market them jointly for a higher price. The profits that will go to the middlemen will filter down to the members and will increase their income and raise their standard of living. The marketing of produce can be conducted by a sale department of the society.

A cooperative provisions store can be opened as a branch of the society for providing provisions cheaply. Articles of food, clothing and other necessities can be bought wholesale at Madras and stored by the society. These can be sold at credit to the weavers fixing the maximum limit of credit for each member to the number of shares he holds or limiting credit to the earnings of each weaver. This avoids extravagance and improvident borrowing while the necessities of life are provided at cheaper rates than in the local bazaars. Controlling and limiting credit ensures convenience both to the member and the society. This will go a long way in improving the degenerate position of the weavers.

The sources of finance to the society are the capital raised by shares, fixed deposits of sums of Rs. 5 and its multiples on which a stipulated interest is paid periodically and monthly recurring deposits of a rupee or a multiple of that for periods of 12, 24, 45, 84 and 132 months. At present the share capital of the society amounts to Rs. 2,300. Fixed deposits which have been received from one or two persons amount to Rs. 600. But as for recurring deposits no member has till now saved anything this way. The cause may be attributed to their ignorance and poverty. If the society is modelled on a multi-purpose basis, it will establish a connection with every weaver and this will induce the weavers to take part in every activity of the society. The byelaws provide for various kinds of loans—ready money loans on the pledge of future manufactured products, joint loans and joint purchase and sale of commodities for the aid of weavers. The Government must, in the first place, contribute a portion of the funds to the society. Gradually the weavers can supply some proportion of

the required capital by their small individual contributions, shares and deposits.

As the weavers are, at present, ignorant of the various provisions of the byelaws and the ways of working of such a scheme, details of the byelaws must be translated into vernacular and published. The benefits of the cooperative society must be explained to the weavers.

Much opposition to the proper working of the society will come from the middlemen of Sulurpeta who are holding the weavers with their firm grip. If the society succeeds in taking into its fold the purchase and sale of the products of the weavers, the middlemen will not only lose their trade but also their living. But as the middlemen are only a few persons they can be employed by the society as their agents in negotiating the purchase of yarn for the society and the sale of finished products. Not only will they have an occupation but they will be a good asset to the society. If it is not possible for the society to employ them the middlemen must engage themselves in some business.

The work of the society should not be left to the board of directors entirely. In the present directorate of the society four are non-weavers and one is a weaver. A middleman is the president. He has his personal business to take care of and conducts a good part of the trade in Madras handkerchiefs. He has advanced loans to many weavers and is very influential. This results in the influential few rich of the society capturing for themselves the whole business leaving little to help the weavers. So there must be strict official control and supervision in the initial stages. When the co-operative spirit develops the official hold may be relaxed.

So if the society develops various non-credit activities, if it does not confine itself to credit alone, the services of the middleman can be dispensed with. There will be an appreciable increase in the income of the weavers and controlled expenditure will result in the progress of their general economic condition. Cooperation is the only salvation of the weavers of Sulurpeta.

## APPENDIX I

Extract from the Table showing details of families examined, income and expenditure.

| | | |
|---|---|---|
| 1. | Number of hand looms | .. 90 |
| 2. | Workers | .. 74 |
| 3. | Non-workers | .. 176 |
| 4. | Total population | .. 250 |
| 5. | Hired workers | .. 18 |
| 6. | Weavers output for the year | .. 3,029 Jodis |
| 7. | Hired workers output for the year | .. 712 Jodis |

| | | Rs. | A. | P. |
|---|---|---|---|---|
| 8. | Income by weaving for the year .. | 9,647 | 0 | 0 |
| 9. | Income allowance from hired hand looms . | 417 | 0 | 0 |
| 10. | Other sources of income .. | 512 | 10 | 0 |
| 11. | Total annual income .. | 10,576 | 10 | 0 |
| 12. | Expenditure: | | | |

| | | Rs. | A. | P. |
|---|---|---|---|---|
| i. | Food and maintenance .. | 8,416 | 5 | 0 |
| ii. | Clothing for Men .. | 617 | 0 | 0 |
| iii. | Clothing for Women .. | 605 | 0 | 0 |
| iv. | Clothing for Children .. | 190 | 0 | 0 |
| v. | Total of ii to iv .. | 1,412 | 0 | 0 |
| vi. | Other items of expenditure .. | 3,161 | 12 | 0 |
| | Total Annual Expenditure .. | 12,990 | 1 | 0 |

## APPENDIX II

Extract from the Table showing indebtedness of the Weavers.

Number of families indebted .. 43

| | Rs. | A. | P. |
|---|---|---|---|
| Total amount of loans on mortgages .. | 4,070 | 0 | 0 |
| Interest on mortgage loans .. | 1,395 | 0 | 0 |
| Loans on pronotes .. | 2,655 | 0 | 0 |
| Interest on such loans .. | 935 | 0 | 0 |
| Hand loans .. | 2,335 | 0 | 0 |
| Total amount of indebtedness .. | 11,390 | 0 | 0 |

Usual rate of interest charged by the Cooperative Society 9%

Rate of interest charged by middlemen 12%

## APPENDIX III

Extracts from the by-laws of the Cooperative Society.

**Objects :**—The object of the Society is the improvement of the hand-loom industry and of the economic condition of the weavers residing in the area of operations so mentioned.

For the purpose of attaining this object the Society shall be competent:

(i) to raise the money required for the society from weavers and others by issue of shares and by borrowing by way of deposits or otherwise,

(ii) to purchase such raw materials and appliances as are required for the industry and retail the same either for cash or for credit to the weaver-members residing in those places,

(iii) to grant loans to the members,

(iv) to purchase and hold in common or let on hire improved appliances connected with the industry,

(v) to purchase or receive for sale the finished products of the members' looms and sell the same to the best advantage,

(vi) to act as the agent for the joint purchase of the domestic and other requirements of the members,

(vii) to do such other acts as may be conducive to the attainment of the general objects of the society.

**Membership.** It shall be competent to the Board of Directors to admit as members, persons other than weavers provided the majority of the members of the society are weavers.

**Deposits.** These can be received from members and non-members.

**Other Borrowings.** Board of Directors can borrow funds otherwise than by way of deposits, either from members or from persons other than members, or from any institution.

**Trade.** The Board of Directors shall arrange for the purchase for cash or on credit of raw materials and of necessary appliances for weaving and for sale to members for cash or on reasonable credit those materials.

They shall purchase from members the finished products and try to sell them to the best advantage.

**Ready Money Advances.** These can be given for weaving purposes. Rs. 5 per loom may be advanced and may be adjusted when the finished products are delivered by the member concerned to the society.

Purposes for which loans can be granted—

(i) For urgent necessities.
(ii) For cattle, fodder etc.
(iii) For purchase of carts.
(iv) Circar cist.
(v) For the purchase of the land.
(vi) Building, buying and repairing houses, cattle sheds etc.
(vii) Advances to artisans for implements etc.
(viii) To redeem prior debts.
(ix) For ceremonial expenses.
(x) For buying food grains and such other necessities of life.
•(xi) For educational purposes.

# NYAYAKULISA

Edited with Introduction and Notes

By

R. Ramanujachari

And

K. Srinivasachari

यादिसन्निकर्षे गन्धादौ; तथैव चाक्षुषज्ञानस्वभावादेव नियतविषयकत्वोपपत्तेस्तदर्थ-मर्थगततया ज्ञातताख्यधर्मकल्पने मानाभावः। अतो ज्ञातताया एवाप्रामाणिकत्वान्न ज्ञाततालिङ्गकानुमितिगम्यो व्यवसायः। न वा स्वयंप्रकाशः। ज्ञानस्य यस्मिन्नर्थे प्रत्यासत्तिरस्ति, तस्यैव खलु प्रकाशो भवितुमर्हति ज्ञानम्; यथा घटेन प्रत्यासन्नं घटज्ञान-मित्युच्यते। न हि स्वस्य स्वयमेव विषयः। तथा सति प्रत्यक्षे विषयस्य कारणतया स्वस्य स्वजन्यत्वापत्तिः। अतो घटमहं जानामीत्याद्यनुव्यवसायग्राह्य एवेति।

सिद्धान्तस्तु—ज्ञानं स्वयंप्रकाशमेव। यथा दीपस्यान्धकारनिरसनेन घटादीनां हानादिव्यवहारकारित्वेऽपि स्वस्य हानादिव्यवहारे न दीपान्तरापेक्षा, तद्वज्ज्ञानं घटादौ व्यवहारजनने येन रूपेणोपकरोति तथा स्वात्मनि व्यवहारजननेऽन्यं प्रकाशं नापेक्षत इति स्वयंप्रकाशमुच्यते। ज्ञानस्य हि घटादिषु वर्तमानेषु संयोगद्वारको योग्यतालक्षणः कार्यकल्प्यः; अवर्तमानेषु तेषु वर्तमानावस्थद्रव्यसंयोगद्वारको योग्यतालक्षण एव; तदाश्रि-तेषु संयोगाश्रितत्वं च संबन्धोऽङ्गीक्रियते। ज्ञानस्य प्रसरणविभुत्वादिप्रतिपादकशास्त्राद्द्रव्यत्वं संयोगश्चाभ्युपगम्यते। इत्थञ्च तादृशसंबन्धमन्तरेणैव स्वस्मिन् व्यवहारहेतुर्ज्ञानमिति स्वप्रकाशत्वमुपपद्यते। ज्ञानं अनन्याधीनप्रकाशम्, अर्थप्रकाशकत्वात्, दीपवत्, इत्य-नुमानेनापि स्वप्रकाशत्वसिद्धिरिति।

**इति स्वयंप्रकाशवादश्चतुर्थः॥**

---

अथ पञ्चमे ईश्वरानुमानभङ्गवादे नैयायिकाभिमतमीश्वरानुमानं व्युदस्यते। तन्नि-रासाभावे हि शास्त्रस्य प्रामाण्यं न प्रतितिष्ठति। तथाहि—ईश्वरस्वरूपस्यानुमानिकत्वे, न शास्त्रस्य तस्मिन्नंशे प्रामाण्यं सिद्ध्यति; 'अप्राप्ते शास्त्रमर्थवत्' इति न्यायात्। ईश्वरस्य परिजनस्थानादिकमनुमानाप्रतिपन्नमिति तदंशे शास्त्रस्य प्रामाण्यमित्यपि न वक्तुं शक्यम्। ईश्वरस्यातिशयाधानार्थं हि परिजनादिकम्। तस्य परिजनादिभिराधेयातिशयत्वे ईश्वरत्वायोग इति धर्मिग्राहकतयोपजीव्यभूतेनानुमानेन तस्य बाधितत्वात्। एवमुपादानत्वांशेऽपि न तत्प्रा-माण्यम्। सशरीरस्योपादानत्वे संसारित्वम्। अशरीरस्य तथात्वे शरीरद्वारा उपादान-

त्वायोगः इत्यादिरीत्या सर्वे एव वेदान्ता ईश्वरस्य परिजनस्थानोपादनत्वादिप्रतिपादनपरा अनुमानोपजीविनो बाधिता भवेयुः । अतश्शास्त्रप्रामाण्यसिद्ध्यर्थमीश्वरानुमानं निरस्यते ।

नैयायिकाः खल्वेवमाहुः—क्षित्यादिकं सकर्तृकं कार्यत्वात्, घटवत् इत्यनुमानेनास्मदादीनां क्षित्यादिकर्तृत्वस्य बाधितत्वात्तत्कर्तृतया ईश्वरस्य सिद्धिः । क्षित्यादीनां कार्यत्वं तावत् प्रत्यक्षेणैव प्रतिपन्नम् । क्षित्यादिकं कार्यं सावयवत्त्वात्, घटवदित्यनुमानेनापि तेषां कार्यत्वं सिद्धम् । न च सकर्तृकस्य सर्वस्य शक्यक्रियत्वेन साध्यव्यापकत्वात्, कार्यस्य च क्षित्यादेरशक्यक्रियत्वेन साधनाव्यापकत्वाच्च, शक्यक्रियत्वमत्रानुमान उपाधिरिति शङ्कनीयम्; तत्तत्कार्यशक्तेरप्रत्यक्षायाः कार्यत्वहेतुनैवानुमेयत्वेन कार्यत्वव्यापकत्वेन साधनाव्यापकत्वाभावात् । अतो निर्दुष्टमिदमनुमानमिति ।

सिद्धान्तस्तु—सकर्तृकमित्यत्र कर्तृशब्देन यत्नादिव्यापारनिरपेक्षकेवलात्मनो विवक्षणे दृष्टान्ते घटादौ यत्नादिनिरपेक्षकर्तृजन्यत्वासिद्धिः; पक्षे तादृशसकर्तृकत्वस्य बाधः; यत्नवदीश्वरस्यानुमानेनासिद्धिश्च । यदि ज्ञानादिपरिकररहितकेवलयत्नवानात्मा कर्तृशब्देन विवक्षितः, तदापि किं यत्नस्य यत्नाधिष्ठेयवस्तुक्रियाद्वारा कार्यहेतुत्वम्? उत स्वरूपतइति विकल्पे, स्वरूपतः इति पक्षे पूर्ववदेव दोषाः; यत्ने सत्यपि क्रियां विना घटादिकार्यादर्शनेन स्वरूपतः यत्नपूर्वकत्वस्य दृष्टान्तेऽभावात् । अतः क्रियाद्वारा कार्यहेतुत्वमिति प्रथमकल्पे, कार्यसामान्यस्य स्वोपयोगिक्रियाद्वारा यत्नपूर्वकत्वमिति नियमादग्न्यादीनामूर्ध्वगमनादेरदृष्टैककारणकत्वमिति सिद्धान्तव्याहतिः परेषाम् । उक्तं हि 'अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि' इति ।

अपि च विश्वोपादानक्रियाहेतुप्रयत्नवत्पूर्वकत्वसाधनेऽपि उक्तप्रयत्नवतस्सर्वज्ञत्वे प्रमाणं नास्ति । लोके चेतनस्यैव यत्नो दृष्ट इति तस्य चैतन्यमात्रकल्पनैव हि लघीयसी; न तु तस्य चैतन्यस्य सर्वविषयकत्वमेतावता सिद्ध्यति । यत्नस्य विषयव्यवस्थाया ज्ञानाधीनत्वात् सर्वविषयज्ञानं विना सर्वविषयकत्वं यत्नस्य न सेत्स्यतीति च न सुवचम् । यथा सुषुप्तावदृष्टादेव यत्नस्य विषयव्यवस्था तद्वज्ज्ञानं विनापि तदुपपत्तेः । अतः उक्तपक्षेऽपि विवक्षितेश्वरासिद्धिः ।

ज्ञानादिपरिकरसहितयत्नवत्पूर्वकत्वस्य सकर्तृकमित्यनेन विवक्षणेऽप्युक्तरीत्या ज्ञानादेर्यत्नं प्रत्यनुपकारकत्वात्साध्याप्रसिद्धिः। ज्ञानयत्नयोस्साहित्यदर्शनमात्रेण ज्ञानसाधनेऽविशेषाद्देहादिकमप्यङ्गीकार्यं स्यात्।

किञ्च क्षित्यादिकं शरीरिकर्तृकम्, अनित्यज्ञानवत्कर्तृकम्, अस्मदादिकर्तृकम्, असर्वज्ञकर्तृकम्, सकर्तृकत्वाद्घटवदिति प्रत्यनुमानपराहतञ्चैतदनुमानमिति।

**इति ईश्वरानुमानभङ्गवादः पञ्चमः**

---

षष्ठे देहाद्यतिरिक्तात्मयाथात्म्यवादे प्राधान्येन चार्वाकमतमद्वैतिमतञ्च निरस्य देहेन्द्रियमनःप्राणबुद्धिविलक्षणः, परमात्मनः परस्परञ्च भिन्नः, ज्ञाता, कर्ता, अहम्प्रत्ययवेद्यः जीवात्मेति समर्थ्यते। तत्र चार्वाकस्यायं भावः—अहम्प्रत्ययगोचरस्यात्मत्वमिति तावदविवादम्। अतः देवोऽहं मनुष्योऽहं इति प्रतीतिबलाद्देहस्यैवात्मत्वम्। न हि कश्चित् चक्षुरहं श्रोत्रमहमिति प्रत्येति। अत इन्द्रियाणामनात्मत्वमवसीयते। मनसस्तु ज्ञानकरणत्वमेवेति न तत्कर्तृत्वमिति नात्मत्वम्। नापि प्राणस्यात्मत्वम्; शरीरे निष्क्रिये सति प्राणे सक्रियेऽपि अहं निष्क्रिय इति प्रतीतेरनुभवसिद्धाया अनुपपत्तेः। बुद्धेस्तु ज्ञाधात्वर्थत्वेन साध्यरूपत्वात् आत्मनश्च सिद्धत्वान्न तथात्वम्। अतो देह एवात्मा। मम शरीरमिति व्यतिरेकधीस्तु भवन्मते ममात्मेतिवदौपचारिकी। पृथिव्यादिभूतेषु चैतन्यानुपलम्भेऽपि शरीराकारेण परिणतेषु तेषु यथादर्शनं चैतन्याङ्गीकारे बाधकाभावः। बाल्ययुवत्वाद्यवस्थाभेदेऽपि स एवायमिति प्रत्यभिज्ञाबलाद्देहस्याभिन्नतया बाल्येऽनुभूतस्य युवत्वादौ प्रतिसन्धानोपपत्तिरिति।

अद्वैतिनस्त्वेवमाहुः—देहातिरिक्तः प्रत्यगर्थ एवात्मा न ज्ञाता अहमर्थः। प्रत्यक्त्वञ्च स्वयम्प्रकाशत्वम्। तत्संविद एव। अतस्संविदेवात्मा। संविदो व्यतिरिच्यमानं परागर्थ एव। अत आत्मनो ज्ञातृत्वाङ्गीकारे संविदपरपर्यायज्ञानव्यतिरेकस्याभ्युपेयत्वात्परागर्थ-

त्वापत्तेः। प्रत्यक्त्वस्य संविद्रूपत्व एव निर्वाहात् संविद्रूप एव सः ; न तु ज्ञानाश्रय इति ।

राद्धान्तस्तु—चार्वाकाभिमतदेहात्मवादो न युज्यते। देहस्यावयवसङ्घातरूपत्वेऽतिरेकेऽपि वावयवेषु चैतन्यमवश्यमङ्गीकार्यम् । अतिरेकवादेऽवयविविशेषगुणानां अवयवविशेषगुणैरेवोत्पादाभ्युपगमात् । सङ्घातरूपत्वेऽपि अवयवानाञ्चैतन्यस्य प्रत्येकमभावे देहे चैतन्यानुपपत्तिः । अतोऽवयवेषु चैतन्यमङ्गीक्रियते इत्यपि न वक्तुं शक्यम् ; अवयवानामहमिति प्रतीतिगोचरत्वाभावात् । न हि कश्चिदहं पाणिः अहं पाद इति प्रतिपद्यते । अतोऽहंत्वस्य तेष्वभावाच्चैतन्यस्याप्यभावः । पादे मे सुखमित्याद्युपलम्भात्सुखादेः पादादिवृत्तितया तत्समानाधिकरणं चैतन्यमपि पादादीनामित्यपि न वाच्यम् , मे सुखमिति प्रतीतिबलादहमर्थस्यैव सुखित्वाद्यभ्युपगमावश्यकत्वात् पादादेरनहमर्थस्य तदयोगात् । पादे सुखमित्यादिः प्रत्ययस्तु अहमर्थनिष्ठमेव सुखादिकं प्रति पादादेरवच्छेदकतयोपपद्यते ।

किञ्च एकस्यावयवस्य चैतन्ये तदवयवनाशे चैतन्याभावप्रसङ्गः । सर्वेषां प्रत्येकं तथात्वे स्वप्रयोजनापेक्षिष्वितरपराङ्मुखेषु मिथस्साभ्यसूयेषु च हस्तपादादिष्ववयवेषु एकग्रामवासिषु पुरुषेष्विव महान्विवादः स्यात् । न हि चेतनस्स्वप्रयोजनमपहायार्थान्तरे प्रयतते ।

चूर्णहरिद्रासंयोगजरागवत् पृथिव्यादिषु भूतेषु प्रत्येकमविद्यमानमपि चैतन्यं तत्सङ्घातात्मके शरीरे जायतामित्यनुपपन्नम् । दृष्टान्तेऽपि पाकविशेषेणावयविगुणसजातीयगुणस्य तत्तदवयवेषूत्पत्तेरभ्युपगमात् । अतोऽवयवेष्वविद्यमानञ्चैतन्यमवयविनि सम्पद्यतामिति सकलप्रमाणतर्कविरुद्धम् ।

किञ्च बालादेस्स्तन्यपानादाविष्टसाधनत्वस्मरणात्प्रवृत्तिरेष्टव्या । इदानीं तदनुभवस्याभावात् । तच्च स्मरणं पूर्वानुभवजन्यसंस्कारोन्मेषवशादुत्पद्यत इत्यास्थेयम् । संस्कारोन्मेषकारणञ्चादृष्टम् । तच्चादृष्टं अनुभवः संस्कारश्चास्मिन् देहे बालादेर्न सम्भवतीत्यदृष्टाद्याधारः देहातिरिक्तो नित्य आत्मा सिद्ध्यति । अत एव प्रेक्षावतां पार-

लौकिक्यः प्रवृत्तय उपपद्यन्ते । देहस्यात्मत्वे तन्नाशानन्तरभाविफलानुभवार्थं यागदानादिप्रवृत्त्यनुपपत्तेरिति ।

एवमद्वैतिनामभिमतस्संविदात्मवादोऽप्यनुपपन्नः, अहं संवेद्मीत्यहमर्थधर्मतया संवेदनप्रतीतेः । न ह्यात्मनः कञ्चित्प्रति धर्मत्वं सम्भवति । एवं संवेदनमुत्पन्नमिति नष्टमिति चोत्पादविनाशयोरनुभवसिद्धत्वान्न तस्य नित्यात्मत्वाङ्गीकारो युक्तः । प्रत्यक्त्वं नाम स्वस्मै स्वयम्प्रकाशमानत्वम् । परस्मा एव भासमानत्वं पराक्त्वम् । अतस्संविदो घटादिवत्पराक्त्वमेव, न तु प्रत्यक्त्वम् । तत्तु अहमर्थस्यैवेति । यजेतेत्यादिशास्त्राणामर्थवत्त्वाय तस्य कर्तृत्वभोक्तृत्वादिकमभ्युपेयमिति न केवलसंविन्मात्रत्वमात्मन इति ।

**इति देहाद्यतिरिक्तात्मयाथात्म्यवादः षष्ठः**

---

सप्तमे सामानाधिकरण्यवादे भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति सामानाधिकरण्यलक्षणस्य पराभिमतार्थनिरसनपूर्वकं यथावस्थितार्थः प्रकाश्यते । तत्र भेदाभेदवादिन आहुः—जातिगुणादीनां स्वाश्रयव्यक्त्यादिभिस्सह भेदोऽभेदश्च प्रतीतिसिद्धः । अतो जातिगुणादिरूपभिन्नप्रवृत्तिनिमित्तकानां शब्दानां जातिगुणाद्यभिन्नैकविशेष्यबोधकत्वं सामानाधिकरण्यमित्यर्थः । दृश्यते ह्ययं गौरिति पिण्डाभेदेन जातिः । अयं शुक्ल इति च गुण्यभेदेन गुणः । न ह्यत्र दण्डीत्यादौ दण्डादिरिव विशेषणतयैव गोत्वादयो भान्तीति सुवचम् ; दण्डादीनां पुरुषापेक्षया पृथगुपलम्भबलाद्दृष्टान्ते विशेषणविशेष्यभाव उपपन्नः । दार्ष्टान्तिके तु यदेव व्यक्तिरूपेणावगतम्, तदेव जातिरूपेणाप्यवगम्यत इति वैषम्यम् । न हि निपुणमपि विस्फारिताक्षः इयं जातिः, इयं व्यक्तिरिति विवेक्तुं शक्नोति । अपि चात्यन्तभेदे जातिव्यक्त्यादेर्नियमेन पृथगनुपलम्भ इति न घटते । अतस्सहोपलम्भनियमाच्चाभेदः । किञ्च अवयवावयविनोस्समानदेशत्वमुपलभ्यते । तयोरत्यन्तभेदे मूर्तयोरत्यन्तभिन्नयोस्स-

मानदेशताविरोधात्तन्नोपपद्यते । अतो भेदाभेद आस्थेय इति उक्त एवार्थस्सामानाधिकरण्यलक्षणवाक्यस्येति ।

अद्वैतिनामयमाशयः—समानाधिकरणवाक्यं न विशिष्टैकार्थप्रतिपादकम्, अपि त्वखण्डस्वरूपमात्रपरम् । तथा हि—उक्तवाक्यं विशेषणमात्रपरं विशिष्टपरं स्वरूपमात्रपरं वा? आद्ये विशेषणानां भेदादेकार्थबोधकत्वं न सम्भवति शब्दानाम् । द्वितीये विशेषणभेदेन विशेष्यभेदादुक्तदोष एव । अतः स्वरूपमात्रपरः । भिन्नप्रवृत्तिनिमित्तानामित्यस्मिन्वाक्ये प्रवृत्तिनिमित्तभेदोऽर्थत्वेन न विवक्षितः, अपि तु घटः कलश इत्यादिपर्यायपदानां सामानाधिकरण्यनिवृत्त्यर्थं भिन्नप्रवृत्तिनिमित्तकत्वेन व्युत्पन्नानां शब्दानां यत्र एकविशेष्यबोधकत्वं तत्र सामानाधिकरण्यमित्यर्थः । अतो नीलो घट इत्यादावेव तदिति सिद्ध्यति । अत एव सत्यं ज्ञानमित्यादिवेदान्तवाक्येषु निर्विशेषं ब्रह्म सिद्ध्यतीति ॥

सिद्धान्तस्तु—भेदाभेदवादोऽनुपपन्नः । इदमिदं न भवतीति भेदः । इदमिदं भवतीत्यभेदः । इमौ भावाभावरूपौ भेदाभेदावेकस्मिन्वस्तुनि युगपन्न सम्भवतः । अयं गौरित्यादौ च इदम्पदार्थे गोत्वादिकं विशेषणतयैव भासते ; यथा दण्डीत्यादौ दण्डादिकम् । पृथक्संस्थानभाजां स्वतन्त्राणामेव वस्तूनां कादाचित्कविशेषणभावः मत्वर्थीयप्रत्ययसापेक्षसामानाधिकरण्यप्रयोजकः ; यथा दण्डीत्यादौ । द्रव्यसंस्थानतयैव पदार्थभूतानां तु द्रव्यविशेषणतयैवावस्थितिः मत्वर्थीयनिरपेक्षसामानाधिकरण्यप्रयोजिका । यथा अयं गौरित्यादौ । नहि गोत्वादिकं दण्डादिकमिव स्वतन्त्रं वस्तु पृथक्संस्थानवद्वा । अतो मत्वर्थीयप्रत्ययसत्त्वे तदसत्वे चोभयोर्विशेषणविशेष्यभावस्समानः । सहोपलम्भनियमोऽपि न भेदाभेदसाधकः, अपि त्वत्यन्तभिन्नयोरेव साहित्यदर्शनात् साहित्यनियमस्य भेदनियमसाधकत्वाच्चाभेदप्रत्यनीक एव । अवयवावयविनोस्समानदेशताविरोधाद्भेदाभेद इति चानुपपन्नम् ; अवयवसङ्घातातिरिक्तावयव्यनभ्युपगमात् । अतो न भेदाभेदवाद्यभिमतस्सामानाधिकरण्यलक्षणवाक्यार्थ उपपन्नः ।

तथा अद्वैतिनामाशयोऽप्यत्र नोपपद्यते । तथा हि—समानाधिकरणवाक्यस्य स्वरूपमात्रपरत्वे नीलमुत्पलमित्यादिपदेषु एकपदप्रतिपन्नात्पदान्तरप्रतिपन्नं वस्तु यदि नातिरिच्येत, तदा निष्फलमेव पदान्तरमापद्येत ।

अपि च लक्षणवाक्ये प्रवृत्तिनिमित्तभेदवतामेव शब्दानामेकार्थवृत्तित्वं प्रतीयते। तत्र एकार्थबोधकत्वस्येव भिन्नप्रवृत्तिनिमित्तकत्वस्यापि संरक्षणमावश्यकम्। अन्यतरपरित्यागे एकार्थतैव हीयताम्; विनिगमकाभावात्। नियतभिन्नाश्रयतया दृष्टविशेषणानामेव विशेष्य-भेदकत्वं खण्डः मुण्डः पूर्णशृङ्गो गौरित्यादौ दृष्टम्; न पुनरतथाविधानामपि। देवदत्तः श्यामो युवा लोहिताक्ष इत्यादौ विशेषणभेदेऽपि विशेष्यभेदाभावात्। अतो विशिष्टार्थ-परत्वेऽपि नैकार्थत्वविरोधः। अत एव सत्यं ज्ञानमित्यादावपि सत्यत्वादिविशिष्टं सगुण-मेव ब्रह्म प्रतिपन्नम्, न पुनर्निर्गुणम्। अयमत्र लक्षणवाक्यार्थः—प्रवृत्तिः—अभिधानम्। तस्य निमित्तं—द्वारभूतं जातिगुणादिकं भिन्नं येषां तेषां पदानां, एकस्मिन्नर्थे वृत्तिः—एकविशेष्यबोधनं सामानाधिकरण्यमिति। अत्र भिन्नप्रवृत्तिनिमित्तानामिति घटः कलश इत्यादिपर्यायशब्दव्युदासाय। एकस्मिन्नर्थ इति व्यधिकरणानां घटः पट इत्यादीनां सामानाधिकरण्यव्युदासाय इति।

**इति सामानाधिकरण्यवादस्सप्तमः।**

---

अष्टमे सत्कार्यवादे वैशेषिकाभिमतासत्कार्यवादनिरासपूर्वकं सत्कार्यवादो व्यवस्था-प्यते। वैशेषिकाणामयमाशयः—कारणादन्यदेव हि कार्यमुत्पद्यत इति वक्तव्यम्; बुद्धि-शब्दादिभेदात्। तथा हि—न हि तन्त्वादिमात्रे पटादिधीः, पटादिषु वा तन्त्वादिधीः। एवं तन्तवः पटः इति शब्दभेदः। बहवस्तन्तवः पट एक इति सङ्ख्याभेदः। पटाद्यर्थं तन्त्वादय उपादीयन्ते। पटादयस्त्वाच्छादनार्थमिति कार्यभेदः। वृत्तचतुरश्रत्वादिराकारभेदः। पूर्वभा-विनस्तन्त्वादयः, पटादयस्तु पश्चाद्भाविन इति कालभेदः। अंशुप्रभृतयस्तन्त्वादीनां कार-णभूताः, पटादीनान्तु तन्त्वादय इति नियतः कारणभेदः। अपि च कार्यद्रव्यं यदि प्रागपि सत्, तदा कुलालकुविन्दादिकारकव्यापारवैयर्थ्यम्। सर्वेषां सत्त्वाविशेषे नित्यानित्यविभा-गोऽपि न स्यात्। कार्यकारणयोर्द्रव्यभेदाभावेऽप्यवस्थाभेदादिदं सर्वमुपपद्यत इति न वक्तुं शक्यते। अवस्थाभेदस्य कार्यकारणयोरनुगतत्वे सत्तादिरूपस्य तस्य द्रव्यस्वरूप-वदेव बुद्धिशब्दादिभेदनियामकत्वासंभवात्। अनियतत्वे तु कार्यावस्थायाः कारणे कार-

णावस्थायाः कार्ये च संभवेन सुतरां बुद्धिशब्दादिभेदव्यवस्थानुपपत्तिः। नियतत्वमिति तृतीयपक्षाश्रयणे कारणनियतस्यावस्थाभेदस्य कार्ये कार्यनियतस्य च कारणेऽभावात्कार्यकारणवस्तुभेद आवश्यकः। अन्यथा विरुद्धधर्माध्यासस्स्यादिति।

अत्र सिद्धान्तः—कार्यकारणयोरेकत्वं प्रत्यभिज्ञाबलादभ्युपेयम्। पश्यामो हि वयं तदेव मृत्तन्त्वादि द्रव्यमवस्थाभेदमासाद्य घटपटादिभावमनुभवतीति। अतः मृदेवायं घटः, तन्तुरेवायं पटः इति कार्यकारणयोरभेदस्यैव प्रतीयमानत्वाद्बुद्धिभेदोऽसिद्धः। कार्ये पटादौ उपादानभूततन्त्वादेरनुवृत्तिरेव, न तु कार्यस्य प्रागपि सत्त्वमिति न वक्तुं शक्यते; न हि उपादानेऽनुवर्तमाने द्रव्यान्तरं समस्तीति कश्चित्प्रत्येति। अत एव तन्तुः पट इति समानाधिकरणप्रत्यय उपपद्यते। बुद्धिभेदशब्दभेदादिविरुद्धधर्माध्यासोऽप्यवस्थाभेदादेवोपपद्यते। स चावस्थाभेदस्संयोगादिः। स च नियत एव। अथापि पूर्वोक्तरीत्या न विरुद्धधर्मान्तरं सः। धर्मिद्वयनिष्ठतया स्वयं स्वाभावश्च यदि प्रतीयेयातां तदा हि विरुद्धत्वं युक्तम्। एकधर्मिण्येव हि कदाचिदसावुत्पद्यते। अतः कालभेदेनावस्थाभेदोत्पत्तौ विरोधो नास्ति। अत एव बुद्धिशब्दान्तरादय उपपद्यन्ते। अतो न कार्यकारणद्रव्यभेदः।

किञ्च असमवायिकारणतया संयोगो भवद्भिरप्यङ्गीक्रियते। स तन्त्वादिष्वेव नियतः, नार्थान्तरे। स तु स्वविशिष्टे बुद्धिशब्दान्तरादिकं धर्मान्तरमपि व्यवस्थापयतीति न विरोधः। सत्कार्यवाद एव श्रुतिसम्मतः—'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इत्यादिभिरेकविज्ञानेन सर्वविज्ञानमुपदिश्यते। तच्च कथमित्यपेक्षायां 'यथा-सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव-सत्यम्' इत्यादिभिस्तदुपपाद्यते। तदवगच्छामः कारणद्रव्यमेवावस्थान्तरापन्नं कार्यद्रव्यमिति। कथमन्यथा अन्यज्ञानादन्यस्य विज्ञानं स्यात्। तस्मात्सतएव कार्यत्वमिति।

**इति सत्कार्यवादोऽष्टमः।**

---

संस्थानसामान्यसमर्थनवादे नवमे संस्थानातिरिक्तां जातिमभ्युपगच्छतां तार्किकाणां पक्षं निरस्य संस्थानमेव जातिरिति समर्थ्यते। अत्र पूर्वपक्षः:—

गवादिष्वेका अनुवृत्ता जातिः प्रत्यक्षमीक्ष्यते। पश्यामो हि वयं खण्डादिष्वनुगतं हस्त्यादिभ्यो व्यावृत्तं गोत्वम्। कश्चिचादृष्टहस्तिजातीयो दृष्टहस्तिजातीयं प्रति 'अदृष्टपूर्वोऽयमिहास्ति दृश्यताम्' इति ब्रवीति। तत्रेतरो ब्रवीति 'दृष्टपूर्व एव नापूर्वं पश्यामि' इति। इदन्त्वेतद्गतहस्तिजातेरेव पूर्वदृष्टत्वादुपपद्यते; एतस्या व्यक्तेः पूर्वमननुभूतत्वात्। अयं गौः अयं हस्तीति विलक्षणाकारा यथा व्यवसायाः, नैवमयं गौरयमपि गौरिति; उभयोरप्यनुवृत्ताकारसन्दोहादेवायं व्यवसायः, न व्यक्तिशक्तिमात्रानुरोधात्। उपाधिः कश्चिदत्र विषय इति न वक्तुं शक्यते, स ह्युपाधिरिति कथ्यते, यः परम्परासम्बन्धेन नानार्थानेकस्सङ्गृह्णाति; यथा पाचको लावक इत्यादौ पच्यादिजातिः क्रियाव्यक्तितत्सम्बन्धादिव्यवहिता पुरुषादीन्गृह्णाति। अतश्च सामान्यस्यैवापलापे उपाधयोऽपि न लब्धुं शक्यन्ते। द्रव्यक्रियागुणाश्रया जातय एव हि प्रायश उपाधयः। अतो गवादिशब्दप्रवृत्तिनिमित्तं सैव जातिः। सदृशसंस्थानं प्रवृत्तिनिमित्तमिति तु न सुवचम्। तस्यैकत्वे जातेरेव शब्दान्तरेणाभिलापात्। अनेकत्वे व्यक्तिवदनन्तत्वाद्व्यभिचाराच्चाव्युत्पत्तिः। अतः प्रत्यक्षत्वाच्छब्दानुमानयोस्सामान्योपनिबद्धत्वाच्चातिरिक्ता जातिरनुगता अभ्युपगन्तव्येति—

अत्र सिद्धान्तः—सुसदृशसंस्थानमेव जातिः। समानानां भावः किल सामान्यम् समानानि संस्थानानि तद्वन्ति च वस्तूनि; तेषां भावः स्वभावः—एकसमुदायानुप्रवेशः। स ह्यस्ति कश्चित्समानानाम्, यदेकगोचरतया समुदायानुप्रवेशः। अनेन सुसदृशसंस्थानरूपेणोपाधिना साक्षाद्व्यक्तिसमवायिनोदाहृतप्रतिसंधानोपपत्तेर्न तदतिरिक्तजातेः प्रत्यक्षत्वसिद्धिः। इदञ्च संस्थानं परैरप्यभ्युपगतमिति नापूर्वं किमपि कल्प्यत इति कल्पनालाघवमपि। इदञ्च संस्थानं न स्वरूपेण प्रवृत्तिनिमित्तम्। किन्तु द्वितीयादिव्यक्तिदर्शनवेळायां दृश्यमानसंस्थानस्मारितपूर्वपूर्वव्यक्तिसंस्थानानामपि साश्रयाणां तदेकप्रतिपत्तिविषयत्वरूपधर्मविशिष्टमेव। अतः पूर्वोक्तमानन्त्यं व्यभिचारो वा न भवति।

गोसंस्थानं गवयसंस्थानं चाल्पसदृशमपि न सुसदृशम्। यस्मिन् वस्तुनि भवतामेकत्वग्रहो जायते, तस्मिन्नेव सौसादृश्यम्। तच्च साक्षात्सम्बन्धि संस्थानं क्वचिदुज्ज्वलं क्वचिच्च मसृणमिति जातिपक्षेऽपि तुल्यम्। स्वासाधारणं रूपमेव तत्संस्थानम्

तदेव च प्रवृत्तिनिमित्तम् । तच्च क्वचिदवयवसंयोगविशेषस्सास्नादिः । अन्यत्र तु निरवयव आत्मादौ ज्ञानादिरिति भाव्यम् । एवं सुसदृशसंस्थानं जातिरित्यभ्युगमे न केवलं लाघवमात्रम् ; अपितु एकविज्ञानेन सर्वविज्ञानप्रतिपादिका श्रुतिरप्यनुकूला । सत्कार्यवादबलेनाश्रयस्य नित्यत्वे एकद्रव्यत्वे च सिद्धे अनेकाश्रयजात्यभ्युपगमासंभवात् । अतस्सुसदृशसंस्थानमेव जातिरिति । 'अग्न्यवस्थे च सलिले वाय्ववस्थे च तेजसि' इति पुराणवचनमपि संस्थानसामान्यपक्षमेव द्रढयति ॥

**इति संस्थानसामान्यसमर्थनवादो नवमः ॥**

---

अथ दशमे शक्तिवादे स्वरूपसहकारिव्यतिरिक्तशक्तिपदार्थं दूषयतां नैयायिकानां पक्षप्रतिक्षेपेणातिरिक्तशक्तिपदार्थसद्भावः प्रतिपाद्यते । अत्र नैयायिकाः—यत्र कार्यं न जायते, तत्र सर्वत्र कारणानामन्यतमस्य स्वरूपमेव नास्तीति प्रमाणैरवसीयते । न तु तेषु सत्स्वपि कार्यानुदयः ; येन शक्तिः कल्प्येत । तथाहि—यस्य प्रतिबन्धाभावस्याभावान्मन्त्ररुद्धो दहनो न दहति स एव प्रतिबन्धाभावश्शक्तिः । स च प्रतिबन्धाभावो हेतुरेव ; प्रतिबन्धाभावविशिष्टस्य दहनस्य दाहकत्वात् । भावस्येवाभावस्यापि कारणत्वं युक्तम् । तथा च मण्यादिप्रतिबन्धे सति सामग्रीवैकल्यात्कार्याभावः; न तु तदतिरिक्तशक्त्युपरोधात् । तत्कल्पनायां गौरवात् ।

किञ्चातिरिक्तशक्तिकल्पनायां प्रतिबन्धकेन तन्नाशे पुनरुत्तम्भकसत्त्वे किं तस्याश्शक्तेर्जनकमिति वक्तव्यम् । उत्तम्भकमेवेति चेत्, तर्ह्यनियतहेतुकत्वप्रसङ्गः ; पूर्वं स्वाश्रयस्वरूपोत्पादकात्, कदाचिदुत्तम्भकाच्च शक्तेरुत्पत्त्यभ्युपगमात् । उत्तम्भकसत्त्वेऽपि शक्तिर्न जायत इति चेत्, पुनर्दाहकार्यं न स्यात् । अत उत्तम्भकाभावविशिष्टस्य मण्यादिरूपप्रतिबन्धकस्याभाव एव दाहकारणम् । स च विशिष्टाभावः केवलोत्तम्भकसत्त्वे, प्रतिबन्धोत्तम्भकोभयसत्त्वे, तदुभयाभावे च वर्तत इत्यनुगतकारणसिद्धिरिति नातिरिक्तशक्तिकल्पनं युक्तमिति ॥

अत्रोच्यते—भावानामेव हेतुत्वं नाभावानामपि ; भावातिरिक्ताभावस्वरूपस्यैव दुर्निरूपत्वात्तस्य कारणताया दूरनिरस्तत्वात् । यदि च मण्याद्यभावः कारणम् , तर्हि तत्प्र-

योक्तृपुरुषाभावोऽपि कारणं स्यात्; प्रतिपक्षाभावत्वाविशेषात्। अपि च मण्याद्यभावस्ये- वोत्तम्भकस्यापि कारणत्वं कुतो नाश्रीयते। उत्तम्भकेन विनापि मण्याद्यभावमात्रेण क्वचित्कार्यं दृश्यत इति चेत्, तर्हि तृणारणिमणिस्थल इव कार्यवैलक्षण्यं कल्प्यताम्; न तु भावरूपं परित्यज्योत्तम्भकाभावविशिष्टमण्याद्यभावात्मना अभावस्य कारणत्वं न्याय्यम्। अन्यथा तृणारणिमणीनां तृणारण्यभावविशिष्टमण्यभावाभावात्मना एकरूपेण कारणत्वप्रसङ्गः; तृणाद्यन्यतमस्थल उक्तविशिष्टाभावसत्वात्। किञ्च भावस्याप्युक्तरीत्या विशिष्टाभावात्मना कारणत्वे अग्न्यादेरप्युक्तविशिष्टाभावात्मना धूमादिकं प्रति कारणत्वं शङ्क्येत। इत्थं च यथा उत्तम्भकाभावेऽपि विशेष्याभावप्रयुक्तविशिष्टाभावसत्त्वाद्दाहादिकार्यं जायते, तद्वदग्न्याद्यभावेऽपि धूमादिर्जायेतेति शङ्कया धूमादग्न्यनुमानं न स्यात्। एवं रीत्या सर्वत्र कार्यात्कारणानुमानं न सिद्ध्यति। अतश्शक्तिमतामेव भावानां हेतुत्वम्। सेयं शक्तिर्नार्थान्तरम्। तदेव हि द्रव्यं दृश्यादृश्यरूपम्। तस्य रूपस्य शक्तिरिति संज्ञा। 'शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः' इत्यादिकमपि शक्तौ प्रमाणमिति॥

इति शक्तिवादो दशमः॥

---

अथ एकादशे भावान्तराभाववादे भावातिरिक्तमभावं निराकृत्य अभावस्य भावरूपत्वं साधयति—अत्र पूर्वपक्षिणस्तार्किकाः। ते ह्येवमाहुः—नञर्थो ह्यभावः। स च सप्रतियोगिकः। न तस्य भावरूपत्वम्। भावस्य निष्प्रतियोगिकत्वात्। अत एव भावविशेषो निषेधार्थ इति न सुवचम्। विधिगम्यस्य भावत्वं तावदविगीतम्। स च सप्रतियोगिकत्वनिर्बन्धविधुरः। नैवमभावः; तस्य प्रतियोग्यपेक्षानियमात्। उपाधिरेव नास्तिशब्दार्थ इति यदि मतम्; तत्र विकल्प्यते किं केवलो देश उपाधिः, उत तद्बुद्धिः, किं वा केवलः कालः, यदि वा देशान्वितः कालः? आद्ये प्रतियोगिनि सत्यपि केवलदेशस्यानपायान्नास्तीति प्रयोगस्स्यात्। प्रतियोग्यसन्निधान एव नास्तीति व्यवहार इति चेत्, अभावेन विना प्रतियोगित्वं किङ्कृतमिति दुर्वचम्; अभावमादायैव ह्यस्यायं प्रति-

योगीति व्यवहारः । असन्निहित एव प्रतियोगीति चेत्, तदा सन्निधानस्याभावोऽभ्युपगतः । एवमप्यभावसामान्यस्य न निषेधः । देशान्तरेण सम्बद्धः प्रतियोगीति चेत्, विभुपदार्थानां सर्वदेशसम्बन्धान्निषेधप्रसङ्गः । अभावस्य ज्ञानरूपत्वमिति द्वितीयपक्षे ज्ञानस्य क्षणिकतया अभावरूपत्वानुपपत्तिः । अन्योन्याभावस्य नित्यतायास्सर्वसम्मतत्वात् । कालो नास्तिशब्दार्थ इति तृतीयपक्षोऽपि न युज्यते, यतस्सर्वत्रैव चैकरूपः कालः । कथं तस्य नास्तिबुद्धिबोध्यत्वम्? देशान्वितः काल इति तुरीयपक्षेऽप्यन्वयव्यतिरेकाभ्यां देशस्यैव नास्तिशब्दाभिधेयत्वम् । इत्थं च प्रथमकल्पोक्तदोषानुद्धारः । अतो रूपादिवत्प्रत्यक्षसिद्धो भावातिरिक्तोऽभाव इति ।

अत्रोच्यते—भावातिरिक्तोऽभावो नास्ति; कल्पनागौरवात् । रूपादीनामनन्यथासिद्धबुद्धिबोध्यत्ववदभावस्यातथाविधत्वात् । अभावस्य भावविशेषैरेवान्यथासिद्धत्वात् । तत्तत्प्रतियोगिभावस्फुरणसहकृतः देशकालदशाभेद एव नास्तिशब्दार्थः । अपि च अभावाभावो भाव इति भवद्भिरप्यभ्युपगम्यते । यथा भावाभावयोः परस्परप्रतिक्षेपात्मकत्वेन अन्योन्याभावरूपत्वम्, तथा भावानामेव परस्परप्रतिक्षेपात्मकत्वेनान्योन्याभावरूपत्वं वयमप्यभ्युपगच्छामः । अतिरिक्ताभाववादिना यद्देशकालाद्युपष्टब्धोऽभावपदार्थोऽङ्गीक्रियते, स एव देशकालादिरभावव्यवहारविषयः; लाघवात् । यथा भवत्सिद्धान्ते घटध्वंसप्रागभावो नाम घटतत्प्रागभावरूपः, एवं घटप्रागभावध्वंसश्च घटतद्ध्वंसरूप इति द्वेधा अभ्युपगम्यते । एवमेवास्माभिरपि अनादिप्रागवस्थापरम्परा घटस्य प्रागभावः । अनन्त उत्तरावस्थासन्तानः घटस्य ध्वंस इत्यङ्गीक्रियते । एवमनङ्गीकारे ध्वंसप्रागभावस्य प्रागभावध्वंसस्य चातिरिक्ताभावरूपत्वे सत्युत्तरोत्तराभावपारम्पर्याविश्रान्तेरनवस्था स्यात् । यदि कुत्रचिदनवस्थायास्स्वत एवोपरतिस्तर्ह्यादित एवोपरतिस्स्यात् । अतः पूर्वावस्थापरम्परैव प्रागभावः, उत्तरावस्थापरम्परैव ध्वंस इति यथादर्शनं भावान्तरमेवाभावः । 'असद्वा इदमग्र आसीत्' इत्यादिका कारणविषया श्रुतिरपि भावान्तरमेवाभाव इति पक्षे मुख्यार्था भवतीति ॥

**इति भावान्तराभाववाद एकादशः ॥**

शरीरलक्षणवादे द्वादशे श्रीभाष्यकाराभिमतं शरीरलक्षणं विशोध्यते । 'यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यम् तच्छेषतैकस्वभावं च,' तत् तस्य शरीरम्' इति लक्षणम् । अत्रेदं विचार्यते—किमेतद्वाक्यमेकलक्षणाभिप्रायमुतानेकलक्षणाभिप्रायमिति । यदि ह्येकलक्षणाभिप्रायम्, ततो व्यवच्छेद्यासिद्धेर्लक्षणत्वासंभवः । अतो लक्षणत्रयमेतदिति युक्तम् । तत्र यस्य चेतनस्य यद्द्रव्यमित्येतत्सर्वत्र सम्बध्यते । यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं शक्यमित्येकं लक्षणम् । यस्य चेतनस्य यद् द्रव्यं सर्वात्मना धार्यमित्यपरम् । यस्य चेतनस्य यद्द्रव्यं शेषतैकस्वरूपमित्यन्यत् । चेतनस्येत्यनेन चैतन्यविशिष्टो विवक्षितः । अतः धर्मभूतज्ञानस्य शरीरत्वव्युदासः; तस्य विशेष्यमात्रनियम्यत्वेऽपि चैतन्यविशिष्टनियम्यत्वाभावात् । यद् द्रव्यमिति शब्दादेर्व्युदासः; तस्यापि स्वकार्ये चेतनेन विनियुज्यमानत्वात् । सर्वात्मनेत्यस्य यावद्द्रव्यभावित्वेनेत्यर्थः । इदं नियमनधारणयोर्विशेषणम्; न शेषतायाः; तत्र एकशब्देनैव तदर्थसिद्धेः । सर्वात्मनेत्यनेन कदाचित्प्रेर्यस्य परशरीरस्य व्यवच्छेदः । स्वार्थ इत्यर्थशब्दो-विषयवाची कार्यमाचष्टे । एतेन शक्ये अर्थे इत्युक्तं भवति । स्वशब्दो द्रव्यवचनः । यस्य द्रव्यस्य यत्कार्यं वर्तते तत्स्वकार्यम् । शक्यमित्यसम्भवपरिहारः । न हि किञ्चिदपि द्रव्यं सर्वं कार्यं सर्वदा कुर्वद् दृश्यते । एवं द्वितीयलक्षणे कदाचिद्धार्याणां शिलाकाष्ठादीनां शरीरत्ववारणाय सर्वात्मनेति । तृतीयलक्षणे कदाचिच्छेषभूतानां राजभृत्यादीनां वारणाय सर्वात्मनेत्यर्थकमेकपदम् । एवं च लक्षणत्रयमिति पूर्वपक्षः ॥

सिद्धान्तस्तु—एकलक्षणमिति । तथाहि—प्रथमलक्षणे तावत्कुठारादिष्वतिव्याप्तिः; चेतनेन हि देवदत्तादिना कुठारादिस्स्वकार्ये व्यापार्यते । अव्यवधानेन नियमनविवक्षणे न दोषः, कुठारादीनां शरीरव्यवधानेनैव नियमनादिति चेत्, तर्हि भूतवेताळगरळादीनां मान्त्रिकशरीरत्वप्रसङ्गः; अव्यवधानेन तेषां नियमनात् । देवादिसङ्कल्पमात्रप्रवर्त्यानां विमानादीनां तच्छरीरत्वप्रसङ्गश्च ।

तथा द्वितीयलक्षणे यावदात्मभावित्वेन धार्यत्वस्य विशेष्यद्रव्यापेक्षया विवक्षणे जीवशरीराणामतथात्वादव्याप्तिः । नित्यसंसारिभिर्नित्यध्रियमाणायाः प्रकृतेरपि तच्छरीरत्वं

प्रसज्येत। चैतन्यविशिष्टत्वेन धारणविवक्षणे प्रसुप्तशरीरे अव्याप्तिः। योग्यत्वेन विशेषणेऽपि परशरीरस्य प्रविष्टशरीरत्वप्रसङ्गः॥

तृतीयलक्षणेऽपि चेतनस्येत्यनेन स्वरूपमात्रविवक्षणे चैतन्यविशिष्टविवक्षणे च पूर्वोक्त एव दोषः। अतः प्रत्येकलक्षणत्वानुपपत्तेः विधेयत्वाधेयत्वशेषत्वानि समुच्चितान्येवैकं लक्षणमिति। इदं हि लक्षणं श्रुतिप्रसिद्धमेवानूद्यते, नापूर्वमुत्प्रेक्ष्यते। अतः व्यवच्छेद्यविशेषापेक्षा नास्ति; श्रौतत्वात्। बृहदारण्यके 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम् यः पृथिवीमन्तरो यमयति स त आत्मा अन्तर्याम्यमृतः' इत्युक्तम्। अत्र यस्य पृथिवी शरीरमिति पृथिव्याश्शरीरत्वं निर्दिश्य तत्कथमित्यपेक्षायां 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर' इत्याधेयत्वं, 'यं पृथिवी न वेदेति' शेषत्वं, 'यः पृथिवीमन्तरो यमयतीति' विधेयत्वं च लक्षणमभिधीयते। 'अत्र यं पृथिवी न वेदे' त्यवेदनाभिधानात्पृथिव्यादेस्स्वोज्जीवनप्रयुक्तस्वरूपस्थितिप्रवृत्तयो व्युदस्यन्ते। अतः पारार्थ्यलक्षणं शेषत्वं सिद्धमिति।

**इति शरीरलक्षणवादो द्वादशः।**

अथ त्रयोदशे वादे आत्मनस्स्वप्रकाशस्यापि संसारोपपत्तिः कैवल्यस्वरूपं च निरूप्यते। आत्मा चेत्स्वप्रकाशः, स्वाभाविकसुखरूपादिभावात्संसार एव न स्यात्। तस्य तिरोधानं च न सुवचम्; स्वप्रकाशस्य तिरोधाने स्वरूपनाशप्रसङ्गस्य परेषामिव सिद्धान्तिनामपि तुल्यत्वादिति। परिहारस्तु—निर्विशेषः प्रकाशः परेषाम्। अस्माकं तु सविशेषः। स च विशेष आनुकूल्यम्। तत्र चानुकूल्ये तारतम्यविशेषोऽस्ति मसृणं तीव्रञ्चेति। तत्र मसृणमानुकूल्यं सर्वदा प्रकाशते। तीव्रन्तु विलक्षणमानुकूल्यं शास्त्रेण गम्यं कर्मणा तिरोधीयते। आत्मविषयकविशदज्ञानेन तिरोधायककर्मणि क्षीणे स्वयं वा धर्मभूतज्ञानविषयभावापेक्षं वा प्रकाशते। इतरत्तु मसृणमानुकूल्यं मसृणत्वादेव न सांसारिकदुःखतिरोधानक्षमम्। आत्मनस्स्वप्रकाशत्वेऽपि तस्य स्वाभाविकत्वेऽपि च धर्मभूतज्ञानविषयत्वाभावादप्रकाशः। स्वतस्सर्वगोचरमपि धर्मभूतज्ञानं संसारदशायां कर्मणा यथा सङ्कुचितम्, तथा तीव्रानुकूल्यमपि न विषयीकरोतीति कल्पनीयम्। यथा वा स्वरूपे भासमानेऽपि तद्धर्मस्यानुकूल्यस्याप्रकाशः, तथैवान्तर्यामिणोऽपि कैवल्यमोक्षे सुखरूपत्वेनाप्रकाश उपपद्यते।

यद्यप्यात्मावलोकनसाधनभूतकर्मयोगज्ञानयोगयोरपि इन्द्रियार्थमनःप्रभृतिवशीकरण-निष्पाद्यतया तदर्थं भगवत्प्रपत्तिः, शुभाश्रयभूतदिव्यमङ्गळविग्रहस्य ध्यानञ्चोपदिश्यते । तथापि राजभक्तिवद्देवतान्तरभक्तिवदैश्वर्यार्थिभक्तिवच्च तस्यापि ध्यानस्य स्वाभिलषितफलं प्रति प्रतिबन्धकनिवर्तकत्वनिमित्तत्वादौपाधिकत्वमेव । स्वाभाविकभक्तिविशेषस्य न तदानीमाविष्कारः ; तस्य परिशुद्धात्मावलोकनेन वा बहुजन्मसञ्चितपुण्यविशेषपरिपाक-क्रमेण वा विना दुर्लभत्वात् । अत एव वस्तुनि प्रकाशमाने तद्गतभोग्यताया अप्रकाशात् कैवल्यमोक्षस्य भगवत्प्राप्तिलक्षणमोक्षाद्भेदः । सांसारिकसुखदुःखोपभोगसाधनकर्मणां निश्शेषक्षयात्, स्वाभाविकप्रत्यगात्मगतानुकूल्यविशेषाविर्भावादपुनरावृत्त्या च तत्र मोक्षत्वव्यपदेशः ।

उपासनदशायां भगवति भोग्यत्वस्यानभिलषितत्वादभिलषितस्यैव तत्क्रतुन्यायेन साध्यत्वाद्भोग्यताया अनाविष्कारः । भगवत्प्राप्तिकामस्य तूपासनदशायामनन्तगुणविभूति-विस्तारस्य मोक्षदशाभाविनो विशेषरूपेणाननुसंहितत्वेऽपि सामान्यतो भगवद्विभूतित्वादिना अनुसन्धानमस्ति । न ह्येवं सामान्यतोऽपि कैवल्यार्थिनोऽनुसन्धानमस्ति । अतो भगवति भोग्यत्वस्यानाविर्भावः । परं तु अर्चिरादिना मार्गेण गतस्य 'स एनान् ब्रह्म गमयति' इति श्रुत्या पञ्चाग्निविदो ब्रह्मप्राप्तिरपि ब्रह्मसाक्षात्कारमात्रम्; न तु ब्रह्मानन्दानुभव इत्यास्थेयमित्येकेषां पक्षः ॥

भगवद्भाष्यकाराभिमतः पक्षस्तु—कैवल्यमोक्षोऽपि ब्रह्मानन्दानुभवपर्यन्त एव ; न ब्रह्मसाक्षात्कारमात्रम् । तथा हि—प्रत्यगात्मस्वरूपं हि भगवच्छेषतैकलक्षणं शास्त्रेण विज्ञातम्; तथैवावलोकितञ्च । यथाभिलषितं प्राप्तिरावश्यकी । विशेषणभूतस्वात्मानुकूल्यं विशिष्टानुकूल्यस्योपचायकमेव । न तद्विहन्ति । स्वाभाविकज्ञानप्रसरे सति भगवदानुकूल्यतिरोधानमप्रमाणकम् । 'ब्रह्म गमयति' इत्यविशेषेण श्रूयमाणतया कस्यचिद्ब्रह्मसाक्षात्कार-मात्रम्, अन्यस्य ब्रह्मानन्दानुभवोऽपीति वैषम्यकल्पनं न युक्तिमत् । आत्मावलोकनात्प्राक् श्रीपतौ केवलोपायतामतिः । पश्चात्तु तत्र भोग्यतामतिरपि जायते । तदा तत्किङ्करस्वात्मविद्यैव परविद्या । अतस्स्वात्मशरीरकब्रह्मोपासनं ब्रह्मशरीरभूतस्वात्मोपासनमिति विशेषण-विशेष्यभावभेदमादाय भेदेन ब्रह्मप्राप्तिगतिश्रुतिः । उभयोरपि विद्ययोः ब्रह्मोपासनरूपत्वं

ब्रह्मानुभवफलकत्वं चाविशिष्टम् । परन्तु केवलस्य मध्ये स्वात्मानुभवः पश्चात्तु ब्रह्मानुभवः । स्वात्मानुभूत्यन्तरायव्यवधानरहितस्त्वन्येषामुपासकानामिति ॥

इति त्रयोदशो वादः ।

---

इदं तावत्पाठकमहाशयैरवधेयम्, यदत्र ग्रन्थपातः तत्र····एतादृशं चिह्नं, यत्रोपलभ्यमानः पाठोऽन्यथोत्प्रेक्षितस्तत्र (    ) ईदृशं रेखाद्वयं, यत्र च त्रुटितो भागोऽस्माभिरभ्यूहितस्तत्रेदं [    ] विलक्षणं रेखाद्वयं च निवेशितमिति ।

अत्र आदितस्त्रयाणां वादानां शोधने टिप्पण्यादौ त्रुटितभागोल्लेखने चास्माकमत्यन्तमुपकृतवतां परमहंसपरिव्राजकानां श्रीमद्रङ्गरामानुजमहादेशिकानां समुचितं किञ्चित्कारमजानन्तो वयं तेषां सन्निधौ ग्रन्थरत्नमिदं समर्प्यास्मदीयां कृतज्ञतां सविनयं विज्ञापयामः । तथा इतरेषां वादानां परिष्करणे दुरधिगमार्थप्रकाशने विषयसूचीनिबन्धने चास्माकमतिशयितं साहाय्यमारचितवतां प्रियसुहृदां श्रीवेङ्कटेशसंस्कृतकलाशालाध्यापकानां तर्कार्णवश्रीवीरराघवाचार्याणामुपकारातिशयं सर्वदा वयमनुसन्दध्मः । वादार्थसङ्ग्रहे विषयसूचीपरिष्कारे चास्माकं बहूपकृतवद्भ्यः पञ्चनदस्थराजकीयसंस्कृतकलाशालाध्यापकेभ्यश्श्रीवीरराघवाचार्येभ्योऽनन्तान् धन्यवादान्निवेदयामः । पौण्डरीकपुरं स्वामिन इति प्रसिद्धानां श्रीनिवासमहादेशिकसंयमीन्द्राणामाश्रमात्सम्पादितां परिष्कृतां मातृकां प्रदायास्मान्मुद्रणे प्रोत्साहितवतां श्रीवेङ्कटेशसंस्कृतकलाशालाप्रधानाध्यक्षाणां पण्डितराज श्री D. T. ताताचार्याणामुपकारमनवरतं वयं स्मरामः । स्वीयं कार्यगौरवमविगणय्यासकृत्तत्रतत्र पाठशोधनादावस्माकमत्यन्तमुपकृतवद्भ्यो महामहोपाध्याय विद्यावाचस्पति श्रीकुप्पुस्वामिशास्त्रिवर्येभ्यो बहून् धन्यवादान् सप्रश्रयं समर्पयामः ॥

एतद्ग्रन्थमुद्रणं प्रति प्रथमं प्रार्थिता अध्यक्षवर्याः (Vice-chancellor) Rt Honourable श्रीनिवासशास्त्रिमहाशया अस्मदीयां प्रार्थनामवितथयन्तोऽनुपदमेवान्वमन्यन्त । अमुद्रितानामावश्यकानां प्राचीनग्रन्थानां प्रकाशनेऽत्यन्तंबद्धादराणामेतेषां सविधेऽस्मदीयमाधमर्ण्यं सबहुमानमावेदयामः ।

अस्मिंश्च प्रस्तावे न वयमिदं विस्मरामः, यदेतद्विश्वविद्यालयप्रतिष्ठापकाः राजासर् बिरुदाङ्किता अण्णामलैश्रेष्ठिवर्यास्सुतनिर्विशेषं विश्वविद्यालयं परिपालयन्तः प्रख्यातान्बहुश्रुतानन्विष्यान्विष्यात्र समानयन्तो राजकीयभाषासाधारणं प्राच्यभाषास्समाद्रियन्त इति । महोदाराणामेतेषामतिशयितमायुरारोग्यैश्वर्यादिकमाशंसमाना वयं भूमिकामिमामुपसंहरामः ॥

---

# A; INDEX OF KĀRIKĀS


| | | पृष्ठः |
|---|---|---|
| अग्रहीत्थव्यव- | पू | ५६ |
| अघटत्वव··· | उ | १८१ |
| अज्ञानं हि क्वचि- | ,, | ५८ |
| अज्ञान करणे (कारणा) | पू | १३ |
| अत एव हि मुख्या- | उ | १८५ |
| अत एव ह्यविज्ञात- | पू | ७ |
| अतः परमभि··· | पू | १७८ |
| अतः पदार्थ | उ | १०३ |
| अतः प्रत्यक्षता··· | ,, | १४५ |
| अतश्शक्तिपदार्थे | ,, | १६१ |
| अतद्रूपयो हि | पू | १७९ |
| अतस्तदेव साफल्या | ,, | ६ |
| अतिरेके कथन्नु | उ | १३८ |
| अतो वाक्यप्रयोक्तु | पू | १२ |
| अथ चेच्चरमः पक्षः | ,, | १७८ |
| अथ देशान्तरे | उ | १८४ |
| अथ भावस्वभावस्य | पू | १८३ |
| अथ भावाविवक्षा | ,, | १८३ |
| अथवा सर्वभावानां | ,, | १७४ |
| अथ सर्वेण भावेन | उ | १७७ |
| अथ स्वरूपमात्रेण | पू | १८४ |
| अथाभावस्य तद्रूपं | ,, | १८३ |
| अदृष्टमन्तरङ्गत्वा | उ | ९६ |
| अदृष्टमपि काष्ठादौ | ,, | १०७ |
| अदृष्टार्था न सिद्ध्येयुः | ,, | ११५ |
| अनयैव दिशा वाच्या | पू | १८२ |
| अनिश्चये···[च] | उ | ८१ |

| | | पृ |
|---|---|---|
| अनुमान प्रकारस्तु | पू | १० |
| अनुमानादनुत्पत्तेषु | उ | १०६ |
| अनुमाने तु विज्ञानं | पू | ३७ |
| अन्यः केवलशब्देन | उ | १७६ |
| अन्यतादात्म्यविद्वेषा··· | ,, | १८३ |
| अन्यथाख्यातिपक्षस्था | ,, | १७ |
| अन्यथा न पुनः | पू | १८२ |
| अन्यथासिद्धिदोषेण | उ | ११ |
| अन्यथा हि प्रपञ्चोऽयं | ,, | १४४ |
| अन्यप्रामाण्य | उ | ३० |
| अन्यश्चेत्यादिवाक्य | पू | १७५ |
| अन्योन्याभावमात्रं | उ | १८५ |
| अन्योन्याभावनित्यत्वं | पू | १७७ |
| अन्योन्याभावतां | उ | १७९ |
| अन्योन्याश्रयतो··· | पू | १८३ |
| अन्वयव्यतिरेकाभ्यां प्रति | पू | १८१ |
| अन्वयव्यतिरेकाभ्यामं- | उ | १० |
| अन्वयव्यतिरेकाभ्यां सा- | पू | १७ |
| अन्वयव्यतिरेकित्वे | ,, | ७७ |
| अन्वयज्ञानसिद्ध्यर्थं | उ | ५८ |
| अप्रकाशेषु तद्वत् | उ | ७४ |
| अप्रमाणेऽपि विज्ञाने | ,, | २६ |
| अप्रामाण्यं पुनस्तासां | ,, | २३ |
| अप्रामा···[ण्यस्य] | उ | ३६ |
| अप्रामाण्यनिवृत्तिश्च | पू | ३९ |
| अप्रामाण्यं विरोधित्वा | ,, | ३९ |
| अप्रामाण्येऽपवादे | ,, | ३८ |

| | | |
|---|---|---|
| अभावः कारणं न | उ | १७१ |
| अभाववाचिभिः शब्दैः | ,, | १७५ |
| अभावस्सन्निधानस्य | ,, | १७७ |
| अभावस्य विरुद्धत्वे | ,, | १८३ |
| अभावस्य तु कार्यत्व | ,, | १६६ |
| अभावस्याविरोध | पू | १८३ |
| अभावाभाव··· | उ | १८३ |
| अभेद्यं सर्वेषां | पू | ३ |
| अयोग्येभ्यस्समुत्कृष्टाः | ,, | ५९ |
| अर्थानां व्यभिचारित्वा | ,, | ८ |
| अर्थान्तरमथोच्येत | ,, | १८५ |
| अर्थापत्त्यनुमानाभ्यां | उ | १८४ |
| अर्थेनापि तथात्वेन | ,, | १३ |
| असद्वा इदमित्याद्या | पू | १८५ |
| असन्निहितमेवात्र | ,, | १७७ |
| असिद्धिर्वा विरोधो वा | ,, | ३६ |
| असिद्धेर्बाधकत्वस्य | उ | ३ |
| अस्ति नास्तीति सन्देहो | पू | ८० |
| अस्माद्विधिर्निषेधो | ,, | १८० |
| आकाङ्क्षादित्रयोपेतं | उ | ३७ |
| आकाङ्क्षापरिहारार्थं | पू | ३५ |
| आद्ये भूतलशब्द··· | पू | १७६ |
| आनन्तर्यविशेषेण | उ | १० |
| आमुष्मिकाणामर्थानां | पू | १०५ |
| इति भेदेन नीतिज्ञा | उ | १७५ |
| इत्थं······राभावो | ,, | १८० |
| ······[इत्थं] सर्वस्य | ,, | १८२ |
| इत्येवं प्रत्यवस्थाने | ,, | ८७ |
| ···[इह नास्तीति] | ,, | १८२ |
| ईश्वरस्यानुमानेन | पू | ८७ |
| उक्तमेतत्प्रमाणत्व | पू | १०३ |
| उच्येत न हि देशादौ | ,, | १८१ |
| उत्थितत्वञ्च तत्तेषां | उ | १७९ |
| उत्पत्त्यादिरुपाधिस्तु | पू | १७७ |
| उत्पत्स्यमानकार्येण | ,, | १७१ |
| उदकाहरणार्थेऽपि | उ | २७ |
| उपपत्त्या शरीरस्य | पू | १०६ |
| उपाधिभेदभिन्नस्य | पू | १७७ |
| उपाधिरेव यः कश्चित् | ,, | १७५ |
| उपाधेरेव नास्तित्व | उ | १७७ |
| ···[उभय] न्नैव वा | ,, | १७८ |
| उभयोश्चेदुभौ | पू | २२ |
| एकदेशोऽनुवादत्वं | ,, | ८७ |
| एकबुद्धिस्फुटं | ,, | १५६ |
| एकलक्षणयोगित्वा | ,, | १५६ |
| एकशब्दान्तरस्मार्थे | उ | ६ |
| एकस्या एव यद्रूप | ,, | १० |
| एकीभूत······ | उ | १७९ |
| एकैकतस्थिते देशे | पू | १८१ |
| एकैकस्मिन्विशिष्टे | ,, | १३२ |
| ए···[कैकस्या]नुवृत्तौ | उ | १८१ |
| एकैकान्तरभेदो | ,, | १८१ |
| एकोक्तानतिरेक | पू | १३८ |
| एवञ्चानुपपत्तिश्चे | ,, | १८४ |
| एवं न फलवद्बुद्धेः | उ | २२ |
| एवमाद्यनुयोगानां | ,, | १५० |
| एवं हि लाघवेन | ,, | १७५ |
| एष मे···वै | ,, | १८२ |
| कठोरेष्वालेयान्वय | ,, | ३ |
| कति लोकेषु दृश्यन्ते | पू | २२ |
| कथं तर्ह्यभिधेय··· | उ | ८ |
| कथं ह्यन्यानपेक्षस्य | ,, | १७ |
| कदाचित्कस्यचित् | पू | ५६ |
| कदाचिद्दर्शनाज्ज्ञाने | उ | ८१ |

| | | |
|---|---|---|
| कर्मणाञ्च फलं | उ | ११९ |
| कस्माच्चिद्भिन्नमित्येव | ,, | १८० |
| कस्यचिन्मृद्भावस्य | पू | १६६ |
| कार्यकारणभावे | ,, | ११३ |
| कार्यकारणयोरैक्यं | ,, | १४७ |
| कार्यं भिन्नमुपादानात् | ,, | १४४ |
| कार्यस्य यदि विज्ञानं | उ | १८४ |
| कालभेदविशिष्टस्य | पू | १७८ |
| कालस्तु नास्तिशब्दार्थ··· | ,, | १७७ |
| कालान्तरञ्च तत्रैव | ,, | १८१ |
| कालो वा तद्विशिष्टो वा | ,, | १८२ |
| काश्चिद्भावविशेषस्य | ,, | ९ |
| किङ्कृतं प्रतियोगित्वं | ,, | १७७ |
| किञ्च कोऽयमुपाधि | ,, | १७६ |
| किञ्च भेदातिरिक्त | ,, | १८४ |
| किं वापभ्रंशलिङ्गादि | ,, | ७ |
| किं वा साक्षादधिष्ठाने | ,, | ९५ |
| क्वचित्प्रागनुमानत्वे | उ | ९ |
| क्वचित्स्थितस्य चैत्रादे··· | ,, | १८४ |
| ख्यातिस्स्वतः किमन्यस्मा | पू | ६९ |
| गुणज्ञानानपेक्षस्य | उ | ३५ |
| गुणात्प्रामाण्यनिष्पत्तौ | ,, | २१ |
| गुणादिकर्मधर्माणां | ,, | १८२ |
| गोत्वमात्रं तु विदितं | पू | १७९ |
| गोत्वादित्यादिशब्दार्थौ | ,, | १७९ |
| घटः खलु पटादन्यः | ,, | १७९ |
| घटमात्रस्य नास्तित्वं | ,, | १८१ |
| घटादिर्देशकालाभ्यां | ,, | १८० |
| घटादेस्तु पदार्थस्य | ,, | १८२ |
| ···घटेन···सम्बन्धा | ,, | १८१ |
| घ(प)टो नास्तीति शब्दस्य | ,, | १७७ |
| ज्ञानस्यास्ति हेतुत्वं | ,, | ९१ |
| चेष्टमानतनुप्रेर्यं | उ | ९५ |
| ···जात्यादेरुपाध्यन्तर | पू | १८० |
| जीवत्वाय स्वतन्त्रत्व | ,, | ११९ |
| ज्ञानत्वानुपयुक्तांशः। | उ | २९ |
| ज्ञानं सर्वान्वयायोग्यं | पू | १०२ |
| ज्ञानस्य च स्वभावोऽयं | उ | ६० |
| तच्च साफल्य(संसर्ग) | ,, | ६ |
| तच्चापि शब्दनित्यत्व | ,, | १५ |
| तच्चावश्यं क्रिया | ,, | ९१ |
| तज्ज्ञाने(न)कारणे(ण) | ,, | १३ |
| तज्ज्ञानस्य फलं त्वन्यत् | ,, | ५ |
| तज्जातीयैस्तु तैर्युक्तो | ,, | २३ |
| ततः कस्यचिदेकस्य | ,, | १७८ |
| ततः स्वयम्प्रकाशत्वं | ,, | ८० |
| ततो नाखण्डशब्दोक्ति | ,, | १७६ |
| ततो विवक्षा सा नाम | ,, | १८१ |
| तत्काङ्क्षा विनिहन्त्येव | ,, | ९५ |
| तत्तद्वस्त्वात्मनात्मान | पू | १० |
| तत्र चेत्स्यादभेदोऽपि | उ | १३५ |
| तत्र तावन्न शब्दोऽयं | पू | ५ |
| तत्रात्मत्वं न सिद्ध्ये- | ,, | १०९ |
| तत्रापि चेत्तथा······ | ,, | १८३ |
| तत्रापि चैत्रकार्यं | ,, | १८४ |
| तत्रापि पुरुषाधीनं | ,, | १३ |
| तत्रादि यदि धर्मास्स्युः | उ | १८२ |
| तत्राहुः पूर्वपक्षस्था- | पू | १७५ |
| तत्रेतरेतराभावो | ,, | १३५ |
| तत्सिद्ध्यनुगुणं | उ | १७३ |
| तत्स्वतः प्रत्यवायार्थं | ,, | १६७ |
| तथा गृहीतसम्बन्धः | पू | १० |
| तथा देशान्तराभावः | उ | १८५ |
| तथापि न प्रसज्येत | ,, | १८० |

तथापि च तथेत्येव ,, १८३
तथाभि (पि) व्यापितैव पू १८४
तथा यः कश्चिदेकस्य ,, ११
तथा लोकेन विज्ञाने ,, २७
तथा वारितमीशस्य उ १३
तथा सत्यप्रतीताद्··· पू १८४
तथा साधकता उ १७०
तथा हि देशा भिद्यन्ते ,, १८०
तद्‌तिक्रमणे तद्वत् ,, १६९
तदभावो न हेतुः ,, १६६
तदसिद्धौ न सिद्धयेयुः ,, १५३
तदस्वार्थस्तदंश ,, १७६
तदा केन प्रकारेण ,, १२
तदा देशान्तरे पू १८५
(तदा प्राप्तप्रमाणत्वं) उ १४
तदा हि कारणाभावात् ,, २१
तदुदाह्रियते तेषां ,, ५
तदेव चेत्प्रसज्येत ,, १८०
तद्धि तामेकधा··· ,, ३५
तद्धीर्वा केवलो वाथ पू १७६
तद्भिन्नदेशकालेषु ,, १८०
···तद्वतोऽपि भिद्यन्ते ,, १७९
तद्वाक्यात्स्वार्थभेदेषु उ १४
तद्विलक्षणबुद्धयैव पू १८५
तद्विशिष्टावबोधा··· उ १७६
तद्व्यापारः प्रसिद्धं हि ,, १७१
तन्नैरन्तर्यभानेन ,, ५७
तयोः परस्परं भेदो ,, १७९
तस्मात्तयो······ पू १८१
तस्मादभावस्सर्वत्र उ १८५
तस्माद् गुणेभ्यो दोषा पू ३६
तस्माद्भिन्नस्वरूपस्य ,, १८३
तस्माद् भूमौ घटो नास्ति पू १८०
तस्माद्विषयनिर्भासो उ २५
तस्मिन्संसर्गविज्ञानं ,, ६
तस्य तन्निरपेक्षस्य ,, ८४
तस्य भेदान्तरापेक्षे ,, १८३
तस्य येत्वन्यथाभावं पू १३
तस्य स्वरूपं भेदोऽपि उ १७९
तस्याभिसन्धिसम्पातः ,, १८०
तस्याः शक्त्यैव ,, १६१
तादात्म्यं हि विरुद्धं स्याद् ,, १७९
तादात्म्यं हि विरुद्धं स्यात्स्व ,, १८३
तावतो नातिरेकेण ,, ३७
तावेव खलु दृश्येते ,, १७
तेनाश्रयानपेक्षोऽयं ,, १८३
तेषां स्वातन्त्र्यमेष्टव्यं ,, १४
तौ चेन्मिथश्च साकाङ्क्षौ ,, ९२
तौ स्तः प्रागुत्तराभावा पू १८२
···त्प्रयोगार्थं उ १८०
···त्याद्यभेदो हि ,, १७९
दूषणत्वं यथा न पू १७०
देश एव तदर्थश्चे पू १७६
देशकालान्वितश्चार्थं उ १८१
देशः कालेन सम्भिन्न ,, १७८
देशकालौ तु यौ तत्र ,, १८०
देशकालौ हि सर्वेषां पू १७८
देशस्तत्रापि येनासौ पू १७६
देशान्तरं तदेवास्य उ १८१
देशान्तरादिकं ,, १८५
दे······[शान्तरे]ण सम्बन्धं ,, १७७
देशेऽपि ह्येवमेकत्र उ १८१
देहभेदोऽपि नैकस्य पू १२३
देहादिभ्यो विभिन्नत्व उ १०७

| | | |
|---|---|---|
| देहादिरपि किन्न स्यात् | ,, | ९७ |
| दोषश्च पूर्वपक्षोक्त | ,, | १८४ |
| दोषा हि प्रकृतिस्थानां | ,, | ३७ |
| द्रव्याणां···[नास्ति नि ] | पू | १८२ |
| द्रव्यं वा नास्तिता यत्र | उ | १८१ |
| धर्मान्तरं तदाश्रित्य | पू | १७८ |
| धर्मान्तरं···[स्वरूपं वा] | उ | १८२ |
| धर्मिण्य···[त्यन्तनिष्कृष्टे] | पू | १८२ |
| धियां स्वाभाविकं तेषां | ,, | २३ |
| न कश्चित्कल्पनीयो | उ | ८२ |
| न कालमात्रयुक्तस्य | ,, | १७८ |
| न केनापि प्रमाणेन | ,, | १४ |
| न खल्वेकत्र सद्भावे | पू | १८४ |
| न च केचिद् गुणा | ,, | ३७ |
| न च चेष्टान्तरत्वं | ,, | १० |
| न च तद्बाधका | उ | ३९ |
| न (स) च धर्मस्वरूपं | पू | १८५ |
| न च प्रयोजनाभावा | ,, | ५ |
| न च भिन्नत्वमात्रेण | ,, | १८३ |
| न च वेदोपयोगोऽपि | ,, | २१ |
| न च शब्दादृते क्वापि | उ | १२ |
| न च शब्दे गुणा | पू | ३७ |
| न च स्मृतिसमर्थत्व | ,, | १३ |
| न चाकृत्वैव सङ्केतं | उ | १२ |
| न चानपेक्षितः कर्ता | ,, | ११ |
| न चानपेक्षितः स्मर्तु | ,, | ११ |
| न चानुमानादिकस्य | पू | १५ |
| न चानुव्यवसायत्वे | ,, | ३५ |
| न चापरस्य धर्मस्य | ,, | १७८ |
| न चाव्यवस्थितो वाच्यः | उ | १७८ |
| न चास्मारकमादाय | पू | १३ |
| न चैवं प्रतिपद्यन्ते | उ | १८१ |
| न चैवमपि यः कश्चित् | पू | १७८ |
| ···नञ्रूपेण पूर्ववत् | उ | १८० |
| न तज्ज्ञानेन (ज्ञानेऽस्ति) सत्यत्व | ,, | १५ |
| न तावत्सर्वशब्देन | पू | ११ |
| न तु संसर्गमात्रेण | उ | ८ |
| ननु···काले व | उ | १८० |
| ननु जात्यदिनिर्मुक्तो | पू | १८० |
| ननु पालनभिन्नत्व | ,, | ११ |
| ननु रूपं रसाभाव | पू | १७९ |
| ननु सत्यमभाव | उ | १७५ |
| ननु संसर्गविज्ञाने | पू | ६ |
| न प्रमाणान्तर | ,, | १४ |
| न रूपिभ्यो रसो भेद | उ | १७९ |
| न विरोधः क्वचित्सिद्धयेत् | पू | १७९ |
| (न विप्रलम्भनादाप्तो) | उ | १४ |
| न व्यवस्थापनं शक्यं | पू | १७८ |
| न हि क्षणिकतन्मात्र | उ | १७७ |
| न हि तत्राप्तविज्ञानं | पू | १४ |
| न हि तन्मात्रता नास्ति | उ | १७६ |
| न हि पालनहीन | पू | ११ |
| न हि प्रत्यक्षतस्सिद्धयेत् | ,, | १८४ |
| न हि व्यापकमज्ञात्वा | उ | १८४ |
| न हि शौक्ल्यादिधर्माणां | ,, | १७८ |
| न हि स्वविषयत्वेन | पू | २५ |
| न ह्यभावं विहायान्यत् | ,, | १७८ |
| न ह्यभावेन तेनैव | उ | १८२ |
| न ह्यवान्तरजातिर्नो | ,, | ३६ |
| न ह्यस्ति सङ्ग्रहस्तस्य | ,, | १७९ |
| न ह्येकत्वैकदैवैक | पू | १८१ |
| नाना···[प्रात] | ,, | १८० |
| नासमर्थपदाख्यान | उ | १३ |
| नास्ति शब्दप्रयोगस्य | ,, | १७८ |

| | | |
|---|---|---|
| नास्तीति च प्रयोगस्स्यात् | ,, | १७६ |
| नित्यः क्रमविशेषोऽपि | ,, | १३ |
| नित्यं भिन्नाश्रयत्वे च | पू | १८३ |
| नित्यस्सप्रतियोगित्वा | उ | १७५ |
| नित्यानां परमाणूनां | ,, | १८१ |
| निरस्ते पुनरेतस्मिन् | ,, | ३८ |
| निर्णयन्ति यतीन्द्रोक्त | ,, | ६९ |
| निर्णयेत्तस्य सोऽभा···[व] | ,, | ३९ |
| ···[निर्णा]यकप्रमाणेन | पू | १८४ |
| निर्णीयमाने प्रामाण्ये | उ | २९ |
| निश्चयार्थं नरैर्मृग्यः | ,, | १४ |
| नैकैकश्येन शब्देषु | पू | ३ |
| नैतत्सप्रतिपक्षत्व | ,, | १८४ |
| नैतत्स्वरूपभेदोक्ता | ,, | १८३ |
| नैतदेवमभावेन | उ | १७८ |
| नैतदेवं ततो वाच्य | पू | १७६ |
| नैतद्देशान्तरे कार्यं | उ | १८४ |
| नैतावतापि दूरस्थ | पू | १८५ |
| नैरन्तर्येण शब्देन | ,, | ५८ |
| नैवं तथैव निर्देशात् | ,, | १८२ |
| नैवमद्याप्यसौ | ,, | १८३ |
| नैवं रसाद्यभावेन | उ | १७९ |
| नैष स्वात्मनि तत्कर्तुं | ,, | ७४ |
| नो चेत्कानियतो हेतुः | ,, | १६४ |
| पतञ्जलिमुखास्सन्तः | ,, | १२ |
| पदान्तार्थसमेतस्य | पू | १७६ |
| पश्चाद्विशेष्यमाणं सत् | उ | ७ |
| पाणी पादौ च नाहं | पू | १०८ |
| पारमार्थ्यं विनार्थस्य | ,, | ६० |
| पारम्पर्याद्धिष्ठाने | ,, | ९५ |
| पारम्पर्येण··· | उ | १५९ |
| पिण्डान्तरस्य भावेन | उ | १६६ |
| पुनः स्थापयितुं शक्तः | उ | ५ |
| पुंसां चेष्टा पुनर्व्यस्ता | ,, | ८ |
| पूर्वोत्तरतया धर्मौ | ,, | १८२ |
| पूर्वो···[त्तरौ तु यौ कालौ] | ,, | १८२ |
| पृथग्भावात्मना सिद्धौ | पू | १७५ |
| प्रकृतिप्रत्ययान्यत्व | उ | १३ |
| प्रकाशनियमं धत्ते | पू | ८२ |
| प्रकाशस्सर्वभावानां | ,, | ७४ |
| प्रकाशस्य तु सत्त्वैव | ,, | ७४ |
| प्रक्रियान्तरमाश्रित्य | उ | १२ |
| प्रतिबद्धक्रमेणैव | पू | १३ |
| प्रतिबन्धकसम्बन्धः | ,, | १६६ |
| प्रतियोगिकृतं तेषां··· | पू | १७९ |
| ···प्रति योगित्वं वादौ | ,, | १८१ |
| प्रतियोगिनि दृश्ये वा | उ | १७६ |
| प्रतियोगिन्यवच्छिन्ने | पू | १८० |
| प्रतियोगिविरुद्धश्चेत् | ,, | १७६ |
| प्रतियोगिव्यवस्थानां | उ | १८२ |
| प्रतिवाक्यं हि वक्तृणां | पू | १४ |
| प्रत्यक्त्वं ज्ञातुरेव | ,, | ११६ |
| प्रत्यक्षवस्त्वशक्त्यैव | ,, | १४ |
| प्रत्यक्षेण प्रतीतत्वा | उ | १८४ |
| प्रत्येकसमुदायादि | ,, | १८२ |
| प्रध्वंसादिरूपाधिश्चेत् | ,, | १७७ |
| प्रभावस्तस्य सङ्कोचो | ,, | १७४ |
| प्रमाणत्वं निवर्तेत | ,, | २७ |
| प्रमाणान्तरसंवादा | ,, | १३ |
| प्रमाणान्तरसिद्धेषु | पू | १४ |
| प्रागुक्तेनैव मार्गेण | उ | ५८ |
| प्राङ्गणादिषु देशेषु | ,, | १७८ |
| प्रातरेव घटं क्वापि | पू | १८१ |
| प्राधान्याद्देशकालाभ्यां | ,, | १८१ |

| | | |
|---|---|---|
| फलशब्दश्च नाज्ञात्वा | ,, | १२ |
| बोधकत्वं विना शब्दे | ,, | ८ |
| बोधकत्वविवक्षा हि | उ | ५ |
| बोधकेनानुपस्थाना | पू | ५ |
| भगवल्लक्ष्मणाचार्य | ,, | १७५ |
| भवतामपि यद्येषा | ,, | १०७ |
| भावभेदप्रयुक्ता तु | उ | ८ |
| भावभेदो निषेधार्थ | पू | १७५ |
| भावयन्ति क्वचित्तत्र | उ | १० |
| भावयोरेव किन्न स्या | ,, | १८४ |
| भावस्वरूपभेदेन | पू | १६९ |
| भावस्य पुनरस्त्येव | उ | १८३ |
| भावानामेव हेतुत्वं | पू | १६४ |
| भावान्तरमभावं तु | उ | १७५ |
| भावान्तरत्वमेतेन | पू | १८२ |
| भावो नायमभावो वा | उ | १८३ |
| भावोऽपि···नार्थो | पू | १७५ |
| भाषान्तरे पुनः कल्प्या | उ | १० |
| भिन्नप्रसरवेद्यानां | पू | १७६ |
| भिन्नस्य देशकालस्य | उ | १८१ |
| भिन्नाभिन्नत्वमन्योन्यं | उ | १३२ |
| भूतलव्यवहारस्य | ,, | १७६ |
| भूतलादौ घटो नास्ति | पू | १७७ |
| भेदः कश्चित्तदेवास्तु | उ | १७८ |
| भेदग्रहस्तथा | ,, | ५५ |
| भेदत्वेन विरोधश्चेत् | पू | १७९ |
| भेदमात्रेण सर्वत्र | ,, | १८२ |
| भेदाग्रहाद्व्यवहृति | उ | ५५ |
| भेदाग्रहावलिं प्राप्तिं | पू | ५५ |
| भेदाग्रहेण प्राप्नोति | उ | ५९ |
| भेदेष्वेकानुवृत्ता हि | पू | १५३ |
| भेदो धर्मस्वरूपं वा | ,, | १८० |
| मनसश्शक्तिमप्यत्र | उ | ८२ |
| महर्षयश्च धर्मिष्ठाः | पू | १२ |
| मा वा हानादिहेतुत्व | ,, | ६ |
| ···मुद्दिश्य यस्याभाव | ,, | १७९ |
| (मूलशब्दमविज्ञाय) | ,, | १२ |
| यच्च बोधनमेवादौ | ,, | ७ |
| यज्जातिव्यञ्जका धर्माः | ,, | २३ |
| यतस्सप्रतियोगित्व | उ | १७५ |
| यतस्सर्वत्र चैकस्सन् | उ | १७७ |
| यतो रजतवैधर्म्या | पू | ५७ |
| यत्तु युक्तं विशिष्टार्थं | उ | १७६ |
| यत्नश्च यतमानस्य | पू | ९७ |
| यथा कारणवैकल्यं | ,, | १७१ |
| यथा घटादिभावानां | उ | ७४ |
| यथान्यः पुरुषः कर्ता | पू | १३ |
| यथायथं प्रयुञ्जाना | उ | १४ |
| यथा सच्छिद्रके | पू | २७ |
| यदा कार्यत्वविज्ञानं | ,, | २१ |
| यदा तु नास्तिशब्दानां | उ | १७८ |
| यदा तु सर्व एवायं | पू | १२ |
| यदा प्राप्तप्रमाणत्व | उ | १४ |
| यदा यत्प्रतियोगि स्या | ,, | १७७ |
| यदार्थभावो भेदस्स्यात् | ,, | १८५ |
| यदि जाग्रद्धिया | ,, | ६६ |
| यदि नास्तीति शब्दस्य | ,, | १७७ |
| यदि यत्नेन साहित्यात् | पू | ९७ |
| यदि स्वाभाविकं | ,, | ३० |
| यद्धर्मस्या (यस्य धर्मो) पृथक् | ,, | ८४ |
| यद्यन्वितं भवेत्तच्चेत् | ,, | १८१ |
| यद्यभावाविनाभूत | उ | १८४ |
| यः पुनर्मानसाध्यक्ष | पू | ८२ |
| यया बुद्ध्या प्रकाश्यन्ते | उ | ५९ |

| | | |
|---|---|---|
| यस्तु स्वरूपमित्येव | उ | १८२ |
| यस्मादेको घटाभावो | ,, | १७९ |
| यस्माद्भावेष्वभावस्य | उ | १८३ |
| यस्मै प्रकाशते | ,, | ११६ |
| (यस्य धर्मोऽपृथक्सिद्धः) | पू | ८४ |
| यस्य ह्युपाधिशब्दे··· | पू | ८ |
| याथात्म्यमिति विज्ञेय | उ | १३ |
| (याथार्थ्यमिति) | ,, | १३ |
| यावच्छक्ति विचिन्त्यैव | पू | ३९ |
| (युक्तं यत्तद्धि) | उ | १७६ |
| येन केनापि योगेन | उ | १३ |
| येषां शब्दस्य मानत्वं | पू | १४ |
| येषां स्मृतिप्रवाहेण | ,, | ११ |
| योग्यता सर्वभावानां | पू | १४५ |
| योग्यस्यानुपलब्ध्या च | उ | ३९ |
| योग्यापि नेष्यते सृष्टिः | ,, | ११ |
| (योग्योऽपि नेष्यते) | उ | ११ |
| वक्तृभावे भवेद्दोषो | ,, | २२ |
| वदतामेव यद्बुद्धौ | ,, | १७६ |
| वध्यघातकसम्बन्धे | पू | १६६ |
| वर्णानां शक्तियुक्तानां | ,, | १३ |
| वस्तुगोचरता सैव | ,, | २६ |
| वस्तुभेदस्य तस्यैव | उ | ५६ |
| वाचकत्वभ्रमश्चापि | पू | १३ |
| वाचकत्वभ्रमेणैवं | उ | १३ |
| वाचकप्रत्ययश्चात्र | ,, | ६ |
| वाच्यवाचकसम्बन्धः | पू | ७ |
| वादिनां विमतेर्भावात् | ,, | ४४ |
| विचित्रकर्मकर्तॄणां | ,, | ९६ |
| विज्ञानस्यानपेक्षत्वं | ,, | ८२ |
| विधिगम्यस्य भावस्य | ,, | १७५ |
| विप्रलम्भादनाप्तत्वे | उ | १४ |
| विभूनां सर्वदेशेषु | उ | १७७ |
| विरम्य···ति शब्दे | पू | १७६ |
| विरुद्धधर्मसम्बन्धो | उ | १४७ |
| विरुद्धप्रतियोगि·· | पू | १७७ |
| विरोधा यदि सर्वे | उ | १८३ |
| विरोधोऽर्थप्रयुक्तो | ,, | १७६ |
| विवक्षातः प्रतिद्वन्द्वि | ,, | १७७ |
| विशिष्टत्वं कथं | ,, | १३३ |
| विशिष्टत्वादुपाधेश्च | ,, | १७५ |
| विशिष्टव्यवहारस्य | पू | १७६ |
| विशेषणविशेष्यत्वे | ,, | १३३ |
| विषयत्वेन सिद्धस्य | ,, | ८१ |
| विषयस्मरणं साक्षात् | ,, | ८१ |
| विषयीकुरुते सेयं | उ | १८० |
| विसंवादोऽपि भूयिष्ठो | पू | १४ |
| वृक्षत्वव्यञ्जना | ,, | २९ |
| वेदप्रामाण्यसिद्ध्यर्थं | ,, | १७ |
| वैजात्यादुपपत्ति | उ | १०२ |
| वैधर्म्याग्रहमात्रेण | पू | ५८ |
| व्यवहारविरोधेन | ,, | ५५ |
| व्यवहारादिसंवाद | उ | ८१ |
| व्यापकस्यानुमानाच्चेत् | पू | १८४ |
| व्यापारस्सर्व एव | उ | ९७ |
| व्यापिनामप्यनित्यानां | पू | १८२ |
| व्याप्यत्वपक्षधर्मत्व | उ | १० |
| व्युत्पत्तिरपि तत्रास्ति | ,, | ३ |
| व्युत्पत्तिव्यवहाराणां | पू | १७८ |
| शक्तानामेव भावानां | ,, | १६१ |
| शक्तिर्ह्यतीन्द्रियं रूपं | ,, | १७३ |
| शब्दः खलु विशिष्टार्थम् | ,, | १० |
| शब्दमात्रस्य नार्थेन | उ | १७६ |
| शब्दाभावेन साहित्या | पू | १७७ |

| | | |
|---|---|---|
| शब्दार्थव्यवहारश्च | पू | १२ |
| शरीरमेव चेदात्मा | ,, | ११५ |
| शास्त्रप्रामाण्यसिद्ध्यर्थं | उ | ८७ |
| श्रुतिरेवैकविज्ञाना | पू | १४३ |
| श्रुतेस्तु शब्दमूलत्वा- | ,, | १५० |
| स एव जायते पश्चात् | उ | १७३ |
| स एव देशभेदस्तु | पू | १७८ |
| सङ्केतमात्रसिद्धैव | ,, | १० |
| सङ्केतसिद्धकार्यार्थाः | उ | ९ |
| स च यत्नः क्वचिद् दृष्टः | पू | ९२ |
| स च सम्बन्धसन्दर्भे | उ | १४ |
| स च स्मारकम- | उ | १५६ |
| स च स्वेनैव चेन्न | उ | ८२ |
| स चा···[समु]दापि | पू | १८० |
| सत्कार्यवादं | उ | १४३ |
| सत्ताघटत्वयोर्भेदो | पू | ७४ |
| सत्यमेवं तथाप्यत्र | उ | १८१ |
| सद्भावे तदविज्ञातुः | ,, | १२ |
| सन्दर्भे वानपेक्षायां | ,, | १२ |
| समीपदे शवच्चैलो | उ | १८४ |
| सम्बन्धान्तरसापेक्षं | ,, | ७ |
| सम्बन्धे तद्....(नित्यत्वा-) | पू | १२ |
| संवादादिसहस्रै- | ,, | २९ |
| संवेद्यं स्वप्रकाशं | ,, | ११६ |
| संशयोऽपि हि संस्कारे | ,, | ८१ |
| संसर्गाभावसिद्धिस्तु | ,, | १८५ |
| संस्कारोन्मेषसिद्ध्यर्थं | उ | ११३ |
| संस्थानैकस्वभावानां | पू | १७६ |
| संहृत्यैव प्रमाणत्वं | ,, | ८ |
| सरसं विरसं··· | ,, | १७९ |
| सर्वस्मिन्नित्यशास्त्रार्थे | पू | १६७ |
| सर्वेषां सर्वदा चैव | उ | ५६ |
| सर्वोऽर्थश्चेतनैर्ज्ञातो | पू | ५८ |
| स हि शक्त्यनुसारेण | ,, | १३ |
| साक्षात्सम्बन्धिसंस्थानं | ,, | १५९ |
| सामग्रीव्यापकं कार्यम् | ,, | १६१ |
| सामान्येनाहृता यस्य | ,, | १४ |
| सा समष्टिस्मृतीनां | ,, | ५९ |
| साहित्यदृष्टिमालोक्य | ,, | ६ |
| सिद्धान्तान्तरनिष्ठेषु | उ | ७ |
| सिद्धे वेदान्तवाक्यानां | पू | ३ |
| सिद्धोपकरणैः कुम्भो | ,, | १७३ |
| सोऽपीति प्रतिपत्तिस्स्या- | उ | १५६ |
| सौभरिप्रतिसन्धान | ,, | १२३ |
| स्मृत्याकारं तु यज्ज्ञानं | पू | ५ |
| स्मृत्याधायकमात्रस्य | पू | १२ |
| स्यादेवं यदि तत्पूर्वं | ,, | ९ |
| स्वतः प्रामाण्यमेष्टव्यं | ,, | १५ |
| स्वप्रकाशे ह्य- | उ | ११६ |
| स्वरूपभेदोऽप्यत्रास्ति | पू | १८२ |
| स्वरूपस्याप्यभावत्वं | ,, | १८३ |
| स्वात्मनैव स्वभिन्नत्वे | उ | १८३ |
| स्वा(स्व)प्ने ज्ञानेन तत्कार्य- | पू | ६६ |
| स्वाभाविकत्वमुभयो- | ,, | १७ |
| स्वारस्याच्चान्यथाख्यातिः | उ | ४४ |
| स्वार्थग्रहणसिद्ध्यर्थम् | उ | ७ |
| हेतुत्वेन न गण्यन्ते | ,, | ७७ |
| ह्रस्वमित्यत्र यत्पूर्वं | पू | १८० |

## B: INDEX OF KĀRIKĀS IN KAIVALYAVICĀRA


| | | |
|---|---|---|
| अतो भेदोपचारेण | उ | १९८ |
| अथवान्तर्गतज्ञाने | ,, | १९६ |
| अथवा सर्वथा मोक्षः | ,, | १९७ |
| अधिकारव्यवस्थार्थं | ,, | १९८ |
| अनिष्टान्तरहेतुत्वे | ,, | १९५ |
| अन्ये तु कर्मयोगेन | ,, | १९६ |
| अव्यक्तोऽक्षर इत्युक्त- | पू | १९७ |
| आकारभेदवाच्यत्व- | ,, | १९७ |
| आजानसिद्धविज्ञान | उ | १९७ |
| आत्मावलोकनादर्वाक् | पू | १९७ |
| आत्मावलोकने यत्नं | उ | १९५ |
| आनुकूल्यतिरोधान | पू | १९७ |
| इत्यादिषु स्मर्यमाण | ,, | १९७ |
| उभयोरविशेषेण | उ | १९७ |
| कथञ्चापारकरुणा | ,, | १९७ |
| कान्ते कमलवासिन्याः | ,, | १९७ |
| केचिदादौ प्रवर्तन्ते | पू | १९६ |
| केवलोपायताबुद्धि- | ,, | १९८ |
| गतिश्रुतानुभूतिस्तु | ,, | १९६ |
| ज्ञानयोगः कर्मयोगः | ,, | १९६ |
| ज्ञानयोगेऽधिकुरुते | ,, | १९६ |
| तत्प्राप्त्युपायं तद्भक्ति | उ | १९५ |
| तथा शास्त्रेण विज्ञातं | ,, | १९७ |
| तथैव चाभिलक्ष्येत | पू | १९७ |
| तदा तत्किङ्करस्वात्म- | ,, | १९८ |
| तदेवं भगवत्प्राप्तिः | पू | १९७ |
| तद्य इत्थं विदुरिति | उ | १९६ |
| तावज्जीवात्मनिष्ठायाः | पू | १९८ |
| तिरोहितेशानुकूल्य | पू | १९६ |
| तेनैव चापराधेन | उ | १९६ |
| इष्टानुकूलमात्मान- | ,, | १९६ |
| न तथा फलभेदार्थी | ,, | १९८ |
| नियमोपेतयोगेन | ,, | १९६ |
| पश्यन्त्यात्मानमित्येव | पू | १९६ |
| प्रकृत्यादिविवेकात्म | उ | १९६ |
| प्रत्यगात्मस्वरूपं हि | पू | १९७ |
| ब्रह्मानन्दानुभवं | उ | १९६ |
| भक्तिविज्ञाननिष्ठाभ्यां | पू | १९८ |
| भक्त्यर्थं यतमानं तु | ,, | १९७ |
| भोग्यभूतपरात्मान- | ,, | १९६ |
| यथा फलैकताशब्दो | ,, | १९८ |
| यदा च सा तदा प्रीतिः | उ | १९७ |
| यदा परस्मिन्भोग्यत्वं | ,, | १९८ |
| यः पुण्यपरिपाकेन | ,, | १९६ |
| यं प्राप्य न निवर्तन्ते | ,, | १९७ |
| यस्य प्रीतिरसञ्जाता | पू | १९५ |
| यावद् भोग्यत्वसम्बन्धः | उ | १९८ |
| लोकसङ्ग्रहसौकर्य- | पू | १९६ |
| विशेषणानुकूल्यञ्च | उ | १९७ |
| विहन्ति प्रत्युतैतस्या | पू | १९७ |
| श्रुतश्छन्दोगशाखायां | उ | १९७ |
| सत्त्वोद्रेकाद्वशीकृत्य | पू | १९६ |
| संसारे दुःखितो जन्तुः | ,, | १९५ |
| सर्वत्र चास्ति तत्प्रेम | ,, | १९५ |
| सा यस्य देवदेवे | उ | १९५ |

## C: INDEX OF KĀRIKĀS QUOTED


| | | |
|---|---|---|
| अग्न्यादयो घटादीनां | पू | ७५ |
| अज्ञो जन्तुरनीशोऽयं | „ | ११८ |
| ईश्वरप्रेरितो गच्छेत् | उ | ११८ |
| ईश्वरस्सर्वभूतानां | पू | ११८ |
| कथं सर्गादिकर्तृत्वं | उ | १०२ |
| क्षिपाम्यजस्रमसुरा- | उ | ११८ |
| चतुर्विधा भजन्ते मां | „ | १९६ |
| जन्मान्तरसहस्रेषु | पू | १९५ |
| जातेऽपि यदि विज्ञाने | | ३३ |
| तया तिरोहितत्वा- | उ | ७५ |
| तस्माद्बोधात्मकत्वेन | | ३० |
| तानहं द्विषतः क्रूरान् | पू | ११८ |
| तेन यत्र प्रयुक्तोऽयं | उ | १७० |
| तेषां सततयुक्तानां | पू | ११८ |
| ददामि बुद्धियोगं तं | उ | ११८ |
| न ते प्रकाश्यरूपा हि | „ | ७५ |
| नराणां क्षीणपापानां | „ | १९५ |
| न सर्वलोकसिद्धस्य | उ | १७० |
| निर्गुणस्याप्रमेयस्य | पू | १०२ |
| निस्स्वभावत्वमेवं हि | | २८ |
| भवन्ति तपतां श्रेष्ठ | | १०२ |
| भागो जीवस्स विज्ञेय | उ | ७४ |
| भ्रामयन्सर्वभूतानि | „ | ११८ |
| यतोऽतो ब्रह्मणस्तास्तु | „ | १०२ |
| यया क्षेत्रज्ञशक्ति- | पू | ७५ |
| या प्रीतिरविवेकानां | „ | १९५ |
| योगिनामपि सर्वेषां | पू | १९६ |
| वालाग्रशतभागस्य | „ | ७४ |
| वृद्धप्रयोगगम्याश्च | „ | १७० |
| शक्तयस्सर्वभावानां | „ | १०२ |
| सजातीयस्वसाध्यार्थं | „ | ७५ |
| सर्वभूतेषु भूपाल | „ | ७५ |
| सर्वे पदार्थास्तेनात्मा | उ | ७५ |
| सिद्धानुगममात्रं हि | पू | १७० |


## D: INDEX OF BOOKS MENTIONED


| | |
|---|---|
| आत्मसिद्धिः—यामुनार्याः | ७५ |
| कठोपनिषत् | १९३ |
| कुसुमाञ्जलिः—उदयनार्यः | ९३, १६३ |
| कौषीतकी | ११८ |
| छान्दोग्योपनिषत् | १४३, १९४ |
| तैत्तरीय | ८४, ११८, १८५ |
| न्यायसूत्राणि—गौतमः | ६३, ९३, १८८ |
| पूर्वमीमांसा—जैमिनिः | १०३, १५०, १४१ |
| बृहदारण्यकम् | १४३, १९०, १९२ |
| ब्रह्मसूत्राणि—व्यासः | ८८, ६६, १८७ |
| भगवद्गीता— „ | ११७, ११८, १२२, १९१, १९२, १९३, १९४ |
| मुण्डकोपनिषत् | १२२ |
| विष्णुपुराणम्—पराशरः | ७५, १०२, १६०, |
| श्रीभाष्यम्—श्रीभगवद्रामानुजार्याः | ८९, ११७, १४०, १४३, १५८, १९३ |
| श्लोकवार्तिकम्—कुमारिलः, | २८, ३०, ३३, ७५, ९५, १७० |
| श्वेताश्वतरोपनिषत् | ७४, ७५, ११८, १२२ |

## E: INDEX OF AUTHORS REFERRED TO


कुमारिलः (मीमांसाचार्यः) ९५, १७०

न्यायविदः २३

न्यायाचार्याः ६३

पतञ्जलिः १२

पराशरः १०२, ४०

बोधायनः ३८

वेदव्यासः ४०

श्रीभाष्यकारः ३८, ७७, ८९, ११७, १४०, १४३

(ब्रह्म) सूत्रकाराः ६६

# NĪTIMĀLĀ

By

NĀRĀYANĀRYA

*Edited with Introduction and Notes*

By

R. RAMANUJACHARI

AND

K. SRINIVASACHARI

नैतद्युक्तम् ; ब्रह्मणो भ्रमाधिष्ठानत्वानुपपत्तेः । शुक्तिकादावधिष्ठाने केनचिद्-भास्वरत्वाकारेण प्रतिपन्ने शुक्तित्वाद्याकारेण तिरोहिते सति हि रजतादिभ्रमो दृष्टः । ब्रह्म तु निर्विशेषतया निराकारं स्वयम्प्रकाशञ्च । अतोऽधिष्ठानभूतस्य प्रतिपन्नत्वादप्रति-पन्नाकारांशासम्भवाच्च न तस्मिन् जगदध्यासः सम्भवति । अध्यासहेतुभूताया अविद्याया असम्भवश्च पूर्वमेवोक्तः ।

यदुक्तं शुक्तिकायां दोषवशात्सदसद्विलक्षणं रजतमुत्पन्नमवभासत इति ; तदपि साहसम् ; सदसद्विलक्षणस्यानुपपत्तेः । एकस्य हि वस्तुनः सद्वैलक्षण्यमसद्वैलक्षण्यञ्च विरुद्धत्वान्न सम्भवति ।

निष्प्रमाणकं चैतत् सदसदनिर्वचनीयत्वम् । यत् ख्यातिबाधान्यथानुपपत्तिः प्रमा-णमित्युक्तम् ; तदपि न ; ख्यातिबाधयोरन्यस्यान्यथाभानादेवोपपत्तेः । दृश्यते हि सम्य-ग्रजतवदिदं रजतमिति पुरोवर्तिनो रजतात्मकत्वम् ।

ननु कथं रजतेऽवभासमाने तज्ज्ञानस्य शुक्तिका विषयो भवति ? न भासमानत्वं विषयत्वम् । किन्तर्हि ? तत्संप्रयुक्तचक्षुरिन्द्रिय(यज ?) ज्ञानव्यावर्त्यत्वम् । कथं तर्हि इन्द्रिय-सम्बन्धरहितस्य रजतस्य भानं सम्भवति । भवत्पक्षे वा कथमिन्द्रियसम्बन्धरहितस्यानिर्वच-नीयरजतस्यावभासः ? दोषवशादिति चेत्, समानमेतदस्माकमपि । अत एव हि तस्य भ्रम-त्वम् । तस्मादेवान्यथाभानान्नेदं रजतमिति प्रसक्तताद्रूप्याकारबाधोऽप्युपपन्नः ।

किञ्च रजतार्थिनः पुरोवर्तिनि प्रवृत्तेरन्यथाख्यातिरेवाङ्गीकरणीया । यदि शुक्तिकैव रजतात्मना नावभासते, किमिति रजतार्थी तत्र प्रवर्तते ? त्वयाप्यनिर्वचनीयरजतस्य सम्यग्रजततयावभासादेव प्रतीति (प्रवृत्ति ?) र्भवतीति वक्तव्यमित्यन्यथाख्यातिरङ्गीकरणीया ।

किञ्च शुक्तिकायामनिर्वचनीयं वस्तु किञ्चिज्जातमिति वदता तस्य रजतबुद्धिशब्द-योर्निबन्धनं वक्तव्यम् । यदि रजतत्वादिजातियोगः, सा किमनिर्वचनीया ? अनिर्व-चनीया चेत्, सम्यग्रजतेषु रजतत्वबुद्धिशब्दौ न स्याताम् । सत्या चेदनिर्वचनीयवस्तुनि न स्याताम् । तस्मात्सदसद्विलक्षणस्य वस्तुनोऽसम्भवान्निर्विशेषस्य ब्रह्मणो जगद्भ्रमाधिष्ठा-नत्वासम्भवाच्च ब्रह्म जगद्रूपेण विवर्तमानं जगदुपादानं भवतीति नैतदुपपत्तिमत् ॥

इति नीतिमालायां विवर्तपक्षप्रतिक्षेपाधिकारस्तृतीयः ।

श्रीः

# नीतिमालायां

## चतुर्थोधिकार आरभ्यते.

अपर आहुः—

सम्भृ(संहृ ?)तौ ब्रह्म निर्भेदं सर्वशक्तिसमन्वितम् ।
भोक्तृभोग्यादिरूपेण सर्गे परिणतं भवेत् ॥

मृदादिपरिणामत्वं घटादेरिव दृश्यते ।
तथा सत्येव वेदान्तवाक्यं सर्वं समञ्जसम् ॥

'सदेव सौम्येदमग्र आसीत्' 'एकमेवाद्वितीयं ब्रह्म' इत्यादिभिः प्रतिसर्गावस्थायां प्रलीननिखिलविकल्पं सन्मात्रं ब्रह्मावगतम्। तत्सर्वशक्तितया सर्गसमये विचित्रचिदचिन्मिश्रप्रपञ्चरूपेण परिणतमिति 'तदैक्षत बहु स्यां प्रजायेय' इत्यादिभिर्वाक्यैरवगतम्। तस्माद्ब्रह्मपरिणामतया ब्रह्ममयं जगत् ।

ननु जगतो ब्रह्मकार्यत्वाभ्युपगमे तेन तदन्येन भवितव्यम्। तथाहि—कार्यकारणयो रूपभेदो नामभेदोऽपि दृश्यते। तथा उदकाहरणकुड्यनिर्माणादिव्यवहारभेदश्च दृश्यते । तस्मात्कारणभूतादन्यत्कार्यं भवितुमर्हति। अपि च कारणादनन्यत्कार्यं चेत्, कारकव्यापारवैयर्थ्यञ्च स्यात्। एवं कारणात्कार्यस्यान्यत्त्वाज्जगतो ब्रह्मपरिणामत्वं नोपपद्यते ॥

उच्यते। कारणात्कार्यमनन्यत्; मृदयं घट इति प्रत्यभिज्ञानात्, संस्थानविशेषभाजो मृद्द्रव्यादृते द्रव्यान्तरानुपलब्धेश्च। रूपभेदादयः संस्थानान्तरयोगादेवोपपद्यन्ते। पृथुबुध्नोदराद्याकारस्य कुलालादिव्यापारभावभावित्वात्कारकव्यापारस्यार्थवत्त्वम्। तस्मात्कारणादनन्य-

त्कार्यमिति ब्रह्मणोऽनन्यज्जगत्। एवं जगतो ब्रह्मपरिणामत्वाभ्युपगमे सत्येव 'सदेव सौम्येदमग्र आसीत्' 'एकमेवाद्वितीयं ब्रह्म' 'सर्वं खल्विदं ब्रह्म' 'आत्मैवेदं सर्वं' इत्यादीनामद्वैतपराणां 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'पतिं विश्वस्य' इत्यादिद्वैतपराणां च वेदान्तवाक्यानां सामञ्जस्यं भवति। 'यथा अग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति, एवमेवात्मनस्सर्वाणि भूतानि व्युच्चरन्ति। तेभ्यो भूतेभ्यस्समुत्थाय तान्येवानु विनश्यति' 'अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति'

'तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम।
अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये सम्प्रलीयते ॥'

इत्यादीनि प्रकृतिपुरुषोत्पत्तिप्रळयवादीनि श्रौतानि स्मार्तानि वाक्यानि समञ्जसानि भवन्ति। तस्मान्निरस्तसमस्तविषयस्य ब्रह्मणः परिणामभूतं जगदिति।

अत्रोच्यते—

ब्रह्मणोऽपरिणामित्वश्रुतेश्चानुपपत्तितः।
जीवस्य नित्यतायाश्च कृतनाशादिदोषतः ॥

मोक्षसाधनवैयर्थ्यान्मुक्तेरत्यर्थहानितः।
ब्रह्मणः परिणामित्ववादोऽयं नोपपद्यते ॥

ब्रह्म जगद्रूपेण परिणमत इति वदन्तः किमीश्वरादि(द्भि?)भिन्नं ब्रह्म वदन्ति? उत तमेव? तत्र प्रथमः कल्पो न सम्भवतीत्युपरितनाधिकारे वक्ष्यते। द्वितीयः कल्पोऽप्यनुपपन्नः; 'अस्थूलमनण्वह्रस्वम्' इत्याद्यनेकश्रुतिभिस्तस्यापरिणामित्वावगमात्। अनुपपत्तेश्च; न हि चिद्रूप एवेश्वरोऽचिद्रूपेण परिणमत इति सम्भवति ॥

अथ ईश्वरे उपादानत्वं सर्वात्मकत्वं च सर्वोपनिषत्प्रसिद्धम्। अतस्तस्य जगदाकारेण परिणामोऽङ्गीकरणीयः। अपरिणामित्वश्रुतिरन्यथा नेया। उपादानत्वसर्वात्मकत्वश्रुतेरेव जगतश्चैतन्यशक्तियोगोऽस्तीत्यवगम्यते। तस्याचित्त्वव्यपदेशश्चैतन्यस्य नित्यतिरोहिततया

वेदितव्य इति मतम्; तदप्ययुक्तम्; सर्ववस्तुविरोधात्। अपरिणामित्वश्रुतेरनन्यथासिद्धत्वाच्च। यदुक्तं जगतश्चैतन्यशक्तिरस्तीति न विरोध इति; तन्न; चैतन्यस्य नित्यानुपलब्धेस्तच्छक्तेरसद्भावस्यैव[१] निर्णीतत्वात्। तस्योपादानत्वं सर्वात्मकत्वञ्चापरिणामित्वाविरुद्धमिति ब्रह्मस्वरूपाधिकारे वक्ष्यते।

अथ स्यात्—उपाधिशक्तियुक्तं ब्रह्म। अतो जगत्परिणाम उपपन्नः। उपादानत्वसर्वात्मकत्वोपदेशोऽप्युपपन्न इति। तत्र वक्तव्यम्—उपाधिशक्तिरिति कोऽर्थः? किं सूक्ष्मरूपमुपाधिद्रव्यम्? किं वोपादानरूपेण ब्रह्मणः परिणामसामर्थ्यम्? प्रथमे कल्पे द्रव्यद्वयाङ्गीकारात्सन्मात्रमद्वितीयं ब्रह्मेति विरुद्ध्यते। उत्तरस्मिन्पूर्वोक्तदोषानतिवृत्तिः। अथ मतं उपाधिद्रव्यं ब्रह्मणो भिन्नमभिन्नञ्च भवति। तस्मादनैकान्त्यादुभयपक्षोक्तदोषाः परिहृता भवन्तीति; तदनुपपन्नम्; भेदाभेदयोर्विरुद्धस्वभावत्वेनैकस्मिन्वस्तुन्यसम्भवात्।

अथोच्येत सर्वं वस्तु प्रतीत्यैव व्यवस्थाप्यम्। सर्वं च कारणात्मना जात्यात्मना चाभिन्नम्। कार्यात्मना व्यक्त्यात्मना च भिन्नं प्रतीयते; मृदयं घटः, खण्डो मुण्डो गौरिति। न चानयोर्विरोधः। सहानवस्थानभिन्नाधारत्वयोरभावात्। अभेदशब्दावयवस्य ............ ...(?)त्वाभिधायित्वाच्च। तस्मात्कस्यचिदपि वस्तुनः भिन्नत्वमभिन्नत्वञ्च नैकान्तिकमिति; तदप्ययुक्तम्; एकस्मिन्विलक्षणत्वतद्विपरीतयोरसम्भवात्। आकारभेदादविरोधं वदन् यदि कारणजात्याकारयोरभेदाश्रयत्वं कार्यव्यक्त्योर्भेदाश्रयत्वञ्च वदति, तदा नैकस्य द्व्यात्मकत्वसिद्धिः। अथ कार्यकारणयोर्जातिव्यक्त्योश्चैकत्वादेकस्य द्व्यात्मकता सिद्ध्येत्, तथा सत्याकारभेदादविरोधो न सिद्ध्येत्। जातिव्यक्त्योरेकत्वं चानुपपन्नम्; अनुवर्तमानव्यावर्तमानाकारतया तयोर्विरुद्धस्वभावत्वात्।

स्यादेतत्। अयं गौरिति तादात्म्यप्रतीतेस्तयोरैक्यं प्रतीयते। न चानुवृत्तिव्यावृत्तिप्रतीतिः। तत्कथमनयोर्विरुद्धस्वभावत्वम्? इति। तत्र वक्तव्यम्—किं तादात्म्यमिति? न तावत्सम्बन्धविशेषः। तस्य सम्बन्धिद्वयाधारत्वेनैकत्वासिद्धेः। नाप्यैक्यम्; अनुपलब्धेः। तथा

१. नित्यानुपलब्धेस्तदभावस्यैव—पा०.

सत्ययं गौरित्येकस्य द्विरवभासः स्यात्। न च तद्युक्तम्; न ह्ययमिति वा गौरिति वा अवभासः। किन्तु अयं गौरिति तयोर्विशेषणविशेष्यतया ह्यवभासः। किञ्च व्यक्त्यन्तरे जातिप्रत्यभिज्ञया जातेरनुवर्तमानत्वं व्यक्तेर्व्यावर्तमानत्वञ्च प्रतीयत इति तयोर्विरुद्धस्वभावत्वम्। तस्माज्जातिव्यक्त्योरेकत्वनिबन्धनमेकस्य द्व्यात्मकत्वं न सिद्ध्यति।

यदुच्यते आकारद्वययोगिवस्त्वाश्रयत्वाद्भेदाभेदयोरेकस्य द्व्यात्मकता सिद्ध्यतीति; तदपि न सिद्ध्येत्; भेदाभेदनिर्वाहकाकारद्वयातिरिक्ततदाश्रयवस्तुसद्भावे प्रमाणाभावात्।

यदुच्यते—खण्डस्य मुण्डाद्व्यावृत्तिरूपं खण्डत्वं मुण्डात्खण्डस्य भेदः, अनुवृत्तिरूपं गोत्वमभेद इत्येकस्य भिन्नाभिन्नत्वमविरुद्धमिति। तदप्यचारु; गोत्वस्यानुवृत्तिरूपत्वाभावात्। खण्डो गौर्मुण्डो गौरिति खण्डमुण्डयोरनुवर्तमानतया हि गोत्वमवभासते। न त्वनुवृत्तिरूपतया। गोत्वस्यानुवृत्तिरूपत्वे तद्वत्तया खण्डमुण्डव्यक्त्योरनुवृत्तत्वमभ्युपेतव्यम्। अनुवृत्तिर्हि कस्यचित्केषुचिद्भवति। न हि खण्डवृ(व्य ?)त्तिर्मुण्डव्यक्त्यनुवृत्ता भवति। मुण्डवृ (व्य ?) त्तिः खण्डव्यक्त्यनुवृत्ता वा। गोत्वं ह्युभयोरनुवर्तते। तथानुवृत्तिव्यावृत्त्योर्भिन्नाश्रयत्वान्नैकस्य द्व्यात्मकता।

अथ खण्डताद्यपरसामान्यं भेदः; गोत्वादिपरसामान्यमभेदः। उभयोरेकनिष्ठत्वेन भिन्नाभिन्नत्वं सम्भवतीति। तदप्यसाधु; भेदाभेदशब्दयोः पारिभाषिकत्वप्रसङ्गात्। अस्त्विति चेत्, नास्माकमपि काचित्क्षतिः। कस्यचित्कस्माच्चिद्वैलक्षण्यं भवति। तद्विपरीतं च न भवतीत्येतदेव भिन्नाभिन्नप्रतिपाद्यम्। तस्मादुपाधिब्रह्मणोर्भेदाभेदासम्भवादुक्तदोषोऽवसीयते।

यच्चोक्तं प्रकृतिपुरुषयोरागन्तुकत्वादुपसंहारभेदवेळायां तयोर्विनाश इति; तदप्यनुपपन्नम्। 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' 'गौरनाद्यन्तवती' 'अविनाशी वा अरे अयमात्मा' 'नित्यो नित्यानां चेतनश्चेतनानाम्' इत्यादिभिस्तयोरजत्वाविनाशित्वनित्यत्वश्रवणात्तयोरुत्पत्तिप्रळयवादीनि पूर्वोक्तानि वचनानि ब्रह्मणो विभागप्रतिपादनपराणि वेदित-

व्यानि। अत एव 'तम एकीभवति' इत्येकभावमात्रमुच्यते। न तु लयः। स्मर्यते च तयोर्ब्रह्मणो विभागः। 'विष्णोस्सकाशात्परतोदिते द्वे रूपे प्रधानं पुरुषश्च विप्र' इति। दिते खण्डिते इत्यर्थः।

किञ्च जीवानामनित्यत्वे कृतनाशाकृताभ्यागमदोषौ प्रसज्येयाताम्। पूर्वकल्पावसानेऽपि नष्टैर्जीवैः प्रागनुष्ठितानामभुक्तफलानां कर्मणां निष्फलत्वादुत्तरकल्पादावुत्पद्यमानानामसत्स्वपि कर्मसु तत्फलभूतदेहेन्द्रियादिपरिग्रहाच्च। अपि च तेषामनित्यत्वे मोक्षसाधनभूतोपासनविधयश्च निष्फलाः स्युः। आत्मनाशस्य निःश्रेयसत्वात्तत्साधनभूतोपासनविध्यानर्थक्यं न भवतीति न वाच्यम्; प्रतिसंहारवेळायामात्मनाशरूपनिःश्रेयससिद्धेरवर्जनीयत्वात्॥

अथ उपासनविधयस्त्वरमाणविषया इति चेत्, तन्न; त्वराया असम्भवात्। यद्युपासकाः स्वनाशो मोक्ष इत्यवसेयुः, तदा मोक्षकथामपि परिहरेयुः। तस्मादुपासनविध्यानर्थक्यं भवत्येव। आत्मविनाशस्य दुःखनिवृत्तिफलत्वेन पुरुषार्थत्वं सम्भवतीति च हास्यम्; स्वसत्ताया अनुपमर्देन दुःखनिवृत्तेरर्थ(र्थ्य?)त्वात्। न च सर्वे दुःखनिवृत्तिमर्थयन्ते। वर्तमानदुःखानामेव तन्निवृत्तेरपेक्षितत्वात्। सर्वे सुखमेव प्रार्थयन्ते किञ्च 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति मुक्तस्यानन्दप्राप्तिवर्णनात्, 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त' इत्यपुनरावृत्तिश्रुतेश्च मुक्तस्य सद्भावो मुक्तेः सुखस्वरूपत्वञ्च ज्ञायते। तस्मात्परिणामवादोऽपि न समञ्जसः॥

इति नीतिमालायां परिणामप्रतिक्षेपाधिकारश्चतुर्थः॥

---

श्रीः

# नीतिमालायां

## पञ्चमाधिकार आरभ्यते.

अन्ये पुनराहुः—

सद्द्रव्यं स्वप्रभं ब्रह्म सर्वशक्तिसमन्वितम् ।
भोक्तृभोग्यनियन्त्राख्यनित्यव्यूहसमन्वितम् ॥

प्रळये सुप्तकल्पाः स्युर्नियन्ता(न्त्रा?)पापवर्गिणः ।
सर्गे तत्त्रिविधं ब्रह्म नानाव्यूहव्यवस्थितम् ॥

सन् घटः सन् पट इति सर्वेषु पदार्थेषु सद्बुद्ध्यनुवृत्तेस्सदत् द्रव्यम्; घटादयस्तस्यावस्थाविशेषाः—'यथा मृदयं घटः शरावः' इति घटशरावादिषु मृद्बुद्ध्यनुवृत्तेस्तत्र मृदेव द्रव्यम्। घटशरावादयो मृदवस्थाविशेषाः। न चेदं सत्त्वं घटत्वादिजातिवद्धर्ममात्रम्; घटादीनामुपमर्देऽपि कपालादिषु सद्बुद्ध्यनुवृत्तेः। तस्मात्सर्वात्मकं सद्द्रव्यं ब्रह्म। स्वव्यवहारेऽपि स्वसत्तातिरेकेणान्यानपेक्षत्वात्स्वयम्प्रकाशश्च। अस्यैव विविधविचित्रचिदचिदात्मकत्वाद्विचित्रशक्तित्वं चावगम्यते ।

भोक्तृभोग्यनियन्तारश्च व्यवस्थिताः ब्रह्मणोंऽशविशेषाः। अत एव च नित्याः। तत्र भोक्तृत्वशक्तियुक्तो भोक्तृसमष्टिपुरुष एकः। तस्य व्यूहाः प्रतिशरीरमवस्थिता जीवाः। ते चाणवोऽनन्ता नित्याः; ब्रह्मांशत्वेन स्वप्रकाशाश्च। तेषु च ब्रह्मगुणाः केचिदाविर्भूताः; केचित्तिरोहिताः॥

ते जीवास्त्रिविधाः। बद्धा मुक्ता नित्यसिद्धाश्च। प्रकृतिवैकारिकदक्षिणात्मकत्रिविधबन्धयुक्ता बद्धाः। मुक्तास्तु त एव तैर्बन्धैर्विमुक्ता आविर्भूतापहतपाप्मत्वादिब्रह्मगुणा

ईश्वरेण समानाः। सिद्धास्तु योगसिद्धाः अणिमाद्यैश्वर्ययुक्ताः। नित्यसिद्धा ईश्वरोपकरणभूताः।

सततपरिणामि प्रकृतिद्रव्यं भोग्यम्, तस्मिन्ब्रह्मगुणाः प्रायेण तिरोहिताः। अत एवाचेतनमित्युच्यते। एषा प्रकृतिः कालः परमाकाशोऽव्यक्तमिति त्रिधा भवति। कालो नामानाद्यन्ताजस्रक्षणपरिणामी मुहूर्ताहोरात्रादिविभागयुक्तः सर्वेषां परिणामपरिस्पन्दहेतुर्भवति।

परमाकाशो नाम प्रकृतेराद्यावस्था; प्रळयकाले तमश्शब्दवाच्या, परेणात्मना विभागं गता, तस्मात् पृथग्व्यवहारायोग्या, तप्तलोहसमावर्जितजलवत्संसृज्यमाना तिष्ठति। तादृश्यवस्था शक्त्यवस्थोच्यते। पुरुषस्य च प्रळयकाले तादृगवस्थानम्। एतामवस्थामधिकृत्य 'सदेव सौम्येदमग्र आसीत्' 'एकमेवाद्वितीयम्' इत्यादिश्रुतयः। सा च तमोवस्थापन्ना प्रकृतिः परस्मादात्मनो विभागरूपं विकारं प्रतिपद्यते। स विभागः शक्तिविक्षेप इत्युच्यते। स च परमात्मनो विभक्तस्य शक्तिलक्षणस्याचिद्द्रव्यस्य नित्यमेकरूपात्परमात्मद्रव्याद्विसर्पणमिव मणेः प्रभायाः। तद्विक्षिप्तं द्रव्यं परमाकाशः। स मुक्तानामीश्वरस्य च स्थानं भवति। तत्स्थानं शब्दपरिणामशक्तियुक्तत्वाद्वाक् अक्षरं चेत्युच्यते।

सत्त्वरजस्तमांसि मिळितानि अव्यक्तम्। तत्सर्गकाले महदादित्रयोविंशतिविभागभाग्भवति।

नियन्ता नामेश्वरः। स निरतिशयज्ञानानन्दैश्वर्यगुणः ब्रह्मांशत्वात्सर्वशक्तिः स्वयम्प्रकाशश्च। स च मुक्तसनाथः प्रळयकाले संसारिजीववत्सुप्तकल्पोऽवतिष्ठते। एवं सर्वजगद्ब्रह्मद्रव्यत्वाद(व्याद?)भिन्नं भवति। अवस्थारूपेण भिन्नञ्च भवति। अत एव द्वैताद्वैतपराणि वेदान्तवाक्यानि सर्वाणि समञ्जसानि भवन्तीति।

अत्राभिधीयते—

घटाः सन्तीति सत्ताया घटधर्मत्वदर्शनात्।
अस्तीति द्रव्यभावस्य घटादेश्च जडत्वतः॥

भोगभूमेश्च नित्यत्वान्मुक्तानामीश्वरस्य च ।
भोगस्य सार्वकालत्वान्मतमेतदसङ्गतम् ॥

यत्तावदुक्तं मृदयं घटः मृदयं शरावः इति वत् सन् घटः सन् पट इति प्रतीतेः सतो द्रव्यत्वं घटादीनामवस्थात्वं चावगम्यत इति; तद्विपरीतम् ; घटः सन् पटस्सन् इति घटादिद्रव्यधर्मत्वेन सत्ताया उपलब्धेः । न च घटशरावादयो मृद्द्रव्यस्यावस्थाविशेषाः। अपि तर्हि घटत्वशरावत्वाद्यवस्थाविशिष्टमृद्द्रव्यांशाः ; घटादीनामुपमर्देऽपि कपालादिषु सन्ति कपालानि इति सद्बुद्ध्यनुवृत्तेः। सत्त्वस्य धर्मत्वमनुपपन्नमित्यसङ्गतम् ; तत्रापि कपालानि सन्तीति कपालद्रव्यधर्मतया सत्त्वस्यावगतेः ।

अस्तु सत्त्वं धर्मः तत्किमिति वक्तव्यम् । उच्यते—सच्छब्दोऽनेकार्थवचनः । क्वचिदसच्छब्दाभिधेयाविद्यमानत्वविरोधिविद्यमानत्ववचनः ; यथा घटो नास्ति पटो नास्ति घटोऽस्ति सन् घट इत्यत्र । अस्ति सच्छब्दौ पर्यायौ; भवनक्रियाकर्तृवाचित्वात् । क्वचित्पण्डितवचनः ; यथा 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति ।

'इह सन्तो न वा सन्ति सतो वा नानुवर्तसे'

'सर्वदाभिगतस्सद्भिः' इत्यादिषु । क्वचिच्छक्तिमद्वचनः ; यथा औषधविशेषेष्विदमौषधम् सदिति । तत्र निरुपाधिकास्तित्वयोगेन सच्छब्दो ब्रह्मवचनः । यथा 'सदेव सौम्येदमग्र आसीत्' इति । उपबृंहितञ्चैतत्

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्स्मृतः ।'

इति । तस्मात्सतो द्रव्यत्वमनुपपन्नम् ।

यच्च सद्द्रव्यस्य स्वयम्प्रकाशत्वमुक्तम्, तदप्यनुपपन्नम् ; घटादीनामपि सद्द्रव्यत्वेन स्वयम्प्रकाशत्वप्रसङ्गात् । अस्ति च तेषामपि स्वसत्तयैव स्वव्यवहारहेतुत्वं नाम स्वयंप्रकाशत्वमिति चेन्न; अनुपलब्धेः। सामग्र्यभावात्तस्यानुपलब्धे(ब्धि?): नासद्भावादिति चेत्, तदपि न ; नित्यानुपलब्धेरसद्भावसाधकत्वात् । अथ तेषु नित्यानुपलब्धस्यापि तस्य सद्भाव उच्येत,

तदा भोग्यभोक्तृनियन्तृष्वन्योन्यस्मिन्नित्यानुपलब्धानां भोग्यत्वभोक्तृत्वनियन्तृत्वशक्तीनामन्योन्यस्मिन् सद्भावः प्रसज्येत। तथा सति तेषां भेदकाकाराभावाद्वैलक्षण्यं न स्यात्। तस्मात्सदेकदेशस्य घटादेर्जडत्वेन सतोपि स्वयम्प्रकाशत्वन्न सिद्ध्यति।

भोक्तृभोग्यनियन्त्रंशं ब्रह्मेति यदुक्तं तदप्यनुपपन्नम्; नियन्तृव्यतिरिक्ते ब्रह्मणि प्रमाणाभावात्। तथाहि—'यतो वा इमानि' इति वाक्यं यज्जगत्कारणं तद्ब्रह्मेत्यवगमयति। किं तज्जगत्कारणमित्यपेक्षायां 'सदेव सौम्येदमग्र आसीत्' 'एकमेव' इत्यादिवाक्यं सतः कारणत्वमवगमयति। सच्छब्दस्य चेतनाचेतनसाधारणवाचित्वेन विशेषाकाङ्क्षायां 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिवाक्यं चेतनस्य कारणत्वमवगमयति। आत्मशब्दस्यापि सर्वसाधारणत्वेन चेतनविशेषाकाङ्क्षायां 'एको ह वै नारायण' इत्यादिवाक्यं नारायणमेव जगत्कारणमवगमयति। तस्मान्नारायण एव जगत्कारणभूतं ब्रह्म।

किञ्च सृष्टिपरेषु तत्तद्ध्यानपरेषु वेदान्तवाक्येषु यद्वस्तु कारणत्वेन परत्वेन ध्येयत्वेन च यैश्शब्दैर्निर्दिश्यते, तैश्शब्दैः तद्वस्त्वनूद्य तस्य नारायणत्वं विदधता नारायणानुवाकेन नारायणस्य परब्रशब्दवाच्यत्वं स्वरूपप्रयुक्तम्, न ब्रह्मांशप्रयुक्तमित्यवगम्यते। अपि च 'विष्णोस्सकाशादुद्भूतं जग'दिति कारणत्वेन प्रस्तुतं परमात्मानं ब्रह्मशब्देनानूद्य तस्य लोकदृष्टप्रक्रियया कारणत्वानुपपत्तिश्च(त्तिः?) लोकेऽपि पदार्थानां विचित्रशक्तित्वप्रदर्शनेन तत्परिहारश्चाभिहितः।

निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥

शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥

भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता॥ इति।

तदिदं परमात्मन एव ब्रह्मत्वे सङ्गच्छते। तस्मात् तदतिरिक्तं तदंशि ब्रह्म न संभवति।

यत्त्विदं श्वेताश्वतराणां च वचनं 'एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित्' 'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्' इति, न तद्ब्रह्मणः त्रिविधत्वं ब्रूते। अपि तु चिदचिद्विभूतिविशिष्टं परमात्मानमुपासीनस्य ब्रह्मभूयं ब्रूते। अस्यार्थः—प्रेरितारमिति विभक्तिव्यत्ययश्छान्दसः। ब्रह्ममेतदिति लिङ्गव्यत्ययश्च। तथैव 'काल स्वभावो नियतिः' इत्यारभ्य 'भोक्ता भोग्यं प्रेरितारं चे'ति यदेतत्त्रिविधं जगत्प्रोक्तं विभूति-विभूतिमद्रुपेणावस्थितं, एतत्त्रितयं यथा आत्मसंस्थं मनसि प्रतिष्ठितं भवति, तथा नित्य-महर्निशं ज्ञेयमुपासितव्यम्। इतः परमपवर्गार्थं वेदितव्यमुपासितव्यम् किञ्चिदपि नास्ति। एतत्सर्वमविकलं मत्वा साक्षात्कारपर्यन्तमुपास्य ब्रह्म भवति; ब्रह्मसमानाकारो भवतीति। 'प्रथ-गमात्मानं प्रेरितारंच मत्वा जुष्टस्ततस्तेनामृतत्वमेति' 'प्रशासितारं सर्वेषामणीयांसमणीयसां' 'रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम्' इत्यादिभिरैकार्थ्यादयमेवार्थः। तस्मात्परमात्मव्यति-रिक्तं ब्रह्म निष्प्रमाणकम्।

यदपीदमुक्तं—चिदचिदीश्वरा ब्रह्मणो नित्यांशाः। तत्राचिद्रूपतमोवस्था प्रळयकाले तप्त-लोहसमावर्जितजलवत्परमात्मनोऽविभक्ता सर्गकाले मणेरिव प्रभा विसर्पतीति; तत्र वक्त-व्यम्—अयमविभक्तः नित्योऽचिदंशः परमात्मनः किं विलक्षणोऽविलक्षणो वा किं वोभय-स्वभावः? अविलक्षणत्वे परमात्मनोऽचित्त्वं तत्प्रयुक्ताश्च दोषाः प्रसज्येरन्। विलक्षणत्वे तु तयोरेकद्रव्यत्वं न सम्भवति; बिलक्षणानां नित्यानामेकद्रव्यत्वानुपलब्धेः। सुवर्णरचितपारश-दानामनित्यतया सत्वादिगुणवैषम्यहेतुकपरिणामविशेषायत्तवैलक्षण्यानामुपपन्नमेकद्रव्यत्वम्।

प्रयागश्च—प्रकृतिपुरुषेश्वराणां नैकद्रव्यत्वम्, नित्यविलक्षणस्वभावत्त्वात्; येषामेक-द्रव्यत्वं भवति तेषां नित्यवैलक्षण्यं न भवति; यथा पूर्वनिर्दिष्टानाम्। उभयस्वभावत्वं तु पूर्वस्मिन्नधिकारे निरस्तम्। तस्मात्प्रकृतिपुरुषेश्वराणां नैकद्रव्यत्वम्।

ननु सन्तु प्रकृतिपुरुषेश्वरा न ब्रह्मद्रव्यांशाः; ईश्वरस्यैव ब्रह्मत्वात्। प्रकृतिपुरुषा-वीश्वरब्रह्मांशाविति किमिति नाभ्युपगम्यते। 'सदेव सोम्येदमग्र आसीत्' 'सर्वं खल्विदं ब्रह्म' 'वासुदेवः सर्वं' इत्यादिशास्त्रैः प्रकृतिपुरुषयोरीश्वरद्रव्यत्वं परिदृश्यते। उच्यते— 'पतिं विश्वस्य' 'स कारणंकरणाधिपाधिपः' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इत्याद्यनेक

श्रुतिभिस्तयोः तस्य च विरुद्धस्वभावत्वावगमात् न तयोरीश्वरद्रव्यांशत्वमुपपद्यते। भिन्नद्रव्यत्वेऽपि तयोस्तेन तादात्म्यं तयोस्तं प्रत्यंशत्वं चाविरुद्धमित्युपरितनाधिकारे वक्ष्यते।

यदुक्तं ईश्वरभोगभूमिः परमाकाशः प्रकृतेराद्यवस्थेति, तदपि प्रमाणविरुद्धम्; ऋचो अक्षरे परमे व्योमन्, 'दिव्यं स्थानमजरं चाप्रमेयं' 'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः' इत्यादि श्रुतिस्मृतिभिस्तस्याप्राकृतत्वापरिणामित्वादिभिर्नित्यत्वावगमात्।

यत्पुनरुक्तं प्रतिसर्गवेळायामीश्वरस्य मुक्तानां च संसारिवत्स्वापो भवतीति, तदपि साहसम्। 'तद्विष्णोः परमं पदम्' 'सर्गेऽपि नोपजायन्ते प्रळये न व्यथन्ति च' इत्यादिश्रुतिस्मृतिभिस्तस्य तेषां च सर्वदा द्रष्टत्वद्रष्टृत्वस्तोतृत्वनिद्राक्षयाद्यवगमान्न तेषां स्वापस्सम्भवति; हेत्वभावात्। न तावत्कर्माणि हेतुः, अकर्मवश्यत्वात्। नापि कालः; अकालतन्त्रत्वादीश्वरस्य। प्रत्युत काल एवेश्वरतन्त्रः।

'कालं स पचते तत्र न कालस्तत्र वै प्रभुः।
कालस्य हि च मृत्योश्च जङ्गमस्थावरस्य च॥
ईश्वरो भगवानेकस्सत्यमेतद्ब्रवीमि वः।'

इत्यादिशास्त्रात्॥

नापि ईश्वरसङ्कल्पो हेतुः; असम्भवात्। न हि परमकारुणिक ईश्वरः चिरकालमाध्यात्मिकादिदुःखदुःखितान् स्वानुबुभूषया स्वोपासनं कुर्वाणान् 'वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः' इत्यादिप्रक्रियया स्वेनापि चिरकालप्रार्थितान् संसारिणः कथमपि लब्ध्वा स्वात्मानं प्रापय्य द्विपरार्धकालं निद्रितान् करोति, स्वयमपि तावन्तं निद्रायत इति संभवति। तदेवमनेकदोषगर्भत्वादिदमपि मतं न मनोहरम्॥

इति नीतिमालायां शक्तिविक्षेपप्रतिक्षेपाधिकारः पञ्चमः॥

श्रीः

# नीतिमालायां

## षष्ठाधिकार आरभ्यते.

तत्त्वविद एवं वर्णयन्ति—

अनुकूलापरिच्छिन्नतेजोद्रव्यं स्वयंप्रभम् ।
ज्ञानशक्तिबलैश्वर्याद्यनन्तगुणभाजनम् ॥

चिदचिद्वस्तुरूपत्वात्तत्तच्छब्दैरुदीरितम् ।
जगज्जन्मस्थितिध्वंसकारणं ब्रह्मशब्दितम् ॥

सर्वानुकूलं देशकालवस्तुभिरपरिच्छिन्नं हेयप्रत्यनीकं स्वयंप्रकाशं तेजोद्रव्यं ब्रह्म; श्रुत्यादिभिस्तथावगमात्। 'एतदमृतमभयमेतद्ब्रह्म' 'रसो वै सः' इत्यादिभिर्भोग्यत्वावगमात् सर्वानुकूलमवगम्यते। 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्' 'यतो वाचो निवर्तन्ते' 'अप्राप्य मनसा सह'

'वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वदेवैः'

इत्यादिभिः श्रुतिस्मृतिभिर्देशकालाभ्यामपरिच्छिन्नत्वं गुणैरियत्ताराहित्याद्वस्तुतोऽपरिच्छिन्नत्वञ्चावगम्यते।

ननु वस्तुनो वस्तुतोऽपरिच्छेदो नाम वस्त्वन्तरासहत्वम्। तद्यदि वस्त्वन्तरं सहेत, तदा तच्च इदञ्चेति तेन परिगणितत्वात्तेन तस्य परिच्छिन्नत्वं स्यात्। किञ्च वस्त्वन्तरसद्भावे तद्व्याप्तस्य देशस्य ब्रह्मणा व्याप्तत्वासम्भवेन देशतोऽपरिच्छिन्नत्वञ्च सिद्ध्येत्। तस्माद्वस्त्वन्तरसद्भावोऽङ्गीकृतश्चेद्ब्रह्मणस्त्रिविधपरिच्छेदराहित्यं (नः?)सम्भवतीति। उच्यते—न वस्त्वन्तरसद्भावो

वस्तुतः परिच्छेदः; येन तदसद्भावस्तदपरिच्छिन्नत्वं स्यात्। सत्यपि तस्मिन् वस्तुतोऽपरिच्छिन्नत्वव्यवहारदर्शनात्। सुवर्णशकलस्य रूपमानविशेषेण यावत्तन्निकषशिलातुलाभ्यां न परिच्छिद्येत तावन्तं कालं तस्यापरिच्छिन्नत्वव्यवहारो दृश्यते। अतो वस्तुनो वस्त्वन्तरेण सह परिगणितत्वमात्रेण तेन तस्य परिच्छिन्नत्वं न सम्भवति। तस्माद्वस्त्वन्तरसहत्वं न वस्तुपरिच्छेद इति न तद्विपरीतत्वं वस्तुनोऽपरिच्छिन्नत्वम्।

यदुक्तं वस्त्वन्तरसद्भावे ब्रह्मणो देशपरिच्छेदो न सम्भवतीति; तन्न; वस्त्वन्तरदेशयोरपि व्यापकत्वाद्ब्रह्मणः। तस्मात्त्रिविधपरिच्छेदरहितं ब्रह्म। 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामः सत्यसङ्कल्पः' 'एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः' 'परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे।' 'शुद्धे महाविभूत्याख्ये' इत्यादिश्रुतिस्मृतिभिर्निर्मलत्वञ्च तस्यावगम्यते। नैर्मल्यं च त्रिविधम्—स्वतःशुद्धत्वं, हेयवस्तुना संसर्गेऽपि तद्दोषैरस्पृष्टत्वं, श्रवणस्मरणसङ्कीर्तनादिभिरपवित्राणां पवित्रताहेतुत्वं चेति। 'विज्ञानं ब्रह्म' इत्यादिश्रुतिभिस्तस्य स्वयम्प्रकाशत्वं चावगम्यते। 'यदिदमस्मिन्नन्तः पुरुषे ज्योतिः परं ज्योतिरुपसम्पद्य' 'तं देवा ज्योतिषां ज्योतिः' इत्यादि श्रुतिभिस्तस्य तेजस्स्वरूपत्वञ्चावगम्यते।

ननु किमिदं ब्रह्मणः स्वयम्प्रकाशत्वम्? यद(यद्य?)नन्याधीनप्रकाशत्वं, तदापि प्रकाशशब्दार्थो वक्तव्यः। यदि प्रभा; प्रदीपादिषु अव्याप्तम्; प्रभायाः प्रदीपाधीनत्वात्। न च प्राकट्यम्; अनभ्युपगमात्। न च स्वयं संज्ञानम्; एकस्य कर्तृत्वकर्मत्वविरोधात्स्वकर्तृकस्वविषयज्ञानानुपपत्तेः। तस्माद्वक्तव्यं स्वयम्प्रकाशत्वम्।

उच्यते—व्यवहारानुगुण्यं प्रकाशशब्दार्थः। ब्रह्म स्वसत्तया स्वस्मै स्वव्यवहारहेतुर्भवतीत्यर्थः। प्रत्यगात्मनोऽपि समानमेतत्स्वयम्प्रकाशत्वम्। ज्ञानस्य तु स्वयम्प्रकाशत्वं स्वाश्रयं प्रति स्वसत्तयैव स्वव्यवहारानुगुण्यम्।

एवंविधं ब्रह्म ज्ञानबलैश्वर्यवीर्यतेजःप्रभृत्यसंख्येयमङ्गळगुणसङ्गतञ्च। 'परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' 'तस्य नाम महद्यशः' 'तेजोबलैश्वर्यमहाविभूतिस्सुवीर्यशक्त्यादिगुणैकराशिः' इत्यादिश्रुतिस्मृतिभिः तथात्वावगमात्। न च तासां श्रुतीनां निर्गुण-

श्रुतिविरोधः ; सर्वदा नैर्गुण्यप्रतिपादनासम्भवस्योक्तत्वात् । एतेषां गुणानामुपदेशवैयर्थ्यप्रसङ्गाच्च । अपि च 'अपहतपाप्मा' इत्यादि श्रुतिर्गुणनिर्गुणवाक्ययोः विषयव्यवस्थापनं कुर्वन्ती तयोर्विरोधं शमयति ।

एवं विधं ब्रह्म समस्तचिदचिद्वस्तुशरीरकम् । काण्वमाध्यन्दिनशाखयोरन्तर्यामिब्राह्मणे सुबालोपनिषदि च सर्ववस्तूनां परमात्मशरीरत्वश्रवणात् । 'जगत्सर्वं शरीरं ते' 'तानि सर्वाणि तद्वपुः' 'तत्सर्वं वै हरेस्तनुः' इत्यादिस्मरणाच्च । तत्र चित्स्वरूपमुपरितनाधिकारे वक्ष्यते ।

अचिद्वस्तु त्रिविधम्—कालोऽव्यक्तं परमकाशश्चेति । कालोऽनाद्यन्ताजस्रक्षणपरिणामी मुहूर्ताहोरात्रादिविभागवान् परिणामपरिस्पन्दहेतुः ।

अव्यक्तं त्रिगुणात्मकम्—तत् प्रळयकाले नामरूपविभागानर्हसूक्ष्मदशापन्नं परमात्मना अविभक्तं भवति । सर्गकाले परमात्मसङ्कल्पेन विभक्तं महदादिरूपेण परिणतं नानानामभाग्भवति ।

परमाकाशो नाम शुद्धसत्त्वमयोऽस्पृष्टदोषगन्धः शाश्वतः परमपुरुषस्य मुक्तानां नित्यसूरिणां भोगभूमिर्भवति । एवंविधचिदचिद्वस्तुशरीरकं ब्रह्म ।

ननु शरीरसम्बन्धस्य कर्मनिमित्तत्वात् 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादम्' इत्यादिभिः श्रुतिभिः परमात्मनोऽशरीरत्वावगमादकर्मवश्यत्वाच्च न तावत्तस्य शरीरत्वमुपपद्यते । चेतनाचेतनयोस्तच्छरीरत्वमनुपपन्नञ्च । इन्द्रियाश्रयत्वं भोगायतनत्वं वा हि शरीरत्वम् । न तदुभयमपि तयोस्सम्भवति । अचेतनेषु केषाञ्चित् उभयस्वभावत्त्वेऽपि न तेषां परमात्मशरीरत्वम् ; जीवकर्मनिमित्तत्वेन तेषां तच्छरीरत्वात् । तत्कथं तच्छरीरित्वं ब्रह्मणः ?

उच्यते—श्रुतयस्तावत्सर्वस्य वस्तुनः परमात्मशरीरत्वमुद्धोषयन्ति । प्रमाणान्तराप्राप्तार्थविषयाणां तासां नान्यपरत्वम् ; प्रमाणाभावात् । न चाशरीरत्वश्रुतिविरोधः ; कर्मनिमित्तशरीरनिषेधपरत्वात्तासाम् ।

यदुक्तं चेतनानामचेतनानाञ्च केषाञ्चिदिन्द्रियाश्रयत्वाद्यभावाच्छरीरत्वमनुपपन्नमिति; तदसत्; इन्द्रियाश्रयत्वभोगायतनत्वयोः स्थावरादिषु वेश्मादिषु चाव्याप्तत्वादतिव्याप्तत्वाच्च शरीरलक्षणत्वानुपपत्तेः। न चान्यदपि विविधविचित्रदेवतिर्यङ्मनुष्यस्थावरशरीरेष्वनुगतं शरीरशब्दप्रवृत्तिनिमित्तमेकरूपं किञ्चिदुपपद्यते। तस्मात् यस्य यदाधेयम्, यद्विधेयम्, यच्छेषभूतम्, तत्तस्य शरीरभूतमित्यभ्युपगन्तव्यम्। एवमभ्युपगमे परमात्मनस्सर्वाधारतया सर्वनियन्तृतया सर्वशेषितया च सर्वशरीरत्वमुपपन्नम्। अत एव 'अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा' इत्युच्यते।

ननु च परमात्मनस्सर्वशरीरत्वे तस्याकर्मवश्यत्वेऽपि संसारिवत्प्रकृतिपरिणामविशेषरूपदेहसम्बन्धादपुरुषार्थान्वयो भवत्येव। नैवम्; 'अनश्नन्नन्यः' इति तस्य कर्मफलोपभोगाभावश्रुतेः; सम्बन्धमात्रस्य भोगहेतुत्वाभावाच्च। न केवलं तस्यापुरुषार्थान्वयाभावः, भोक्तृभूतजीवभोगनिर्वर्तकतया निरतिशयदीप्तियोगश्च। तदुच्यते 'अभिचाकशीति' इति। एतच्च **भगवता भाष्यकारेण** स्पष्टमभिहितं वेदार्थसङ्ग्रहे; यथा शिष्यशास्त्रोरविशिष्टेऽपि सम्बन्धे शिष्य एव कशया पीड्यते, न शासितेति। तस्मादुपपन्नं हि ब्रह्मणश्चिदचिच्छरीरकत्वम्। एवं चिदचिद्वस्तुनोः शरीरत्वात्परमात्मवस्तुनश्शरीरित्वाच्च भिन्नान्येतानि त्रीणि वस्तूनि।

ननु कोऽयं भेदो नाम? ननु उक्तं जात्यादिर्भेद इति। अस्तु धर्मिणो धर्म्यन्तराज्जात्यादिर्भेदः। जात्यादीनां तु परस्परधर्मिणां च भेदः कीदृशः? तेषां न स्वरूपमेव भेदः धर्मान्तरादर्शनात्। न च धर्मान्तरं कल्प्यम्; रूपादिवत्परत्र व्यवहारहेतुभूतानामेतेषां स्वस्मिन्नपि तथाविधव्यवहारहेतुत्वसम्भवात्। रूपिणश्चाक्षुषत्वमापादयद्रूपं स्वस्य चाक्षुषत्वं स्वयमेवापादयति। तस्मान्न धर्मान्तरं कल्प्यम्।

ननु जातिमेव न विद्मः। न तावत्सास्नादिमद्व्यक्तिभ्यो विलक्षणमनेकव्यक्तिकृत्स्नपरिसमाप्तं नित्यं किञ्चिद्वस्तु जातिशब्दवाच्यतया अभ्युपगममर्हति; अनुपलम्भादनुपपत्तेश्च। अनुवृत्ताकारावभासिनी बुद्धिर्हि तदभ्युपगमे निबन्धनम्। न हि सूक्ष्ममपि निरीक्षमाणानां सास्नादिसंस्थानतद्वद्वस्तुषु प्रथमपिण्डग्रहणवेळायां तावदनुवृत्तत्वावभासः। नापि द्विती-

यादिपिण्डग्रहणेऽपि तथाविधस्य वस्तुनोऽवभासः; तत्रापि संस्थानस्य वस्तुन एवोपलम्भात्। आश्रयभूतेषु वस्तुषूत्पत्तिनाशभाक्ष्वपि नित्यनिरंशगमनागमनशक्तं प्रत्येकं कृत्स्नपरिसमाप्तं जातितत्त्वमस्तित्वशङ्कामपि नाधिरोहति। तस्मान्न संस्थानातिरिक्तजातितत्त्वं नाम किञ्चिदस्ति।

संस्थानमपि न जातिर्भवितुमर्हति; प्रतिपिण्डं भिन्नत्वेन तस्यैकबुद्धिशब्दयोर्निर्वाहकत्वायोगात्। अनेकत्रैकबुद्धिशब्दौ तु तत्तद्व्यक्तिमाहात्म्यकृतौ। दृश्यते हि भिन्नानामपि चक्षूरूपालोकमनसां ज्ञानाख्यैककार्यजननम्। तस्माज्जातेर्दुर्निरूपत्वात्तस्या भेदत्वोपपादनं दूरनिरस्तम् ॥

अत्राभिधीयते—संस्थानमेव जातिः तत्प्रतिपिण्डं भिन्नत्वेऽपि(न्नमपि?) द्वितीयादिपिण्डेषु सौसादृश्यात्प्रतिसन्धीयमानं स्वाश्रयेषु वस्तुष्वेकबुद्धिशब्दनिबन्धनं भवति। तदेवं प्रतिसन्धीयमानसंस्थानसौसादृश्यमनुवृत्तिरिति चोच्यते। अत एव **भगवता भाष्यकारेण** संस्थानस्यानुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमित्यभिहितम्। संस्थानातिरिक्तजातिवादिभिरप्येतत्संस्थानसौसादृश्यमनुवृत्तिपर्यायमङ्गीकर्तव्यम्; येन सा जातिर्गोसदृशान् गवयपिण्डान् परिहृत्य सर्वेष्वपि गोपिण्डेषु समवैति। तद्वरमनुपपत्तिशतैकवेषाया अनुवृत्तिधर्मविशिष्टाया निष्प्रमाणिकाया जातेस्तद्बुद्धिशब्दनिर्वाहकत्वाङ्गीकारादुभयवाद्यभ्युपगतसुसदृशसंस्थानस्यैकबुद्धिशब्दनिबन्धनत्वाश्रयणम्। गोसदृशेषु गवयेषु सौसादृश्याभावादतद्बुद्धिरप्युपपन्ना। तदेवं संस्थानस्यैव जातित्वाज्जात्यादिर्भेद इति सुष्ठूक्तम्। तस्मादत्यन्तभिन्नं चिदचिद्वस्तुशरीरकं ब्रह्म।

एवं चिदचिद्वस्तुशरीरकत्वात्परमात्मनस्तत्तद्वस्तुवाचिनः सर्वे शब्दाः तदात्मभूतपरमात्मपर्यन्ततत्तद्वस्तुवाचकाः। यथा देवो जानाति, मनुष्यो जानाति, ब्राह्मणो यजेत, इत्यादिषु देवादिशरीरवाचकाश्शब्दास्तत्तच्छरीरविशिष्टजीवात्मनो वाचकाः।

न चास्य देहात्मसामानाधिकरण्यस्य लाक्षणिकत्वं युक्तम्; देवादिशरीराणामपि जातिगुणयोरिव प्रकारैकस्वभावत्वाद्विरोधाभावेन लक्षणासमाश्रयणस्यायुक्तत्वाच्च। यदि जातिगुणवच्छरीरस्य प्रकारैकस्वभावत्वमिष्येत, तद्वदेव प्रकारप्रकारिणोः शरीरात्मनोरपि सहोपलम्भनियमो भवेत्। न च तथोपलम्भः। तस्मात्तयोस्समानाधिकरणप्रयोगो लाक्षणिक

इति न वाच्यम्; प्रमाणवैकल्यादेव तदग्रहणसिद्धेः। जातितद्वतोर्गुणगुणिनोश्च सहोपलम्भनियमस्तयोश्चाक्षुषत्वाद्भवति। आत्मनस्तु शरीरवदचाक्षुषत्वान्न सहोपलम्भनियमो भवति। न पुनः प्रकारतैकस्वभावत्वाभावात्। यथा गन्धादिगुणः प्रकारतैकस्वभावोऽपि तदाश्रयभूतपृथिव्यादिग्राहकप्रमाणेन न गृह्यते, तथा शरीरात्मनोरिव(रपि?)जातितद्वतारिव प्रकारप्रकारित्वे समानेऽपि सहोपलम्भाभावोऽपि नानुपपन्नः।

ननु च द्रव्याणां द्रव्यान्तरप्रकारत्वे दण्डी कुण्डली इति वन्मत्वर्थीयप्रत्ययेन भवितव्यमित्यपि न वाच्यम्; पृथक्स्थितिप्रतिपत्तियोग्यतया दण्डकुण्डलादीनां प्रकारतैकस्वभावत्वाभावाच्छरीरस्य तद्विपरीतत्वाच्च। तस्मात्प्रकारतैकस्वभावस्य द्रव्यस्य प्रकारत्वं सामानाधिकरण्यावसेयम्। एवं शरीरात्मनोरपि। चिदचिद्वस्तुनोः परमात्मशरीरत्वेन तत्प्रकारतैकस्वभावत्वात्तद्वाचिनां शब्दानां परमात्मनि पर्यवसानात्तेषां शब्दानां परमात्मवाचिना शब्देन सामानाधिकरण्यं मुख्यमेव।

ननु सर्वशब्दानां लोके वस्त्वन्तरवाचितया व्युत्पन्नानां परमात्मवाचित्वे मुख्यार्थपरित्यागो लक्षणा च प्रसज्येत। नैवम्; तेषां वस्तूनामभिधेयत्वापरित्यागात्। वेदान्तव्युत्पत्त्या तेषामेव शब्दानां परमात्मन्यपि शक्त्यवधारणाच्च। 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति जीवात्मपरमात्मानुप्रवेशात्सर्वेषामचिद्वस्तूनां नामरूपभाक्त्वं ह्यवगतम्। स्मर्यते च—परमात्मनस्सर्वशब्दवाच्यत्वम्। 'वचसां वाच्यमुत्तमम्' 'वेदैश्च सर्वैरहमेव वेद्यः' इति। तच्च **भगवता बादरायणेन** 'चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तः तद्भावभावित्वात्' इत्यत्र निरणायि। तस्माच्च चिदचिदीश्वराणां भिन्नत्वेपि ईश्वरस्य चिदचिद्वस्तुशरीरतया 'सर्वं खल्विदं ब्रह्म' 'तत्त्वमसि' इति समानाधिकरण्यं तस्य सर्वात्मत्वं चोपपन्नम्।

एवं शरीरभूते चिदचिद्वस्तुनी कदाचिन्नामरूपविभागानर्हसूक्ष्मदशे भवतः। तदा तद्विशिष्टं ब्रह्म कारणं भवति। तच्च 'तदैक्षत बहु स्यां प्रजायेय' इति 'तदात्मानं स्वयमकुरुत' इत्यादिभिरीक्षणपूर्वकबहुत्वकरणश्रवणान्निमित्तमुपादानञ्च भवति।

अत्र केचित्प्रत्यवतिष्ठन्ते—न तावच्चिदचिन्मिश्रितं ब्रह्मोपादानं भवति ; परिणामाश्रयस्यैवोपादानत्वात्, प्रत्यक्परमात्मनोरपरिणामित्वेनोपादानत्वासम्भवाच्च। नापि शरीरभूतस्याचिद्वस्तुन उपादानत्वं वक्तुं शक्यम् ; ब्रह्मोपादानश्रुतिविरोधात् , निमित्तोपादानयोर्भेदप्रसङ्गाच्च। तस्माच्चिदचिदीश्वरभेदमङ्गीकृत्य ब्रह्मणो जगत्कारणत्वं वदद्भिरचिद्रूपाः परमाणव उपादानकारणं, ब्रह्म निमित्तकारणमिति वक्तव्यम्। उपपन्नञ्चैतत्; पटादिकार्यस्य स्वस्मादल्पपरिमाणैस्तन्त्वाद्यनेकद्रव्यैरारब्धत्वदर्शनात्, तन्त्वाद्युपादानानां कुविन्दादिनिमित्तानां भेददर्शनाच्च ।

स्यान्मतं—एकसुवर्णपिण्डादल्पपरिमाणादङ्गुलीयाद्यनेककार्यारम्भदर्शनादल्पपरिमाणैरनेकद्रव्यैः स्थूलैककार्यारम्भोऽनेकान्त इति ; तन्न ; तत्रापि सुवर्णपिण्डावयवैरल्पपरिमाणैः स्थूलकार्यारम्भदर्शनात् ।

अथ स्यात्—असंयुक्तानां परमाणूनां कार्यानारम्भकत्वान्निरवयवानां तेषां संयोगानुपपत्तेस्सावयवत्वमाश्रयणीयम्। तदा तेषामपि तत एव कार्यत्वात्कारणान्तरापेक्षत्वेनानवस्थाप्रसङ्गान्न परमाणूनां कारणत्वं सम्भवतीति ; तदपि न ; निरवयवयोरात्ममनसोरिव तेषां संयोगोपपत्तेः। न च निरवयवानां संयोगेऽपि संयुक्तप्रदेशातिरिक्तप्रदेशान्तराभावात्प्रथिमा नोपपद्यत इति वाच्यम् ; अनन्यथासिद्धकार्यस्य प्रत्यक्षसिद्धत्वात्। तस्मात्परमाणवो जगदुपादानमीश्वरो निमित्तकारणं भवतीति ।

तदयुक्तम् ; परमाणुसद्भावे प्रमाणाभावात्। यदुक्तमल्पपरिमाणैस्तन्त्वाद्यनेकद्रव्यैः स्थूलद्रव्यारम्भदर्शनात्परमकारणभूताः परमाणवस्सिद्ध्यन्तीति ; तन्न ; अवस्थान्तरापन्नतन्त्वादिकारणद्रव्यातिरेकेण कार्यद्रव्यान्तरानुपलब्धेः। प्रत्युत तन्तवः पटः, मृदयं घटः, हिरण्यमिदं कुण्डलमिति प्रत्ययेन कार्यकारणयोरेकद्रव्यत्वमेव प्रतीयते ।

यदुक्तं निरवयवानां परमाणूनां आत्ममनसोरिव संयोग उपपन्न इति; तदपि नास्ति; हेत्वभावात्संयोगानुपपत्तेः। कर्मजो हि संयोगः। कर्म चादृष्टकारितम्। तच्चादृष्टं परमाणुगतं क्षेत्रज्ञगतं वा? उभयथापि तत्कर्मद्वारेण संयोगहेतुर्न भवति ; तस्याकादाचित्कत्वेन संयोगस्या-

प्यकादाचित्कत्वप्रसङ्गात्। विपाकापेक्षत्वेऽपि नानाविधादृष्टानामेकदैव विपाकश्च निष्प्रमाणकः। ईश्वरेच्छयापि नियमो न सम्भवति ; आनुमानिकेश्वरस्य निराकृतत्वात्। शास्त्रसिद्धस्येश्वरस्याङ्गीकारे जगदुत्पत्तिरपि यथाशास्त्रमङ्गीकरणीया स्यात्। निरवयवानां तेषां संयोगेऽपि संयुक्तप्रदेशातिरिक्तप्रदेशान्तराभावात्प्रथिमानुपपत्तिश्चापरिहार्या। तेषां सावयवत्वे तदवयवानाञ्च सावयवत्वादनन्तावयवत्वप्रसङ्गेन मेरुसर्षपयोर्वैषम्यासिद्धिः। न च कार्यस्यानन्यथासिद्धिः ; ब्रह्मोपादानत्वेनाप्युपपत्तेः॥

यत्तु लोके निमित्तोपादानयोः भेदनियमस्य दृष्टत्वाद्ब्रह्मण उभयकारणत्वन्न सम्भवतीति; तदपि ब्रह्मणः सर्वशक्तित्वाल्लौकिकपदार्थानां व्यवस्थितशक्तित्वाच्च समाधेयम्। तस्मान्न परमाणव उपादानकारणम्।

यदपि कैश्चिदुक्तं सततपरिणामिनी स्वतन्त्रा प्रकृतिः पुरुषसंयोगवशान्महदादिविसदृशपरिणामवती भवति। प्रतिसर्गावस्थायां सूक्ष्मसदृशपरिणामवती भवति। तस्मात्प्रकृतिरेव जगदुपादानमिति ; तदप्ययुक्तम् ; सर्गप्रतिसर्गव्यवस्थानुपपत्तेः। पुरुषसंयोगश्च न सर्गहेतुर्भवति ; निष्क्रियत्वेन तयोस्संयोगासम्भवात्। सन्निधिमात्रं संयोग इति च न वाच्यम् ; तयोर्नित्यत्वेन सन्निधेरपि त(स?)दातनत्वात्। न चादृष्टहेतुकः स्पर्शः(सः?); नित्यनिर्विकाराणां पुरुषाणां कर्तृत्वानभ्युपगमेनादृष्टासम्भवात्। सम्भवेऽपि अनन्तैर्जीवैः नियतकालमनुष्ठितानां युगपदुपपद्यमानजगत्सदृशफलानां कर्मणां सद्भावे प्रमाणाभावात्। अतः स्वतन्त्रायाः प्रकृतेरुपादानत्वमपि न युक्तमिति। तस्माच्छ्रुत्यनुसारेण ब्रह्मैव सर्वशक्तियोगाज्जगदुपादानकारणं निमित्तकारणञ्चेत्यास्थेयम्।

तत्र यदुक्तं मिळितस्योपादानत्वे प्रत्यक्परमात्मनोरपि कार्यत्वेन परिणामित्वं प्रसज्येतेति; नैतदस्ति ; परिणामरहितस्यापि कार्यत्वसम्भवात्। यथा शरीरस्य पाञ्चभौतिकत्वेनापरिणामिनोऽप्याकाशस्य कार्यत्वमङ्गीक्रियते। अवस्थान्तरापत्तिरेव हि कार्यता। सा प्रत्यक्परमात्मनोरपि विद्यते। सर्गावस्थायां विकसितज्ञानत्त्वात्प्रत्यगात्मनः; परमात्मनः स्थूलचिदचिद्वस्तुनोरन्तरात्मतयावस्थानाच्च। अचिद्वस्तुवत्स्वरूपान्यथाभावस्तु न विद्यते। अत एव तयोः कार्यत्वेऽपि नानित्यत्वम्। न हि विकारभाक्त्वमात्रमनित्यतां सम्पादयति ; यथा

करणाधीनज्ञानस्य जीवस्य ज्ञानरूपविकारभाक्त्वेऽपि नित्यत्वं न निरुध्यते । तस्मात्तयोरप्युपादानत्वं कार्यत्वं नित्यत्वं चोपपन्नम् ॥

एवं त्रयाणामुपादानत्वेन कार्यत्वेऽपि शुक्लकृष्णरक्ततन्तूपादानवत्स्वभावासङ्करोऽप्युपपन्नः । ननु च त्रयाणामुपादानत्वे परमात्मन उपादानत्वश्रवणं जगतस्तदात्मकत्वश्रवणञ्च कथमुपपद्यते ? उच्यते—चिदचिद्वस्तुनोर्द्व्ययोरपि जातिगुणवत्परमात्मप्रकारतैकस्वभावत्वेन शक्तिमत्परमात्मपरतन्त्रत्वात्तद्वतः परमात्मन उपादानत्वव्यपदेशः तादात्म्यवर्णनञ्चाविरुद्धम् । न च तावतोपादानत्वव्यपदेशो गौणः ; देवदत्तो गच्छति, देवदत्तो जानातीतिवन्मुख्यत्वोपपत्तेः । अत्र शरीरात्मनोर्गमनज्ञानाश्रयत्वेऽपि एतौ व्यपदेशौ मुख्यावेव भवतः ।

एवं त्रयाणामुपादानत्वेन कार्यत्वेऽपि स्वभावासाङ्कर्यं ज्ञापयितुं 'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः' 'मयाध्यक्षेण प्रकृतिस्सूयते सचराचरम्' इत्यादि श्रुतिस्मृतयः प्रवृत्ता वेदितव्याः। एवं सति हि 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं' 'तदैक्षत बहु स्यां प्रजायेय' 'सर्वं खल्विदं ब्रह्म तज्जलानिति' 'यथोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयस्सम्भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्' 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वः ब्रह्माध्यतिष्ठद् भुवनानि धारयन्' इत्यादीनां बह्वीनां श्रुतीनां ऐकार्थ्यं भवति ।

एवं ब्रह्मणोऽपरिणामित्ववादिनीनां उपादानत्ववादिनीनां जगतो ब्रह्मात्मकत्ववादिनीनाञ्च श्रुतीनां परिष्वङ्गस्सुखोदर्को भवति। तत्त्वपरेषु ध्यानपरेषु च प्रदेशेषु चिदचिद्वस्तुशरीरस्य ब्रह्मण एकत्वात्तस्यैव कार्यकारणोभयावस्थत्वाच्छरीरभूतयोश्चिदचिद्वस्तुनोश्शरीरिणः परमात्मनश्च विलक्षणत्वाच्च द्वैताद्वैतवादा स्सुसङ्गता भवन्ति इति सर्वमवदातम् ॥

इति नीतिमालायां ब्रह्मस्वरूपनिर्णयाधिकारः षष्ठः ॥

श्रीः

# नीतिमालायां

## सप्तमाधिकार आरभ्यते.

अथ पुरुषस्वरूपं निरूप्यते। तस्मिन्नानाविधा वादाः। आत्मयाथात्म्यविद् एवं वर्णयन्ति—

देहेन्द्रियादिव्यावृत्तो नित्यज्ञानः स्वयम्प्रभः।
असङ्ख्येयः परस्यांशः पुंसः कर्ता च पूरुषः ॥

ननु देह एवात्मा भवितुमर्हति, अहम्प्रत्ययवेद्यत्वादात्मनः, स्थूलोऽहं कृशोऽहमित्यादौ स्थौल्यादिविशिष्टस्य देहस्याहमर्थसामानाधिकरण्याच्च। अहं जानामीति प्रतीतेर्देहस्य ज्ञानाश्रयत्वमप्याश्रयणीयम्। न च वाच्यं चेतनस्यात्मनो विशेषगुणवत्त्वात्कार्यद्रव्यवर्तिनो विशेषगुणस्य कारण(कारणगुण?)पूर्वकत्वनियमात्प्रत्येकं परमाणुषु चैतन्यस्याविद्यमानत्वात्तस्य परमाण्वारब्धशरिरविशेषगुणत्वमनुपपन्नम्। परमाणुषु प्रत्येकं चैतन्याभ्युपगमेऽप्येकस्मिन् शरीरे चेतनानन्त्यमापतेदिति। प्रत्यक्षबाधितत्वेन कालात्ययापदिष्टत्वाद्धेतोः। अथ चेन्द्रियाश्रयत्वं शरीरे दृश्यमानं सम्प्रतिपन्नादचेतनाद्धटादेरत्यन्तं व्यावर्तमानं शरीरमेव चेतनमवगमयति। तस्माद्देह एवात्मा भवितुमर्हति ॥

नैवम्; अहं जानामीत्यात्मनः प्रत्यक्त्वेनावभासात्, इदमिति शरीरस्य पराक्त्वेनावभासाच्च। किञ्च अहम्प्रत्ययस्य शरीरगोचरत्वेऽभ्युपगम्यमानेऽवश्यमवयवप्रतिभासेनाप्यविनाभवितव्यम्। न ह्यस्ति सम्भवः अवयवी स्थूलः प्रकाशते अवयवास्तु न केचन प्रथन्त इति। न च नियमितबहिरिन्द्रियवृत्तेरवहितमानसस्याहमिति स्वात्मानमनुभवतः करचरणाद्यवयवा भासन्ते। तस्मान्न देहोऽहम्प्रत्ययगोचरः ॥

यत्तु स्थूलोऽहं कृशोऽहमिति शरीरेऽहम्प्रत्ययो दृश्यत इति; नैवम्; तत्राप्यहम्प्रत्ययस्य चाक्षुषस्य देहप्रत्ययस्य च स्थौल्यकार्श्यादियोगे(गेन ?)देहमात्रानवभासकत्वात्। तस्मात्त्राहम्प्रत्ययोऽन्तश्शरीरं प्रत्यग्रूपं किमपि वस्तु गोचरयति। अत एव ममेदं शरीरमिति भेदव्यवहारः। न ह्यसौ व्यवहारस्साक्षात्प्रतीतिनिमित्तः प्रतीयमानः शिलापुत्रकशरीरव्यवहारवदौपचारिको भवितुमर्हति। तस्माद्देहव्यतिरेकेण चेतनस्य प्रत्यक्षसिद्धत्वात्सम्बन्धिनि देहेऽहंशब्दप्रयोगो लाक्षणिकः॥

अथवा बाह्यविषयेषु परस्परविरुद्धरूपपरिमाणसङ्ख्यासङ्ग्रहणेन व्यतिरेकस्य स्फुटत्वादात्मनि तादृशरूपान्तराग्रहणेन देहप्रतिभासभ्रमोऽविवेकिनाम्॥

किञ्च आत्मन इच्छानुविधायिसङ्कल्पाध्यवसायादिव्यापारत्वाच्छरीरस्य च तदिच्छानुविधायिशयनासनोत्थानादिचेष्टत्वाच्च शुक्तिरजतादिवदभेदभ्रमो भवत्येव। प्रणिहितमनसस्तु ज्ञातृतया सिद्ध्यन्तमनवयवमहमर्थमिदमिति परिस्फुरतः स्थूलावयविनः शरीरात्पृथगपरोक्षयन्त्येव॥

भवति च प्रयोगः—शरीरमहम्प्रत्ययगोचरो न भवति, इदमिति गृह्यमाणत्वात्। घटादिवत्। तथा जानामीति प्रत्ययः शरीरविषयो न भवति, अप्रकाशमानतदवयवप्रतिभासत्वात्। यो नैवंविधः न स शरीरविषयो न भवति, यथा उभयवादिसम्मतः शरीरप्रत्यय इति। तस्माद्देहो नात्मा भवितुमर्हति॥

मा भूच्छरीरमात्मा, इन्द्रियाण्यात्मा सन्तु। न हि तानि इदन्तया प्रथन्ते, येन देहवदात्मत्वं न स्यात्। न च देहवत्तान्युद्भूतरूपादिगुणानि स्थूलानि, येन तत्प्रतिभासे रूपावयवादिप्रतीतिः प्रसज्येत। तद्व्यापारफलञ्च ज्ञानं तद्धामि भवितुं युक्तम्, स्नानाध्ययनयागादिफलवत्। अत एव **सत्यतपसा** द्रष्टुं चक्षुषा युक्तत्वात्। (द्रष्टुश्चक्षुष इत्युक्तम् ?)

नैवं भवितुमर्हति। न तावत्प्रत्येकमिन्द्रियाण्यात्मा, इन्द्रियान्तरदृष्टस्य इन्द्रियान्तरेण प्रतिसन्धानाभावप्रसङ्गात्। अस्ति च यमहमद्राक्षं, तमहं स्पृशामीति। अत एव न सम्भूयापि। न हि पञ्चेन्द्रियैरेकं वस्त्वनुभूयते। तथा एकैकेन्द्रियापाये तत्तदिन्द्रियानुभूतार्थ-

स्मरणमपि न भवेत्। एकेन्द्रियविगम एवात्मनः प्रायणप्रसङ्गश्च। तस्मान्नेन्द्रियाण्यात्मा। शरणागतपरित्यागस्य नृशंसतामालोच्य सत्यतपसस्तथा वचनम् ॥

अस्तु तर्हि मनश्चेतनः। तथा सति सर्वेन्द्रियानुभवेषु मनसो विद्यमानत्वात्पूर्वोक्तदोषा न सम्भवन्ति। तदप्ययुक्तम्; तस्य चक्षुरादिवत्करणत्वेनात्मत्वासम्भवात्। स हि कर्ता। प्राणस्याप्यात्मत्वं न सम्भवति; बाह्यवायुवद्वायुत्वादेव तस्य चैतन्यानुपपत्तेः ॥

अस्तु तर्हि संविदात्मा। अजडत्वात्तस्यात्मत्वमुपपन्नञ्च। अजडत्वञ्च सत्तयैव प्रकाशमानत्वादुपपद्यते। न हि संवित्सती घटादिवदप्रकाशमाना दृश्यते, येन परायत्तप्रकाशा अभ्युपगम्येत ॥

अथ मतम्-उत्पन्नायामपि संविदि विषयमात्रं ह्यवभासते नीलमिदमिति; न संवित्प्रतीतिः। तस्मादिन्द्रियवत्संविदप्यर्थप्रकाशे सत्तयैव करणं भवति। ततोऽर्थगतागन्तुकप्रकाशाख्यधर्मदर्शनेन संविदनुमान्य(स्य?)त इति, नैतद्युक्तम्; ज्ञानव्यतिरेकेणार्थधर्मस्य प्रकाशस्य रूपादिवदनुपलब्धेः। न च व्यवहारान्यथानुपपत्त्या स धर्मः कल्प्यः; उभयाभ्युपेतया संविदैव व्यवहारोपपत्तेः ॥

अपि चानवभासमानायां संविदि विषयावभासश्च नोपपद्यते; अवभासकत्वात्प्रदीपवत्। तस्मान्नीलमिति प्रतीतौ संवित्प्रतीतिश्च विद्यत एव। अत एव हि घटमहं जानामि, नीलमिदं संवेद्मीति प्रतीतिव्यवहारौ सम्भवतः। अतोऽजडत्वात्संविदात्मेति ॥

नैतदेवम्; घटमहं वेद्मीति प्रत्यगर्थस्यात्मनो धर्मतया संविदः प्रतीतेः। संविदनुभूतिज्ञानादिशब्दास्सम्बन्धिशब्दा इति हि शब्दार्थविदो वदन्ति। अतश्च संविदात्मा न भवति। तस्माद्देहेन्द्रियमनःप्राणसंविद्भ्यो व्यावृत्तोऽहं जानामीति ज्ञातृतया प्रतीयमानोऽहमर्थ एवात्मा ॥

किञ्चायमात्मनो देहेन्द्रियादिव्यतिरेकः श्रुतिसिद्धः। **बृहदारण्यके** बालाक्यजातशत्रुसंवादे 'तौ ह सुप्तं पुरुषमाजग्मतुः' इत्यादिना सुप्तपुरुषगमनयष्टिघातोत्थापनादिभिः देहादिव्यतिरिक्तजीवप्रतिबोधनात् ॥

अथ स्यात्—ज्ञानस्य स्वयम्प्रकाशत्वमुभयवादिसिद्धम् । तस्य नीलादिवदिद-मित्यनवभासात्पराक्त्वाभावेन प्रत्यक्त्वञ्च विद्यते । अहमर्थस्य त्विदन्तयावभासाभावेऽपि विषयवज्ज्ञानोपलब्धिवेलायामेवोपलब्धेरर्थतः पराक्त्वं भवति । तस्माज्ज्ञानमेवात्मा, नाहमर्थ इति ॥

तद्विपरीतम् ; अहमर्थस्यैव स्वयम्प्रकाशत्वात्प्रत्यक्त्वाच्च । स्वस्मै प्रकाशमानत्वं हि साक्षात्स्वयम्प्रकाशमानत्वम् । तदहमर्थस्यैव । ज्ञानस्य तु स्वेन प्रकाशमानत्वेऽपि स्वस्मै स्वयम्प्रकाशमानत्वाभावान्न मुख्यम् । तदपि हि विषयवदात्मन एवावभासते । प्रत्यक्त्व-ञ्चाहमर्थस्यैव ; ज्ञानस्य तु पराक्त्वाभावमात्रमेव, न तु प्रत्यक्त्वम् । तस्य पराक्त्वाभावः स्वयम्प्रकाशत्वञ्चाहं जानामीत्यात्मधर्मतयावभासादेव भवति । अहमर्थस्य ज्ञानोपलब्धिवेला-यामेवोपलम्भादर्थतः परात्त्वसिद्धिश्चात एव परास्ता ॥

नन्वहमर्थो यदि(दि न) ज्ञानाधीनप्रकाशः स विषयाननुभववेलायां किमिति न प्रकाशते? भवत्पक्षे वा तदानीं ज्ञानं किमिति न चकास्ति? तदपि हि नित्यं स्वयम्प्रकाशं चाभ्युपगम्यते । अथ तदानीमपि विज्ञानं प्रकाशत एव । अहङ्कारविषयाभ्यामनुषङ्गाभावान्न व्यवह्रियत इति चेत्समानमिदमितरस्यापि ॥

अथ मतम्—अविक्रियः खल्वात्मा । ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वम् । तद्विकार-भूतत्वादात्मनो न सम्भवति । तदभ्युपगमे देहस्येव जडत्वं प्रसज्येत । तस्माज्ज्ञातृत्वं ज्ञानेऽध्यस्तम् । किञ्च देहात्माभिमानवत एव ज्ञातृत्वोपलम्भादाध्यासिकं ज्ञातृत्वम् । तस्मान्नाहमर्थ आत्मा भवितुमर्हतीति ।

एतत्परीक्षकाणां धियं नाधिरोहति । ज्ञानस्य क्रियात्वाभावेन तदाश्रयस्य कर्तृत्वा-भावात् । तत्प्रभावदच्छद्रव्यं यावदात्मभाविधर्मत्वेन तस्य गुण इत्युच्यते । तस्मादात्मनो देह-तुल्यत्वं ज्ञातृत्वञ्च ज्ञानेऽध्यस्तमिति च(?) हास्यम्, अदृश्यमानस्याधिष्ठानानुपपत्तेः आत्मा-श्रयदोषप्रसङ्गात् । अन्तःकरणवृत्तिरूपज्ञानक्रियाकर्तृत्वं अविक्रिये ज्ञानेऽध्यस्तमिति नात्माश्रय-दोष इति चेत्, तदपि न ; तथाविधस्य ज्ञानस्यासिद्धत्वात्, ज्ञानमात्रस्यात्मत्वनिषेधाच्च ।

देहात्माभिमानवतो ज्ञातृत्वोपलम्भात् ज्ञातृत्वस्याध्यस्तत्वमुक्तं ज्ञानस्यापि समानम् । तदपि तद्वत एव ह्यवभासते ॥

किञ्च ज्ञातुरहमर्थस्य ज्ञानेऽध्यासं वदता(दतो ?) ज्ञानमहमित्यध्यासो भवेत् ; अधिष्ठानभूतायां हि शुक्तिकायां रजताध्यासः । तस्मान्नित्यज्ञानाश्रयः स्वयम्प्रकाशोऽहमर्थ एवात्मा ॥

ननु च ज्ञानं मे जातम्, ज्ञानं मे नष्टमिति तस्य जन्मनाशौ प्रतीयेते । नित्यत्वे चक्षुरादिकरणानां वैयर्थ्यं भवेत् । स्वापादिषु संज्ञालोपः श्रुतिसिद्धः । तत्कथं ज्ञानं नित्यमुच्यते ?

उच्यते—'जानात्येवायं पुरुषः न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते—'

'यथा न क्रियते ज्योत्स्ना मलप्रक्षाळनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥

यथोदपानकरणात्क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतस्सम्भवः कुतः? ॥

तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते' ॥

इत्यादिश्रुतिस्मृतिभिरात्मनो ज्ञातृत्वं ज्ञानस्य नित्यत्वञ्चावगम्यते । तस्मात्तस्य जन्मनाशव्यपदेशौ विषयानुषङ्गाननुषङ्गाभिप्रायेण । स्वापादिषु तस्य विलोपश्रुतिश्च तदभिप्राया । न च करणानां वैयर्थ्यम् ; नित्यस्यैव संसारि(सार ?)दशायां कर्मणा सङ्कुचितस्य निष्क्रमणद्वारतया कृतत्वात्तेषाम् । निष्क्रमणञ्च स्मृतिसिद्धम् ।

'इन्द्रियाणां हि चरतां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम्' ॥

इति हि मानवं वचः । अस्या निष्क्रमणश्रुतेः ज्ञानस्य द्रव्यत्वं सिद्धम् । तदेवमात्मा नित्यज्ञानः स्वयम्प्रकाशश्च । उक्तैरेव हेतुभिः क्षणिकविज्ञानात्मवादोऽपि निरस्तः ॥

अयं प्रतिशरीरं भिन्नोऽसङ्ख्यश्च । 'नित्यो नित्यानां चेतनश्चेतनानाम्' इत्यादिश्रुतेः । अजामन्त्रोऽप्यात्मनोऽसङ्ख्यातत्वमनुजानाति । 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' इति मुक्तसंसारिणोर्भेदप्रतिपादनात् । एवं श्रुत्यनुमतौ सत्यां सुखदुःखव्यवस्थाश्च नानात्वमवगमयन्ति । तस्मादसङ्ख्यो जीवः ॥

अणुश्चायमात्मा । 'तेन प्रद्योतेनैव आत्मा निष्क्रामयति ये वेके चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इत्युत्क्रान्तिगत्यागतिश्रुतेः । 'एषोऽणुरात्मा चेतसा वेदितव्यः यस्मिन्प्राणः पञ्चधा संविवेश' इति साक्षादणुत्वश्रुतेश्च ।

न चाणुत्वे सकलशरीरव्यापिनी वेदना नोपपद्यत इति वाच्यम् ; दीपस्येव प्रभारूपेण ज्ञानेन युगपत्सकलशरीरव्याप्तिसम्भवाद्वेदनोपपत्तेः । अपि च विभुत्वे सर्वशरीरेषु सर्वेषां विद्यमानत्वादुपलब्धिः प्रसज्येत । न सा कस्यचिदपि । न च शरीराणां स्वकीयपरकीयत्वाभ्यां व्यवस्थासिद्धिः ; तेषामपि साधारण्यात् । न च तत्रादृष्टवशेन व्यवस्थोत्प्रेक्ष्या ; तत्रापि च साधारण्यस्याविशिष्टत्वात् । तस्मादणुपरिमाणोऽयमात्मा ॥

अंशभूतश्चायमात्मा परमात्मनः । ननु नियन्तृत्वनियम्यत्वसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिभिर्विरुद्धस्वभावत्वात्तयोरेकद्रव्यत्वाभावेन नांशांशित्वमुपपन्नम् ॥

उच्यते—न केवलमेकद्रव्यैकदेशत्वमेवांशत्वम्, किन्तु विशिष्टवस्त्वेकदेशत्वमप्यंशत्वम् । विशिष्टस्यापि हि वस्तुनो विशेषणमंश एव । दृश्यते हि विशेषणांशोऽयम्, विशेष्यांशोऽयमिति प्रतीतिव्यवहारौ । वर्णित एव प्रत्यक्परमात्मनोर्विशेषणविशेष्यभावः तयोश्शरीरशरीरित्वोपपादनेन । प्रकारान्तरेणांशत्वं च दुरुपपादम् । तथाहि—प्रथमं तावद्राजभृत्ययोरिव पृथग्द्रव्यत्वे अंशत्वं दुर्भणमेव । विवर्तपक्षेऽपि जीवस्यापारमार्थिकत्वादेवांशत्वं ब्रह्मणोऽशित्वं च नोपपद्यते ।

आपाधिकजीववादेऽप्यंशत्वं न शक्यवचनम्; ब्रह्मण एवोपाधिप्रयुक्तदोषानुषङ्ग-प्रसङ्गात्। न च घटाकाशादिवदवच्छिन्नप्रदेशानुषक्ता दोषा अनवच्छिन्ने ब्रह्मणि न प्रसज्येरन्निति युक्तम्; उपाधिना अमूर्तब्रह्मणोऽवच्छेदासम्भवात्। आकाशस्येव सम्भवतीति चेन्न; तत्रापि तदभावात्। आकाशस्यापि घटादिसंयोगमात्रमेव; नावच्छेदः, तदनर्हत्वात्तस्य। तस्माद्ब्रह्मण एवोपाधिसंयोगात्तत्प्रयुक्तदोषास्तस्यैव स्युः। ततश्च सर्वं वेदान्तवाक्यं व्याकुलं स्यात्। अतस्तस्मिन्नपि पक्षे जीवपरमात्मनोरंशांशिभावो नोपपद्यते॥

शक्तिविक्षेपपक्षेऽपि पूर्वोक्तप्रक्रियया शरीरशरीरिभावेनांशांशित्वमुच्यते। तदस्माकमविरुद्धमेव। नो चेदनन्तरोक्तप्रक्रियया परमात्मनस्सर्वदोषानुषङ्गः। तदेवं परमात्मनोंऽशः प्रत्यगात्मा॥

अयं कर्ता चाभ्युपगन्तव्यः। 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'आत्मानमेव लोकमुपासीत' इति स्वर्गापवर्गसाधनानुष्ठानविधानशास्त्राणामवैयर्थ्याद्धेतोः। अपि च 'एवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते' इत्युपकरणोपादानविहारयोः कर्तृत्वमुपदिशति। अतश्चायं कर्ता॥

अथ स्यात्—'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' इति ज्ञानपर्यायाया बुद्धेर्यज्ञादिकर्तृत्वमवगम्यते।

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥'

इत्यात्मनः कर्तृत्वं निन्द्यते च। तस्माद् बुद्धेरेव कर्तृत्वं युक्तमिति॥

नैतदेवम्; बुद्धेर्नियोज्यत्वासम्भवात् कर्तृत्वानुपपत्तेः। स्वर्गादिफलोपभोगसमर्थं चेतनमेव हि शास्त्राणि तत्साधके(धने?)नियुञ्जते। न ह्यचेतना बुद्धिर्नियोक्तुं शक्यते। प्रकृतेः क्रियमाणानीत्यत्रापि नात्मनः कर्तृत्वं निन्द्यते। किन्तर्हि? अधिष्ठानाद्यनेकहेतुनिर्वर्त्यायां

यदस्य निरपेक्षकर्तृत्वाभिमानादि तदनर्थकमित्युच्यते । 'अधिष्ठानं तथा कर्ते'त्यस्य कर्तृशब्देन व्यपदेशात् । अत एव हि—

'तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥'

इत्युच्यते। अतो देहेन्द्रियादिविलक्षण उक्तलक्षण एव पुरुषः ॥

इति नीतिमालायां

पुरुषस्वरूपनिर्णयाधिकारस्सप्तमः ॥

श्रीः

# नीतिमालायां

## अष्टमाधिकार आरभ्यते.

अथ विधिस्वरूपं निर्णीयते—

तं शब्दभावनां प्राहुरेके कार्यं तु केचन ।
आप्तस्य हितकामस्य नियोगं केचिदूचिरे ॥
भाष्यकारोऽपि भगवानेवमेवान्वमन्यत ॥

शब्दभावना विधिः ; तस्याः फलभावनायां पुरुषप्रवृत्तिहेतुत्वात् । प्रवर्तको हि विधिर्भवति । ननु केयं शब्दभावना? उच्यते—सर्वशब्दानामर्थप्रतीत्युन्नेयोऽभिधाव्यापारः ; समस्तलिङादीनां त्वसौ व्यापारः तैरेवाभिधीयते । स पुरुषप्रवृत्तिभवनफलत्वाद्भावनेति प्रवर्तनेति च गीयते । न च वाच्यं न शब्दस्य व्यापारत्वं सम्भवति; गुणत्वाद्रूपवत् । अथ स द्रव्यमिष्यते, तथापि न सम्भवति ; विभुत्वादिति । अरुणिमादेर्गुणस्यापि व्यवच्छेदादिव्यापारसम्भवात् । विभूनां ज्ञानादिव्यापारस्य विद्यमानत्वात् । परिस्पन्दलक्षणस्तु व्यापारः तस्य न सम्भवत्येव ; न चासावस्माभिरपीष्यते । कस्तर्ह्यसौ व्यापारः? शब्दविषयज्ञानमेव । तद्योगी हि शब्दोऽर्थप्रतीतिं जनयति ॥ यथोक्तं 'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्' इति । यमागन्तुकं धर्मं प्राप्य कार्याय प्रभवति स तस्य व्यापार इति उच्यते । ज्ञाता हि लिङादयः पुरुषं प्रवर्तयन्ति । तस्माज्ज्ञानस्य शब्दव्यापारत्वमुपपन्नम् ॥

न च वाच्यं शब्दस्याभिधाव्यापारवत्त्वमयुक्तम् । शब्दं जानामीति शब्दकर्मकतयावगतस्य ज्ञानस्यैव शब्दोऽर्थमभिधत्त इत्यत्र तत्कर्तृत्वाभ्युपगमप्रसङ्गात् । न ह्येकस्यैवैक-

स्मिन्व्यापारे कर्मत्वं कर्तृत्वञ्चोपपद्यते इति। परशुवदुपपत्तेः। परशुर्हि उद्यमननिपातनयाः कर्मापि सन् द्वैधीभावफलावच्छेदलब्धछिनत्तिपदाभिधानयोस्तयोरेव कर्ता भवति। तथा ज्ञानस्य शब्दकर्मकस्यापि अर्थप्रतिपत्तिलक्षणफलावच्छेदलब्धाभिदधातिपदाभिधानस्यार्थः कर्म। शब्दस्तु फलार्थप्रवृत्तेस्तस्मिन्नेव व्यापारे स्वातन्त्र्यविवक्षया कर्तेत्यनवद्यम्।

अनेनैव न्यायेनाऽर्थकर्मकस्याभिधाव्यापारस्यापि पुरुषप्रवृत्तिभवनफलावच्छेदलब्धभावनाभिधानस्य पुरुषप्रवृत्तिफलावच्छेदलब्धप्रवर्तनाभिधानस्य च प्रवृत्तिकर्मत्वं पुरुषकर्मत्वञ्च व्याख्यातम्। तेन एक एव व्यापारो यदा जानातिना विषयप्रकाशफलावच्छिन्नोऽभिधीयते, तदा विषयभूतशब्द एव तत्फलभाक् कर्म भवति, शब्दं जानातीति। यदा तु स एवार्थप्रतीतिरूपफलावच्छिन्नोऽभिदधातिनाभिधीयते, तदा प्रतीतिरूपफलभागर्थः कर्म भवति, अर्थमभिदधातीति। यदा तु भावनावच्छिन्नो भावयतिनाभिधीयते, तथा भावनालब्धा प्रतीतिः (प्रवृत्तिः?) कर्म भवति, प्रवृत्तिं भावयतीत्ति। यदा तु प्रवृत्त्यवच्छिन्नः प्रवर्तयतिनाभिधीयते, यथा प्रवृत्तिफलभाक्पुरुषः कर्म भवति, पुरुषं प्रवर्तयतीति। न हि व्यापारस्वरूपाक्षिप्तः कर्मभावः। तथा सति हि चलत्यभिहितापि क्रिया गच्छत्यभिहितेव सकर्मिका स्यात्। तस्मादेक एव व्यापारः फलभेदेन बहुधा रूप्यमाणः तत्तत्कर्म(र्मको?) भवति।

अस्त्वभिधाव्यापारश्शब्दस्य ; नत्वस्य पुरुषप्रवर्तकत्वं लिङाद्यभिधेयत्वञ्च सम्भवति। न हि कस्यचिदपि लिङादेरभिधाव्यापारत्वज्ञानमात्रात्प्रवृत्तिर्दृश्यते ; समीहितसाधनत्वावगमात्सर्वत्र प्रवृत्तेः। न चासावर्थप्रतीतिलक्षणफलोन्नेयशब्दान्तराभिधावत्तदभिधेयो भवितुमर्हति॥

उच्यते--सत्यं फलसाधनत्वं प्रवर्तकत्वम्।। तत्तु न शब्दस्याभिधेयम्। यजेतेत्यादेश्शब्दाद्यागादेस्समीहितसाधनत्वावगतेर्लिङादियुक्तवाक्यश्रवणसमनन्तरं प्रवृत्तेर्दर्शनात्प्रवृत्तिहेतुभूतोऽभिधाव्यापारः शब्दान्तरव्यापारविलक्षणो लिङादिभिरभिहित इति निश्चीयते। न चाभिधाया अभिधानासम्भवः ; अभिधाशब्दवदुपपत्तेः। तस्माच्छब्दभावना विधिरिति केचिदाचक्षते॥

तदयुक्तम् ; तत्सद्भावे प्रमाणाभावात् । न तावल्लिङादिशब्दः प्रमाणम् ; तत्र तस्य व्युत्पत्त्यभावात् । न च लिङादिशब्दश्रवणानन्तरभाविनी प्रवृत्तिः प्रमाणम् ; प्रवृत्ते(वृत्तौ?) तस्य निबन्धनत्वात् । यन्निबन्धना हि स्वात्मप्रवृत्तिर्दृष्टा तदेव तां दृष्ट्वा अशक्यानुमानम् । किञ्च शब्दस्य व्यापारो न सम्भवति । स हि द्विधा प्रयत्नलक्षणः परिस्पन्दलक्षणश्चेति ॥ अचेतनत्वान्न तावत्स प्रयत्नस्सम्भवति । न च परिस्पन्दः ; गुणत्वाच्छब्दस्य । यदुक्तम-रुणिमादेरिव गुणान्यव्यापारत्वं सम्भवतीति, तदपि न ; तत्रापि व्यापारासम्भव-स्याविशिष्टत्वात् ।

यच्चोक्तं शब्दविषयज्ञानमेव शब्दस्य व्यापार इति, तदप्ययुक्तम् ; ज्ञानस्यात्मगुण-त्वोपपादनेन तस्य शब्दव्यापारत्वासम्भवात् । न च शब्दोऽर्थमभिधत्त इत्यभिधाव्यापारस्य शब्दकर्तृकत्वञ्च युक्तम् ; तस्य ज्ञानपर्यायत्वाङ्गीकारात् । ज्ञानस्यात्माश्रयत्वेन शब्दाश्रय-त्वानुपपत्तेः ।

यदपि केनापि प्राकट्यं शब्दस्य व्यापार इत्युक्तम्, तदपि प्राकट्यस्य निरस्तत्वादनुपपन्नम् । अपि च व्यापाररहितस्यापि शब्दस्याभिधाव्यापारबोधकस्य लिङादेरिव बोधकत्वन्नानुपपन्नम् । किञ्च यथा निर्व्यापारं ज्ञानमर्थप्रकाशनसमर्थमङ्गीकृतम्, तथात्रापि स्यात्—यथोक्तं सौत्रं बुद्धिजन्मपदं व्याचक्षाणैः न्यायाचार्यैः ॥

'व्यापारः कारकाणां हि दृष्टो जन्मातिरेकतः ।
प्रमाणेऽपि तथा मा भूदिति जन्म विवक्ष्यते' ॥ इति ॥

तथा वर्णैरुत्पद्यमानोऽभिव्यज्यमानो वा शब्दो बोधहेतुर्भवतीति किमनुपपन्नम्? अत इदमपि निरस्तम्—पुरुषप्रवृत्तिभवनानुकूला लिङ्ज्ञानकरणिकार्थवादोदितप्राशस्त्यलक्षणेति-कर्तव्यतावती शब्दभावना प्रेरणात्मा कल्प्यत इति । तस्मान्न शब्दभावना नाम काचित्सि-द्ध्यति । यद्यपि सिद्ध्येत्तथापि न तस्य विधित्वं सम्भवति ; प्रवर्तनात्वाभावात् । न हि शतकृत्वः कुरुष्वेत्युक्ते कश्चित्प्रवर्तते । तेन........मरार्तस्याचेतनस्य शब्दस्य प्रवर्तकत्वं(त्वं न ?) सम्भवति ।यदि च शब्दः प्रवर्तकः स्यात्, प्रवर्तयेदव्युत्पन्नमपि । अस्तु शब्दः प्रवर्तकः,

तथापि तन्निबन्धनायाः प्रवृत्तेवायाद(त्तेर्यागा ?)दिप्रवृत्तिवत्पुरुषार्थभावो न सम्भवति। तस्माच्छब्दभावना विधिरिति पक्षो निष्प्रमाणकः ॥

अन्ये तु वदन्ति—कार्यबुद्धिस्सर्वत्र प्रवृत्तिहेतुः। तथाहि—यः पुरुषः पुरुषान्तरेणाप्रवर्तितः प्रवर्तते, यश्च स्वयं कामात्क्रोधाद्भयाद्वा प्रवर्तते, स सर्वोऽपि ममेदं कार्यमिति प्रतीत्यैव प्रवर्तते। तस्मात्कार्यमेव लिङाद्यर्थो विधिः ; साक्षात्प्रवृत्त्युपधानादितरेषां व्यभिचाराच्च। तच्च कार्यं कृत्यधीनात्मलाभम्। तच्च लोके क्रियैव। तत्र क्रियायाः कार्यत्वं लिङादिभिः प्रतिपाद्यमानं वेदेऽपि स्वर्गकामो यजेतेत्यस्मिन्वाक्ये प्रतिपत्तुं प्रवृत्तो विरोधं पश्यति ; कथं स्वर्गकामस्य यागक्रिया कर्तव्या भवेत्? स्वर्गकामो हि स्वर्गसाधने प्रवर्तते। न यागस्स्वर्गसाधनं भवति, क्षणिकत्वादिति। एवं विरोधं पश्यन् लिङाद्यर्थ एव नूनं क्रियाव्यतिरिक्तः कश्चिदलौकिक इति मन्यते। तस्य कार्यत्वात्तज्ज्ञानं प्रवृत्तिकारणम्; स्थायित्वात्स्वर्गसाधना(नत्वो ?)पपत्तेः स्वर्गकामस्यानुष्ठेयः; अलौकिकत्वादपूर्वशब्दवाच्यः; स्वात्मनि पुरुषं नियुञ्जानो नियोग इति गम्यते। तस्मिंश्च क्रियातिरिक्तकार्यवाच्ये निश्चिते लिङादीनां यो लोकप्रयोगः स लाक्षणिको भवति ; अनेकार्थत्वस्यान्याय्यत्वात्। एवञ्च नैमित्तिकनिषेधाधिकारयोरसत्यपि फलेऽपूर्वमेव वाक्यार्थो भविष्यति ; तस्यैवाभिधेयत्वादिति ॥

एतदप्यनुपपन्नम् ; कार्यस्य दुर्निरूपत्वान्निष्प्रमाणकत्वाच्च। तथाहि—न तावत्कृतिसाध्यं कार्यम् ; यागादेर्धात्वर्थस्य कार्यत्वप्रसङ्गात्। न च कृत्युद्देश्यं कार्यम् ; स्वर्गादेः फलस्य तथात्वापातात् ॥ नापि कृतिसाध्यं कृत्युद्देश्यं वा यद् भवति तत्कार्यमित्यपि वक्तुं शक्यम् ; तस्य कृत्युद्देश्यत्वासम्भवात्। कृतिं प्रति प्रयोजनं कृत्युद्देश्यं भवति। पुरुषस्य कृत्यारम्भप्रयोजनं कृतेश्च प्रयोजनम्। तच्च सुखं दुःखनिवृत्तिर्वा। न हि कार्यं तयोरन्यद(न्यतरद ?)पि भवति। तस्मात्तस्य कृत्युद्देश्यत्वासम्भवात् कार्यत्वञ्च न सिद्ध्येत्। अथ तस्य कृतिप्रयोजनत्वाभावेऽपि प्रयोजनभूतस्य स्वर्गादेः साधनत्वेनार्थ्यत्वात्तत्कृत्युद्देश्यमित्युच्यते, तथा सति इष्टसाधनस्य विधित्वमङ्गीकृतं स्यात्। तस्माद्दुर्निरूपं कार्यम् ॥

अपि चास्य कार्यस्य न विधेयत्वं(विध्यर्थत्वं ?)सम्भवति ; तज्ज्ञानस्य प्रवृत्तिहेतुत्वाभावात् । न हि बलवदुद्ग्राह्योऽयं तदभावः(मृद्गारः ?)निपुणविज्ञेयः सुवर्णस्य वर्णे इत्यत्रकार्यत्वज्ञाने सत्यपि प्रवृत्तिर्दृश्यते ॥

अथोच्येत—इदं मम कार्यमिति यत्प्रतीयते तत्कृत्युद्देश्यमिति, तदप्ययुक्तम् ; इदं मम कार्यमित्येवंरूपस्यास्य प्रमाणज्ञानत्वाभावात् । किन्तर्हि ? इदं कार्यमिति पुरुषस्य चिकीर्षारूपस्सङ्कल्पः । तस्मान्न वाक्यार्थज्ञानमिदम् । वाक्यं हीदं यागस्य कार्यमिति वदति ; न ममेदं कार्यमिति । अत एव वाक्यार्थं प्रतिपद्यमानोऽपि ममेदं कार्यमिति सङ्कल्पानुपपत्तेः विधिमतिक्रामन् दृश्यते ॥

१०

यदुक्तं स्वर्गकामो यजेतेत्यत्र स्वर्गसाधनत्वान्यथानुपपत्त्या क्रियाव्यतिरिक्तं किञ्चित्कल्पनीयमिति, तन्न ; यागादेरि(रे?)व स्वर्गसाधनत्वस्य वक्ष्यमाणत्वात् । तस्मान्नापूर्वमपि विधिर्भवति ॥

त्र्यन्तनिष्ठास्त्वेवमातिष्ठन्ते—आप्तस्य हितकामस्य नियोगो विधिः प्रवर्तनेति पर्यायाः । प्रयोक्तृपुरुषधर्मत्वेन तस्य व्युत्पत्तिः । ननु च शक्तिग्रहणं हि व्युत्पत्तिः, कथं पुरुषप्रवर्तनायां सम्भवति ? उच्यते—न हि शक्तिग्रहणं व्युत्पत्तिः । किन्तर्हि ? सहदर्शनम् । तथाहि—बालः शब्दप्रयोगं परेषां प्रवृत्तिं बहुकृत्वः सह पश्यति । तथादृष्ट्या प्रौढसंस्कारस्सन् लोकोत्तरे(कालान्तरे?) यथा(दा?) शब्दं शृणोति, तदा तस्याजिज्ञासमानस्यैवार्थेषु स्मृतिरुपजायते । स्मृताश्चार्थास्स्वयमेव संसर्गप्रतीतिमुपजनयन्ति । तस्मात्सहदर्शनं व्युत्पत्तिः। अत एव लिङादियुक्तेषु वाक्येषु बालः प्रयोज्यपुरुषस्य प्रवृत्तिदर्शनात्प्रवृत्तिहेतुविज्ञानमनुमाय तत्र च शब्दसमूहस्य शक्तिमवधारयति । पुनरावापोद्वापाभ्यामर्थविशेषस्य(षे ?) शब्दविशेषस्य शक्तिविशेषं व्यवस्थापयतीत्येतन्न समीचीनम् ; बालस्य तथाविधोहापोहसामर्थ्याभावात् ॥

किञ्च प्रवृत्तेः कार्यज्ञानस्येव भूयोदर्शनेन व्याप्त्यवगमात्प्रागेव काञ्चिच्छब्दात्प्रवृत्तिं पश्येदपि । कथं कार्यज्ञानमनुमीयते ; कथं वा शब्दस्य लिङ्गत्वमवगच्छेत् । न ह्यनुमानव्युत्प-

त्ति(त्ते ?)रूर्ध्वमेव शब्दानन्तरप्रवृत्तिदर्शनमित्येव स्थापयितुं शक्यम्। तस्माद्व्याप्तिग्रहणस्मरणाभ्यां पूर्वं समकालं वा शब्दं प्रवृत्तिं च सह दृष्टवतश्शब्दादर्थप्रतीतिर्भवति। स्मृताश्चार्था अनिर्ज्ञातशक्तयस्संसर्गप्रतीतिमुपजनयन्ति। सम्बन्धयोग्येन विभक्त्यर्थकारकादिरूपेण सहैव स्मृता अर्थास्संसर्गप्रतीतिं कुर्वन्ति। यदा चायं बालः प्रौढस्सन्नूहापोहसमर्थो भवति, तदा आत्मनश्शब्देभ्यो ज्ञानोत्पत्तिं दृष्ट्वा शब्दानां ज्ञानजनने शक्तिमवगच्छेदपि। तस्माच्छब्दार्थसम्बन्धज्ञानात्प्रागेव शब्दाज्ज्ञानोत्पत्तेः 'शब्दादर्थज्ञानमनुमानमेव; न प्रमाणान्तरम्' इति बौद्धानां पक्षः प्रत्युक्तः। अवश्यं हि सम्बन्धावगमपूर्विका सम्बन्धिदर्शनेन सम्बन्ध्यन्तरे बुद्धिरनुमानेऽन्तर्भवत्येव। तस्मात्सहदर्शनमेव व्युत्पत्तिः॥

ननु न हि प्रयोजकस्य पुरुषस्य प्रवर्तना प्रयोज्यपुरुषविषया लिङादिभिस्सह बालेन ज्ञायते; येन लिङार्थीं (ङादीन् ?) श्रुत्वा बालस्तस्याः स्मरेत्॥

अत्रोच्यते—यथा बालस्सहदर्शनेन व्युत्पन्नः परवचनात्परस्य प्रवृत्तिं पश्यन्स्वयमस्मान्प्रवर्तयितुकामो वाक्यं प्रयुङ्क्ते। तदात्मनि प्रत्यक्षेण परप्रवर्तनां पश्यति। तां दृष्ट्वैवमवगच्छति—नूनं सर्वेऽपि पुरुषाः परप्रवृत्त्यर्थं हि लिङादि प्रयुञ्जानाः परोऽस्मिन्नर्थे प्रवर्ततामिति सङ्कल्परूपामाज्ञानुज्ञादिशब्दवाच्यां प्रवर्तनां कृत्वैव प्रयुक्तवन्त इति। तदेवं सर्वमुपपन्नम्॥

ननु च यदि पुरुषस्य हितप्रवर्तनां लिङादयोऽभिदध्युः, तदा वैदिकानि वाक्यानि पौरुषेयाणि प्रसज्येरन्। पुरुषस्य हितप्रवर्तना लोके स्वकृतादेव वाक्यात्प्रतीयते, स्वप्रयुक्तस्य वा पुरुषस्य वाक्यात्॥

उच्यते—राजभृत्यानां हि राज्ञः केनापि कारणेन मतं जानतामप्रयुक्तानामपि राजवचनाज्ञापनदैः पुरुषै राजाज्ञायाः प्रतिपत्तिर्दृश्यते; तथा हि—राजभृत्या राजाज्ञां तेनाबोधिता अप्येवं राजा युष्मानाज्ञापयतीति परेभ्यः कथयन्ति। ततस्तेऽपि राजाज्ञां प्रतिपद्यन्ते। एवं वैदिकानि वाक्यानि पुरुषाज्ञां प्रतिपादयिष्यन्ति।

अथ स्याद्वैदिकान्यपि वाक्यानि राजपुरुषवाक्यवत्पुरुष एवमाज्ञापयतीति प्रतिपादयेयुः; न पुनरित्थं कुर्यादिति। मैवम्॥ राजमयतां (राजभयात् ?) कुरु माकार्षीरित्यपि

वचनदर्शनात् । अथवा विधिप्रतिषेधानामित्थमीश्वराज्ञेत्येवंविधेन वाक्येनैकवाक्यतया विधिप्रतिषेधा ईश्वरस्याज्ञाः स्युः । तथा 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति' इत्यादिकेन वचनेन धर्मान्विधाय 'एष आदेशः, एष उपदेशः, एषा वेदोपनिषत्, एतदनुशासनम्' इति हि विधीनामाज्ञारूपत्वं श्रूयते । किञ्च 'एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवान्दर्वि पितरोऽन्वायत्ताः' इति श्रुतिः पूर्वोक्तमनुशासनं परमपुरुषस्येति ज्ञापयति । किञ्च 'दिशः श्रोत्रे वाग्विवृताश्च वेदाः' इति वेदानामीश्वरवचनत्वं श्रूयते । न च नित्यत्वेऽपि वेदानामीश्वरनियोगत्वं विधीनामनुपपन्नम् । 'अग्नीदग्नीन्विहर' इत्यादिवदुपपत्तेः । तस्मात्पुरुषनियोगो विधिः । अत एव स्वर्गकामो यजेतेत्यत्र भङ्गुरयागस्य स्वर्गसाधनत्वानुपपत्त्या क्रियाव्यतिरिक्तं किञ्चित्कल्प्यमित्येतदपि परास्तम्; अतीतेऽपि यागे स्वाज्ञाकरणेनाराधितस्य परमपुरुषस्य हविर्भोजनेनाराधितानामिन्द्रादिदेवतानां च फलप्रदातृत्वेन यागस्य स्वर्गसाधनत्वोपपत्तेः ॥

ननु चापूर्वस्यानभ्युपगमे प्रयाजादीनामङ्गत्वन्न स्यात् । न हि देवतादि तत्करणशरीरं निष्पादयन्ति । नापि तस्योपकुर्वन्ति । काम्यानां फलसद्भावेऽपि नित्यनैमित्तिकानां फलाभावात् यावत्फलमनवस्थानाच्च ॥

उच्यते—तत्रापीश्वराज्ञया प्रवर्तमानस्येश्वरसन्तोषफलं भविष्यति; लौकिकसेवकस्य सेव्यसन्तोषवत् । न च वाच्यं कर्मणां देवताराधनत्वे देवतां प्रति कर्माण्युपसर्जनानि स्युः । ततः तस्य देवताप्रयुक्तत्वादनुष्ठानस्य देवतानां कर्मानङ्गत्वात् तदभिधायिनां मन्त्राणां कर्माङ्गप्रकाशरूपदृष्टकार्यस्याभावात्फलप्रकाशनस्य प्रोत्साहनस्यान्यस्यैव वाऽभावाददृष्टार्थानां सतां प्रयाजादीनामिव विकृतिषु अनूह एव स्यादिति । आराध्यभूतानां देवतानामेव कर्माणि प्रति कारकत्वरूपेणाङ्गत्वस्यापि विद्यमानत्वात् । यथा लोके वयस्यैः स्वसेनापतिभिस्सह कन्दुकमृगयादिलीलारसमनुभवतां राज्ञां तत्र तत्र गुणभावः, तत्रैव तेषामपराधदर्शने स्वाभाविकं प्रभुत्वं च विद्यते, तथा देवतानामपि क्रियानिर्वर्तकत्वेन क्रियाङ्गत्वं देवपूजाद्यात्मनो यागादेस्तदाराधनत्वेनाराध्यत्वं 'स एवैनं भूतिं गमयति' इत्यादिवाक्यत्रयोदितफलप्रदातृत्वेन प्रभुत्वञ्चाविरुद्धम् ॥

ननु च 'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः' 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इत्यादिभिः परमपुरुषस्यैव सर्वेषु यागेषु हविर्भोक्तृत्वं फलप्रदातृत्वञ्चावगम्यते। तत्कथमिदमुपपद्यते। 'अङ्गान्यन्या देवता' इति श्रुतेः परमपुरुषस्य शेषभूतानीतराणि दैवतानि। तस्मात्तेषामाराधनमेव तदाराधनं, भोगश्च तथैवेति कृत्वा तस्य सर्वेषु यागेषु भोक्तृत्वाभिधानं प्रभुत्वाभिधानञ्च भवति। भृत्यपोषणे स्वामिनस्सन्तोषो भवत्येव॥

एवं यागादिकर्मभिरुपासनेनाराधितस्य परमपुरुषस्य भोगापवर्गरूपफलप्रदातृत्वं श्रूयते—'स वा एष महानज आत्मान्नादो वसुदानः, 'एष ह्येवानन्दयाति' इति। एवमिन्द्रादिदेवतानां परमपुरुषस्य चाराध्यतया (ध्यता ?) स्वयं (?) उपपद्यते। तासां देवतानां तत्तदैश्वर्यफलप्रदातृत्वशक्त्यादिगुणयोगः परमपुरुषप्रसादलब्ध इति तासां तस्य च फलप्रदातृत्वञ्चोपपन्नम्॥

तदेवं लोके प्रयोक्तृपुरुषनियोगो विधिः, वेदे तु परमपुरुषनियोग इति सर्वत्र पुरुषनियोगो विधिः। यत्सहदर्शनं व्युत्पत्तिरित्युपपादितम्, यश्च पुरुषनियोगो विधिरिति तदेतद् द्वयमपि 'तैरेव शब्दैस्तेषु तेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोस्सम्बन्धान्तरादर्शनात्सङ्केतयितृपुरुषाज्ञानाच्च तेषु तेष्वर्थेषु शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति' इति भाष्यात् 'स्वशासनानुवर्तिनः परमपुरुषोऽनुगृह्णाति, तदतिवर्तिनो निगृह्णाति' इति भाष्याच्च **भगवता भाष्यकारेणा**ङ्गीकृतमिति गम्यते। तस्मात्सर्वं समीचीनम्॥

इति नीतिमालायां

विधिस्वरूपनिर्णयाधिकारोऽष्टमः॥

श्रीः

# नीतिमालायां

## नवमाधिकार आरभ्यते.

अथ निश्श्रेयससाधनभूतं वेदनं निर्णीयते—

वेदान्तवाक्यजं ज्ञानमपवर्गस्य साधनम् ।
केचिदाहुरथान्ये तु साङ्ख्ययोगसमुच्चयम् ॥

विवेकाद्यैरनुद्धर्षपर्यन्तैस्सप्तहेतुभिः ।
निष्पन्नं भक्तिपर्यायं वेदनं वेदवित्तमाः ॥

'वेदान्तविज्ञानसुनिश्चितार्थास्सन्न्यासयोगाद्यतयश्शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' 'तरति शोकमात्मवित्' इत्यादिश्रुतिभिर्वेदान्तवाक्यजन्यं ज्ञानमविद्यानिवृत्तिलक्षणमोक्षसाधनतयावगतम् । तस्माद्वेदान्तवाक्यानि यज्ञादिनिर्बर्हितकल्मषस्य ब्रह्मविषयकाविद्यानिवर्तकं ज्ञानं जनयति। तज्ज्ञानं यावदन्तःकरणबहिःकरणजन्यविपरीतचेष्टा न शाम्यति, तावन्तं कालं प्रतिबद्धफलं तिष्ठति। तत्र श्रवणेन शक्तितात्पर्यावधारणे कृते मनननिदिध्यासनाभ्यामसम्भावनाविपरीतसम्भावनानिरासे च कृते तदेव शब्दजन्यं ज्ञानमपरोक्षरूपं सदशेषाज्ञानं तत्कार्यनिर्लेपं निवर्तयति। न च शब्दस्य परोक्षज्ञानहेतुत्वन्न सम्भवतीति वाच्यम्; प्रमेयवैषम्यादुपपत्तेः। तथाहि—घटाद्यानात्मवस्तु स्वविषयाज्ञाननिवृत्तिव्यतिरेकेण स्वसंसर्ग(र्गि)प्रकाशमपि प्रमाणफलत्वेनापेक्षते; अस्वयम्प्रकाशरूपत्वात्। आत्मवस्तु स्वयम्प्रकाशत्वात्स्वाज्ञाननिवृत्तिव्यतिरेकेण प्रकाशसंसर्गं प्रमाणफलत्वेन नापेक्षते। ततश्चावधरितशक्तितात्पर्यनिश्चयशब्दजन्यविज्ञानेन स्वविषयाज्ञाननिवृत्तौ ब्रह्म स्वयमेवापरोक्षं

भवति। न च ध्यानेनाविद्यानिवृत्तिस्सम्भवति; तस्य प्रमाणज्ञानत्वाभावान्मिथ्याभूतस्य संसारस्य प्रमाणज्ञानैकनिवर्त्यत्वाच्च। तस्माद्वाक्यार्थज्ञानं निश्श्रेयससाधनमिति केचिदाहुः।

तदयुक्तम्; 'आत्मा वा अरे ज्ञातव्यः' 'आत्मा वा अरे द्रष्टव्यः' इत्यादिभिरात्मध्यानस्य विधेयत्वावगमाद्वाक्यार्थज्ञानस्याविधेयत्वाच्च। न च वाक्यजन्यज्ञानेनाविद्यानिवृत्तिर्दृश्यते। यदुक्तं प्रथमं वाक्यार्थज्ञानं प्रतिबद्धफलं तिष्ठति; तत्र श्रवणादिभिः प्रतिबन्धे निवृत्ते तदेवाविद्यां निवर्तयतीति॥ तदप्ययुक्तम्; बाधकज्ञानेन प्रतिबन्धकहेतूनामपि मिथ्यात्वेन बाधितत्वात्प्रतिबन्धासम्भवात्। द्विचन्द्रज्ञानवत्सम्भवतीति चेत्, नैवम्; तत्र द्विचन्द्रज्ञानहेतोः पारमार्थिकस्य काचादेरौषधविनाश्यत्वेन ज्ञानसाध्यत्वाभावात्तत्सम्भव उपपन्नः। तस्माद्वाक्यार्थज्ञानस्य प्रतिबद्धफलत्वमनुपपन्नम्।

न चासम्भावनाविपरीतसम्भावनानिरसनयोः प्राग्बाधकज्ञानं नोत्पद्यत इति वाच्यम्; सामग्र्यां सत्यां ज्ञानानुत्पत्त्यनुपपत्तेः। यच्चोक्तं शब्दोऽपरोक्षज्ञानं जनयतीति, तदप्यसङ्गतम्; अदृष्टत्वात्।

यदप्युक्तं प्रमेयवैषम्यात्तदपरोक्षं भवतीति, तदपि न मनोहरम्; आत्मनः प्रमेयत्वानङ्गीकरणात्। प्रमाणज्ञानेन तद्गताज्ञाननिवृत्त्या तस्यापि प्रमेयत्वमौपचारिकं विद्यत इति चेत्, तदपि न सिद्ध्येत्; तस्याज्ञानतदाश्रयत्वादेर्निरस्तत्वात्। यच्चेदमुक्तं संसारस्य मिथ्यात्वेन प्रमाणज्ञानेन निवर्त्यते, न ध्यानेनेति; तदपि तस्य पारमार्थ्योपपादनान्निरस्तम्। 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति श्रुतिश्च न वाक्यजन्यज्ञानस्यापवर्गसाधनत्वं ब्रूते; 'सन्न्यासयोगाद्यतयश्शुद्धसत्त्वा' इति ज्ञानोत्तरकालभाविनस्सन्न्यासादेरपि परिकरतया प्रतिपादनात्। तस्मान्न वाक्यजन्यज्ञानं निश्श्रेयससाधनमिति॥

अन्ये तु वदन्ति—साङ्ख्ययोगोऽप(गाव?)वर्गस्य साधनम्। तत्त्वानामवधारणं साङ्ख्यम्। तद् द्विविधम्, श्रवणं मननञ्चेति। तत्र सविशेषध्यानं सम्भूतिरित्युच्यते। निर्विशेषध्यानं विनाश इत्युच्यते। कर्मयोगस्तु वाक्कायबाह्यार्थजः। तच्च त्रिविधमनुष्ठानम्—ईश्वरार्थानां कर्मणां करणम्, इतरेषाञ्च त्यागः, सर्वफलसन्न्यासश्चेति। एवंविधाभ्यां समुच्चिताभ्यां

साङ्ख्ययोगाभ्यामपवर्गप्राप्तिः। 'तत्कारणं साङ्ख्ययोगाधिगम्यम्' इति श्रुतेः। ज्ञानयोग-कर्मयोगयोस्तु समुच्चयोऽन्यत्र परिव्राजकेभ्यः। तेषां तु ज्ञानयोगः। सम्भूति-विनाशयोस्तु सर्वत्र समुच्चयो भवति। ज्ञानयोगकर्मयोगयोस्सम्भूतिविनाशयोश्च समुच्चयः श्रुतिसिद्धः। 'विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह', 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।' सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयं सह। विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते' इति। यथोक्तं—'समुच्चयांस्त्रीनिह वर्णयन्ति साङ्ख्यस्य योगस्य च वै स पूर्वः। ज्ञानक्रियायोगगतो द्वितीयस्तथैव सम्भूतिविनाशजोऽन्यः।' इति। तस्मात्साङ्ख्ययोगाभ्यामपवर्ग इति॥

तदप्यनुपपन्नम्। 'तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते' इत्यादिभिः श्रुतिभिर्वेदनस्यैवापवर्गसाधनत्वश्रवणात्, तदितरस्य साधनत्वनिषेधाच्च। तत्कारणं साङ्ख्ययोगाधिगम्यमित्याद्युक्तलक्षणयोस्साङ्ख्ययोगयोरपवर्गफले समुच्चयो न विधीयते। अपि तर्हि 'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्' इति स्मरणात्साङ्ख्ययोगशब्दौ ज्ञानयोग-कर्मयोगवचनौ। ताभ्यामनुष्ठिताभ्यां परमात्मसाक्षात्कारो भवतीत्युच्यते; अधिगतेर्ज्ञानार्थत्वात्, पूर्वोक्तश्रुतिविरोधाच्च। विद्यां चाविद्यां चेत्यनेनापि विद्याविद्ययोर्नापवर्गफले समुच्चय उच्यते। मृत्युतरणामृतत्वप्राप्तिफलभेदस्य तयोः सुव्यक्तत्वात्। अत्राविद्याशब्देन विद्येतरत्वाद्विहितं वर्णाश्रमप्रयुक्तं कर्मोच्यते। मृत्युशब्देन च विद्योत्पत्तिविरोधि प्राचीनं कर्मोच्यते। सम्भूतिञ्च विनाशञ्चेत्यस्यापि वाक्यस्यायमेवार्थः—विदुषो विद्यासाध्यस्यापवर्गस्य सम्यगभिवृद्धिरूप-त्वात्सम्यगभिवृद्धिपर्यायस्सम्भूतिशब्दो लक्षणया तत्साधनभूतविद्यावचनः। कर्मफलस्य विनाश-गर्भत्वात्फलवचनो विनाशशब्दो लक्षणया तत्साधनकर्मवचनः। अनयोस्सम्भूतिविनाशशब्द-योस्सविशेषनिर्विशेषध्यानवाचित्वं लक्षणयापि न सिद्ध्यति। तस्माद्यथोक्त एवार्थः। अत-स्साङ्ख्ययोगौ समुच्चितावपवर्गसाधनमिति न युक्तम्॥

त्रय्यन्तविदग्रेसरास्त्वेवमभिदधति—'ब्रह्मविदाप्नोति परम्' 'रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम्' इत्यादिभिर्वाक्यार्थज्ञानविलक्षणं तन्मूलं विवेकादिपरिशुद्धमनोजन्यं ध्यानोपासनध्रुवानुस्मृतिशब्दवाच्यं साक्षात्कारसदृशञ्चेत्यद्भुतपरमपुरुषार्थप्रियत्वेन स्वय-मप्यत्यर्थप्रियत्वमापन्नं तत एव भक्तिशब्दवाच्यं वेदनमपवर्गसाधनतया विधीयते। कुत इद-

मवगम्यत इति चेत्, 'अनुविद्य विजानाति' 'विज्ञाय प्रज्ञां कुर्वीत' इति श्रुतेः विज्ञानपर्यायस्य वेदनस्य वाक्यार्थज्ञानमूलत्वं तत एव तद्वैलक्षण्यं चावगम्यते। 'आहारशुद्धौ सत्त्वशुद्धिः' 'शान्त उपासीत' 'सदा तद्भावभावितः' 'क्रियावानेष ब्रह्मविदां वरिष्ठः' 'यज्ञेन दानेन तपसानाशकेन' 'सत्येन लभ्यः' 'नायमात्मा प्रवचनेन लभ्यः' 'शान्तो दान्तः' इत्यादिशास्त्रैर्विवेकादिसप्तकसाचिव्यं मनसोऽवगम्यते। विवेकादिभ्यो वेदनलब्धिर्**ब्रह्मनन्दिना**भिहिता-'तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः' इति। सात्त्विकाहारसेवया शरीरेन्द्रियशोधनं विवेकः। कामानभिष्वङ्गो विमोकः। उपास्यसंशीलनमभ्यासः। यथाशक्ति वर्णाश्रमधर्मानुष्ठानं क्रिया। आर्जवाद्यात्मगुणाः कल्याणानि। शोकहेतुषूपस्थितेष्वपि मनसोऽवसादराहित्यमनवसादः। हर्षहेतुषूपस्थितेष्वप्यतिसन्तोषराहित्यमनुद्धर्षः। परिशुद्धं मन एवास्य वेदनस्य साधनमिति च 'मनसैवानुद्रष्टव्यम्' 'दृश्यते त्वग्र्यया बुद्ध्या' 'न चक्षुषा गृह्यते नापि वाचा' 'मनसा तु विशुद्धेन' इति श्रुतेरवगम्यते। ध्यानोपासनध्रुवानुस्मृतीनां वेदनपर्यायत्वं तत्तच्छब्दनिर्दिष्टानामपवर्गसाधनत्वोपदेशाद्वेदनव्यतिरिक्तस्य साधनत्वनिषेधश्रुतेश्चावगम्यते। 'यदा पश्यः पश्यते रुक्मवर्णं' 'तस्मिन् दृष्टे परावरे' इत्यादिश्रुतिभिर्वेदनस्य साक्षात्कारदशापत्तिर्विज्ञायते। 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' 'मद्भक्तिं लभते पराम्' इत्यादिशास्त्रादस्य भक्तिरूपत्वमवगम्यते। तस्माद्भक्तिपर्यायं वेदनं निश्श्रेयससाधनमिति निश्चीयते। एवं सति 'तमेवं विद्वानमृत इह भवति' 'भक्त्या लभ्यस्त्वनन्यया' 'भक्त्या त्वनन्यया शक्यः' इति श्रुतिस्मृतयस्सङ्गता भवन्ति॥

ननु 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः'

'वर्णाश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः॥' इति

कर्मैकसाध्यत्वं निश्श्रेयसस्यावगम्यते। तत्कथं भक्त्यैकसाध्यत्वम्?

उच्यते—'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यनेन तावन्निश्श्रेयसस्य न कर्मसाध्यत्वमुच्यते। अपि तर्हि ज्ञाननिष्ठायाः कर्मसाध्यत्वमुच्यते। 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इत्यनेनैकार्थ्यात्। तत्र

सिद्धिं प्राप्तो यथा ब्रह्म तथा प्राप्तो निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥

इत्यादिना 'मद्भक्तिं लभते पराम्'

'भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥'

इत्यन्तेन कर्मणां ज्ञाननिष्ठापरपर्यायसिद्धिहेतुत्वप्रतिपादनाद्ब्रह्मप्राप्तिलक्षणस्य निश्श्रेयसस्य परभक्तिलभ्यत्ववचनाच्च वर्णाश्रमाचारवतेत्यनेनापि त्रैवर्णिकैस्स्ववर्णाश्रमधर्मानुष्ठानेन भगवत्सन्तोषः कर्तव्यः (न ?) प्रकारान्तरेणेत्युच्यते ; न तु कर्मणां निश्श्रेयससाधनत्वमिति नात्र कश्चिद्विरोधः ॥

अथ स्यात्—उपासनस्य निश्श्रेयससाधनत्वे

'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'।
'ज्ञानं हि सर्वपापानि नाशयिष्यत्यसंशयम्' ॥

'ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ।
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकल्मषम्'॥

इत्यादिश्रुतिस्मृतिभिर्यत्तस्य पापक्षयहेतुत्वमवगम्यते, तदनुपपन्नं स्यात्। न चोभयत्र विनियोगात्तस्योभयफलत्वं युक्तम् ; सन्ध्यावन्दनज्योतिष्टोमादीनां कर्मणामुद्गीथाद्युपासनानां चैकफलत्वनियमदर्शनात् ॥

अथ सेतुदर्शनचान्द्रायणादिकर्मणामेकस्यैव पापक्षपणपुत्रादिनानाफलसाधनत्वं दृश्यत इति ; सत्यम्। तत्र प्रयोगभेद उपपद्यते। इह त्वाप्रायणमावर्तमानस्योपासनस्यैकशास्त्रार्थत्वात्फलभेदो नोपपद्यते। तस्माद्ध्यानस्य पापक्षपणं ब्रह्मप्राप्तिर्वा फलं भवेत्। तत्राप्यक्षीणकल्मषस्य ब्रह्मप्राप्त्यसम्भवात्कल्मषक्षय एवोपासनफलमभ्युपेयमिति नोपासनस्य निश्श्रेयससाधनत्वमिति ॥

नैतदेवम् ; सकृत्प्रयुक्तस्यैकस्यैवानेकफलत्वोपपत्तेः। एकैको हि मणिमन्त्रौषधादिर्विषं हन्ति। अणिमाद्यैश्वर्यञ्चावहति। परं पीयमानं पयः पित्तमपहन्ति तृषं च वारयति (इति ?) दृश्यते। वैदिकानामपि कर्मणां सकृदनुष्ठितानां नानाफलत्वमवगम्यते। 'ज्योतिष्टोमेन स्वर्गकामो यजेतैककामस्सर्वकामोऽपि' इत्यापस्तम्बवचनात्। एकस्मिन्प्रयोगे सर्वान्कामान्कामयीत प्रयोगप्रतीत्यैवैकैकमित्यार्षवचनाच्च। विशेषतो भगवन्माहात्म्यात्तदुपासनस्यानेकफलत्वमुपपन्नम्। स्मर्यते च तस्य नानाफलत्वम्—

'आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम्।
पापक्षयश्च भवति स्मरतां तमहर्निशम्॥

भावं मनोरथं यच्च स्वर्गवन्धश्च यत्पदम्।
ददाति ध्यायतां नित्यमपवर्गप्रदो हरिः॥

रत्नपर्वतमारुह्य यथा रत्नं नरो मुने।
सत्त्वानुरूपमादत्ते तदा कृष्णान्मनोरथम्'॥ इत्यादिभिः

तस्माद्ब्रह्मोपासनस्य सकलकल्मषक्षपणमर्चिरादिगतिर्ब्रह्मप्राप्तिश्चेति त्रीण्यपि फलानि स्युः। तदेवं भक्तिपर्यायं वेदनं निश्श्रेयससाधनमिति सिद्धम्॥

अत्र केचिद्भगवद्गुणप्रवीणा एवं वर्णयन्ति—यतोऽभ्युदयनिश्श्रेयससिद्धिस्स धर्मः। स च द्विविधः सिद्धः साध्यश्चेति। तत्र साध्यो यागदानहोमोपासनादिः। सिद्धो ज्ञानशक्तिबलैश्वर्यादिगुणसम्पन्नो भगवान्। 'कृष्णं धर्मं सनातनम्' 'स हि धर्मस्सनातनः' इत्यादिस्मरणात्। तस्यापवर्गसाधनत्वं श्रूयते। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इति। स्मर्यते च—

'शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम्॥

सोऽहं त्वां शरणमपारमप्रमेयं सम्प्राप्तः परमपदं यतो न किञ्चित्।
संसारश्रमपरितापतप्तचेता निर्वाणे परिणत धाम्नि साभिलाषे॥'

इत्यादिभिः। तस्माद्भगवानप्युपायतयोपादेयः। तदुपादानं नाम तत्प्रपदनम्। निवेदनं निक्षेपो न्यासः प्रपदनमिति पर्यायाः। तच्च तदेकोपायत्वप्रार्थनलक्षणम्। तत्र ये संसारोद्विग्नमानसाः भगवच्चरणद्वन्द्वाभिलाषिण उक्तलक्षणसाध्योपायेऽधिकारशक्तिवाञ्छानिवेशनं न लभन्ते, ते भगवत्प्रसादेन तस्मिन्विस्रम्भशालिनस्तमेवोपाददते। सोऽपि तेषां गुणदोषावविगणय्य योगक्षेमं विदधाति। यत एवमाह—

'अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।'
'मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन॥' इति॥

न चैतदितरोपायोपादानवद्देशकालादिनियमापेक्षम्; प्रपदनीयमाहात्म्यात्। द्रुपदात्मजावृत्तान्तोऽपि भगवत्प्रपदनस्य नियमानपेक्षत्वं द्योतयति। सा हि स्त्रीधर्मिणी सत्येव परिषदि परपरिभवापजिहीर्षया भगवन्तं प्रापद्यत। सोऽपि तस्याः परिभवमसन्निधान एवापाचकारेति हि पञ्चमाम्नायप्रसिद्धिः। तत्प्रपदनं प्रपदनीयपुरुषविशेषेषु नियमा(मो?)पेतमपि क्रियते। यथा सागरतरणाभिलाषिणा भगवता दशरथात्मजेन प्राङ्मुखत्वदर्भासनादिनियमोपेतेन वरुणं प्रति। तदपि प्रपदनीयस्य लाघवेन वा प्रपद्यमानस्य वृत्तशालितया हि(वा?) सञ्जातमित्यवगन्तव्यम्॥

परमपुरुषे प्रपदनीये तु न नियमलेशोऽप्यपेक्षितः। तस्मात्तदनन्यगतिभिस्स एवोपादेयत्वेनोपादेय इति तस्मिन्नेतस्मिन् सिद्धोपाये महाभागधेये महाविस्रम्भशालिनां लोकोत्तराणामेवाधिकारः इति भगवान् **बादरायणः** पूर्वोक्तमुपासनमेवापवर्गसाधनं निरणैषीत् 'आवृत्तिरसकृदुपदेशात्' इत्यादिना। तस्माद्यथाधिकारमुपाय उपादेयः॥

इति नीतिमालायां

निःश्रेयससाधननिर्णयाधिकारो नवमः॥

---

श्रीः

# नीतिमालायां

## दशमाधिकार आरभ्यते.

अथ निश्श्रेयसस्वरूपं निर्णीयते—

अविद्याया निवृत्तिं तु केचिन्मोक्षं प्रचक्षते ।
निवृत्तसकलोपाधिब्रह्मभावमथापरे ॥

अर्चिरादिकया गत्या परञ्ज्योतिरुपेयुषः ।
विदुषः स्वात्मयाथात्म्यप्रादुर्भावपुरस्सरम् ॥

परमव्योमनिष्ठस्य दिव्यमूर्तेः परात्मनः ।
निरङ्कुशं त्वनुभवमाहुस्त्रय्यन्तवित्तमाः ॥

अस्मिन्निश्श्रेयसे वादिनो बाह्या विवदन्ते। तथाहि—बौद्धैकदेशा माध्यमिकाः प्रकृष्टशून्यभावनया शून्यभावापत्तिं मोक्षमाचक्षते। योगाचारप्रभृतयस्तु स्वलक्षणभावनया क्षणिकत्वभावनया च विषयोपरागविधुरविज्ञानसन्तानम्। आर्हतास्तु सम्यग्दर्शनचारित्रैः प्रक्षीणाखिलमलस्याविर्भूतसकलगुणस्य लोकान्तरेऽवस्थानम्। अक्षपादकणादमतानुसारिणो वैशेषिका आत्मगुणोच्छेदम्। प्राभाकराश्च तथैव। भाट्टास्तु मनःकरणकेन ज्ञानेनानन्दानुभवम्। विवर्तवादिनोऽविद्यानिवृत्तिम्। उपाध्यवच्छिन्नजीववादिनस्तु निर्मुक्तोपाधेस्तस्य ब्रह्मभावम्। त्रय्यन्तार्थयाथात्म्यविदस्तु उपासनप्रीतपरमपुरुषप्रसादात्प्रक्षीणाखिलपुण्यपापसञ्चयस्यार्चिरादिना मार्गेण परञ्ज्योतिरुपसम्पन्नस्याविर्भूतस्वाभाविकापहतपाप्मत्वादिगुणस्य सविभूतिकभगवद्विषयो नित्यासङ्कुचितापरोक्षानुभवो मोक्ष इति वदन्ति ॥

तत्र बौद्धपक्षे बन्धमोक्षान्वयिनः स्थायिनो भोक्तुरभावान्मोक्षो दुर्घटः। अर्हन्मतेऽपि चिद्रूपस्य वा अचिद्रूपस्य वा स्वयं परिणामरहितस्य तस्य स्वतोऽप्रतिसङ्क्रमत्वाच्चेतना(न ?)धिष्ठितत्वाच्च गमनानुपपत्तेस्तत्पूर्वकलोकान्तरावस्थानलक्षणं निश्श्रेयसमनुपपन्नम् ॥

ज्ञानसुखादिगुणोच्छेदलक्षणमोक्षपक्षेऽपि संज्ञा(विसंज्ञ ?)त्वात्सुखानुभवाभावात्तत्स्वरूपाव(पो ?)च्छेदकल्पत्वं मोक्षस्य स्यात्। अथ तत्र सुखाभावेऽपि दुःखाभावस्य विद्यमानत्वात्पुरुषार्थत्वमुच्यते। तन्न; दुःखाभावस्याप्यननुभाव्यत्वेनापुरुषार्थत्वस्यावर्जनीयत्वात्। न हि पाषाणादेर्दुःखाभावः पुरुषार्थतया प्रसिद्धः। भाट्टमतेऽपि संसारदशायां करणाधीनज्ञानस्य विषयाधीनसुखस्य चात्मनो मोक्षदशायामकरणकत्वाच्छब्दादिविषयाधीनत्वाच्च ज्ञानसुखयोरसम्भवादानन्दानुभवो न सम्भवति ॥

अथ तत्रापि मनसो नित्यत्वेन विद्यमानत्वात्स्वरूपस्यानुकुलत्वाच्च ज्ञानानन्दौ सम्भवेताम्। नैवं सम्भवतः; मनसो नित्यत्वेऽप्यात्ममनसोर्विभुत्वाभ्युपगमेनान्यतरकर्मजस्योभयकर्मजस्य वा संयोगस्यानुपपत्तेः ज्ञानोत्पत्त्यसम्भवात्। ज्ञानानन्दयोस्सम्भवेऽपि तयोरुत्पत्तिमत्त्वेनान्तवत्त्वमपि प्रसज्येत ॥

विवर्तवादेऽप्यविद्यानिवृत्तेर्दुर्निरूपत्वात्तस्य निश्श्रेयसत्वं दुरुपपादम्। तथाहि— केयमविद्यानिवृत्तिर्नाम? यद्यविद्यायाः प्रध्वंसः, तदा तस्याभावरूपत्वाङ्गीकाराद्घटादितुल्यत्वेन तत्प्रध्वंस इव निवृत्तिशब्देन तस्यावस्थान्तरप्राप्तिरुक्ता स्यात्। प्रध्वंसप्रागभावौ हि द्रव्यस्यावस्थाविशेषौ। मृद्द्रव्यस्य पृथुबुध्नोदराकारत्वं हि घटत्वम्। तस्यैवोत्तरकालभाविनी कपालत्वावस्था प्रध्वंसः। पूर्वकालभाविनी पिण्डत्वावस्था प्रागभावः। मृद्द्रव्यन्तूभयावस्थायामनुवृत्तम्। घट उत्पद्यते नश्यतीति व्यवहारौ तदवस्थानिबन्धनौ; तदतिरिक्तस्य कस्यचिदनुपलम्भात्। एवं सर्वेषु द्रष्टव्यम्। तस्मादविद्यानिवृत्तिरपि तद्द्रव्यस्यावस्थाविशेष इत्यङ्गीकर्तव्यम्। तथा सति तेनैव द्रव्येण ब्रह्म सद्वितीयमापतेत् ॥

अथाविद्या न द्रव्यमित्युच्यते, तथा सति तत्कार्यस्य प्रपञ्चस्यापि न द्रव्यत्वं स्यात्। यदि ब्रह्मैवाविद्यानिवृत्तिरिति मतम्, तदा तस्य नित्यत्वेन ब्रह्मज्ञानवैयर्थ्यं बन्धाभावश्च प्रसज्येत।

अस्त्वविद्यानिवृत्तिः, तथापि तस्य पुरुषैरर्थ्यत्वासम्भवान्न निश्श्रेयसत्वं सिद्ध्यति। तस्याभावरूपत्वेऽपि दुःखनिवृत्तिरूपत्वात्पुरुषार्थत्वं सम्भवतीत्यपि न वाच्यम्; दुःखनिवृत्तेः पुरुषार्थत्वासम्भवस्योक्तत्वात्।

अथ स्यान्नास्माभिरविद्यानिवृत्तिमात्रं निश्श्रेयसमित्युच्यते, किन्तर्हि निवृत्तायामविद्यायां सुखैकतानब्रह्मस्वरूपस्याविर्भावो भवति। स आविर्भावो निश्श्रेयसमिति। तदप्यनुपपन्नम्; आविर्भावस्यैवासम्भवात्। तत्त्वज्ञानात्पूर्वं ब्रह्मणः तिरोधानसम्भवे हि पश्चात्तस्याविर्भावस्सम्भवति। निर्विशेषस्य स्वयम्प्रकाशस्य ब्रह्मणस्तिरोधानं न सम्भवतीति हि पूर्वमेवोक्तम्। ब्रह्मण एव सुखरूपत्वञ्च निरस्तम्। यद्यपि सुखरूपस्य ब्रह्मण आविर्भावः, तथापि तस्य पुरुषार्थत्वन्न सिद्ध्यति; तत्स्वरूपस्यार्थ्यत्वाभावात्। न हि कश्चिदहं भूयासमित्याशास्ते; किन्तु सुखी भूयासमिति॥

स्यान्मतम्—येन सुखसम्बन्ध आशास्यते सुखी भूयासमिति, तेनापि न सुखसम्बन्धोऽर्थ्यते, किन्तर्हि? सुखापरोक्ष्यम्। तत्रापि तस्य विद्यमानत्वात्पुरुषार्थत्वं सम्भवतीति। तच्च नैवम्; विवेकहेत्वभावात्।

अस्तु सुखापरोक्ष्यं पुरुषार्थः; तदपि न सिद्ध्यति। सुखापरोक्ष्यं हि सुखसाक्षात्कारः। साक्षात्कर्तरि ज्ञातरि विद्यमाने हि साक्षात्कारो भवति। तस्मादविद्यानिवृत्तिर्मोक्ष इत्येतन्मतं न समीचीनम्॥

यन्निवृत्तोपाधेर्जीवस्य ब्रह्मभावो मोक्ष इति, तदपि चिन्त्यम्। कोऽयं जीवस्य ब्रह्मभावः? यद्युपाधिविगममात्रं, तदुक्तेन न्यायेन निश्श्रेयसं न स्यात्। अथोपाध्यवच्छिन्नस्यानवच्छिन्नब्रह्मैक्यं तदप्ययुक्तम्; अवच्छेदस्य निरस्तत्वात्। किञ्चायं ब्रह्मभावः उपाधिविच्छेदात्प्रागस्ति न वा? अस्ति चेदुपाधिविशेषव्यतिरेकेण न साधनानुष्ठानसाध्यं किञ्चिदस्ति। नास्ति चेत्तदानीमविद्यमानस्तत्त्वज्ञानसाध्यस्स कीदृशः? यदि ब्रह्मसारूप्यम्, जीवब्रह्मणोर्मुक्त्यवस्थायां भेदोऽङ्गीकृतः स्यात्। अथ संसारदशायां ब्रह्मविलक्षणस्य जीवस्य पश्चात्तेनैक्यं ब्रह्मभाव इति मतम्, तदसङ्गतम्; विलक्षणस्य द्रव्यस्य द्रव्यान्तरभावानुपपत्तेः। स्मर्यते च जीवस्य परमात्मैक्यनिषेधः।

'परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥' इति ॥

ननु 'ब्रह्म वेद ब्रह्मैव भवति'

'यदा तद्भावमापन्नस्तदासौ परमात्मना ।
भवत्यभेदे भेदश्च तस्माज्ज्ञानकृतो भवेत् ॥'

इत्यादिश्रुतिस्मृतिभिः मुक्त्यवस्थायां जीवस्य ब्रह्मत्वमुपपद्यते । कथमुपपद्यते? उच्यते— 'ब्रह्मविदाप्नोति परम्' 'परात्परं पुरुषमुपैति दिव्यम्' 'निरञ्जनः परमं साम्यमुपैति' 'मम साधर्म्यमागताः' इत्यादि श्रुतिस्मृतिभिर्मुक्त्यवस्थायां जीवस्य ब्रह्मणो मुक्तस्य च प्राप्यत्वप्राप्तृत्वसौसादृश्यैर्भेदावगमान्मुक्तस्य ब्रह्मत्वव्यपदेशस्सौसादृश्यनिबन्धन इति विज्ञायते। विलक्षणेष्वपि वस्तुषु सौसादृश्यनिबन्धनस्तद्व्यवहार उपपन्न इति संस्थानजातिनिर्णय एवोपपादितम् ।

अत एव हि मुक्तं प्रस्तुत्यैवमाम्नायते—'तं तु पञ्चशतान्यप्सरसां प्रति धावन्ति शतं मालाहस्ताः शतमञ्जनहस्ताः शतं चूर्णहस्ताः शतं वासोहस्ताः शतं भूषाहस्ताः तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति ब्रह्मालङ्कारेणालङ्कृतो ब्रह्म विद्वान्ब्रह्मैवाभ्युपैति' इति । अपि चास्मिन्पक्षे विवर्त च 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षन् क्रीडन् रममाण' इत्यादि श्रुतयः 'सम्पद्याविर्भावः स्वेन शब्दात्सङ्कल्पादेव तच्छ्रुतेः' 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च' इत्यादि सूत्राणि च न सङ्गच्छन्ते । तस्मात् त्रय्यन्तार्थयाथात्म्यविदां मतमेवोपादेयम् । तथा हि—'तद्यथैषीका तूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते- तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवं विदि पापं कर्म न श्लिष्यते' इति विदुषः कर्मक्षयोऽवगम्यते । 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' इति क्षीणकल्मषस्य विदुषो मूर्धन्यनाड्या उत्क्रान्तिरवगम्यते । एवमुत्क्रान्तस्य 'तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहः' इत्यादिकया तत्पुरुषो मानवः स एनान्ब्रह्म गमयति' इत्यन्तया श्रुत्या ब्रह्मप्राप्तिरवगम्यते । ब्रह्मोपसम्पन्नस्य तस्य 'परञ्ज्योतिरुपसम्पद्यते' इति श्रुतेस्संसारदशायां कर्मरूपाविद्यावेष्टनतिरोहितस्वरूपस्य स्वाभाविकापहतपाप्मत्वादिगुणाविर्भावो विज्ञायते । एवमाविर्भूतस्वरूपस्य तस्य 'यो वेद निहितं गुहायां परमे व्योमन्' 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति श्रुतेः परमव्योम-

निष्ठनित्यदिव्यविग्रहपरब्रह्मानुभवोऽवगम्यते। एवमनुभवतो मुक्तस्य 'स एकधा भवति द्विधा भवति स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' 'जक्षन् क्रीडन् रममाणस्सर्वान् लोकानाप्नोति सर्वांश्च कामान्' इत्यादिश्रुतिभिः स्वेच्छानिमित्तबहुशरीरग्रहणं स्वसङ्कल्पायत्तपित्रादिसमुत्थानं भगवद्विभूतिभूतसकललोकानुगतिश्चावगम्यते ॥

एवं मुक्तस्य जगद्व्यापारवर्जं भगवदैश्वर्यं समानम्। न च वाच्यमेवंविधमैश्वर्यं सगुणोपासननिष्ठस्य तथाविधं ब्रह्म प्राप्नुवतो मुक्तस्य; निर्गुणोपासननिष्ठस्य त्वाविर्भूतस्वरूपस्य विदुषः 'तमेवं विद्वानमृत इह भवति' 'अत्र ब्रह्म समश्नुते' इतीहैव ब्रह्मप्राप्तिवचनादिति। 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षन् क्रीडन् रममाण' इति, परविद्यानिष्ठस्याविर्भूतस्वरूपस्यैव भोगविहरणादिश्रवणात्परविद्यानिष्ठानामर्चिरादिगतिश्रवणाच्च। न च निर्गुणोपासनं नाम किञ्चिदस्ति; 'आनन्दादयः प्रधानस्य' इति सर्वासु विद्यास्वानन्दादिगुणानामुपसंहारात्। ब्रह्मणस्सगुणत्वनिर्णयाच्च।

न च मुक्तस्य भोगविहरणादिसम्भवे सति रागादयोऽवर्जनीयाः स्युः। ते च दुःखानुषक्ता भवन्ति। ततश्च पुरुषार्थत्वं मोक्षस्य न स्यात्। उच्यते—सर्वत्र न रागादयो दुःखानुषक्ताः। कर्मनिमित्तानां तेषां दुःखावहत्वात्। ते प्रतिहतकार्याः पुरुषं क्लिश्यन्ति। ये त्वकर्मनिमित्ताः निरर्गळाः कार्यं कुर्वन्ति, ते सविभूतिकभगवदनुभवानुगुणत्वात्प्रत्युत सुखायैव भवन्तीति न किञ्चिदेतत्। अतः परमव्योमनिष्ठदिव्यविग्रहं भगवन्तमनुभवतो मुक्तस्यैश्वर्यं नानुपपन्नम्। न च भगवतो देशविशेषो दिव्यविग्रहश्च नास्तीति वक्तुं शक्यम्; 'ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः' 'विज्ञानसारथिर्यस्तु, मनः प्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' 'सदापश्यन्ति सूरयः' 'दिव्यं स्थानमजरं चाप्रमेयम्।'

'वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः।
आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह ॥'

'न तस्य प्राकृता मूर्तिः' 'न पञ्चभूतसंस्थानो देहोऽस्य परमात्मनः' इत्यादिश्रुतिस्मृतिभिर्विशिष्टदेशदेहाद्यवगतेः। एवंविधब्रह्मानुभवरूपस्य निश्श्रेयसस्य 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते'

'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रळये न व्यथन्ति च ॥'

इत्यादिश्रुतिस्मृतिभिर्नित्यत्वञ्चावगम्यते। तदेवमसङ्कुचितो ब्रह्मानुभवो मोक्षः ॥

किञ्चान्यत्—अयं ब्रह्मानुभवः परिचर्यारसावहश्च भवति; प्रत्यक्परमात्मनोः शेषशेषिभावस्य स्वरूपप्रयुक्तत्वात्। पारार्थ्यलक्षणं हि शेषत्वम्। अतः शेषभूतो मुक्तः स्वप्रयुक्तेन केनचिदतिशयेन हि शेषिणं संयोजयति; अकिञ्चित्करस्य शेषत्वानुपपत्तेः ।

अथ स्यात्—अयमात्मा संसारदशायामाध्यात्मिकादिदुःखैरतितप्तः कथमस्मादुत्तीर्णः सुखी भूयासम्' इति हि स्वदुःखनिवृत्तिं सुखप्राप्तिञ्चार्थयमानः मोक्षसाधनमन्वतिष्ठत्। सोऽयमपवर्गसमये स्वस्य दुःखमनादृत्य कथं परसन्तोषं कुरुते। एवं सति तत्क्रतुन्यायोऽपि भज्येत। किञ्च लोके सर्वैः स्वातन्त्र्यं प्रशस्यते। पारतन्त्र्यं निन्द्यते। शास्त्रेण पारतन्त्र्यं निन्दापूर्वकं निषिध्यते। 'सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्' इति। तस्मादस्य निश्श्रेयसत्वमनुपपन्नमिति ॥

नैतदेवम्; भगवत्परिचर्याया निरतिशयसुखावहत्वात्। सुखं स्वाधीनं पूर्वमाशासितम्। निवृत्तकल्मषस्यात्मनो भगवानत्यर्थप्रिय इति तत्परिचर्या निरतिशयसुखं भवति ॥ तस्मात्स्वसुखमेव पूर्वमुद्दिष्टं मोक्षदशायां सिद्धं भवति ।

यदुक्तं लोके स्वातन्त्र्यं प्रशस्यं पारतन्त्र्यं निन्दितञ्चेति; एतन्न सार्वत्रिकम्; अप्राप्तषोडशवर्षाणां पुत्राणां पितृपारतन्त्र्यस्य, स्त्रीणां भर्तृपारतन्त्र्यस्य च श्लाघ्यत्वात्। तेषामेव स्वातन्त्र्यस्य निन्दितत्वाच्च। सेवा श्ववृत्तिराख्यातेत्यनेनाप्यनर्थहेतुभूतान्यसेवैव निषिध्यते, न सेवामात्रम्। इतरथा हि अन्तेवासिनामाचार्यसेवाया अशास्त्रीयत्वप्रसङ्गात्। तस्माज्ज्ञानानन्दाद्यसङ्ख्येयकल्याणगुणगणस्य सर्वस्वामिनः परमपुरुषस्यानुभवः शेषभूतस्य मुक्तस्य परिचर्यारसमावहतीति तथाविधो भगवदनुभवः परमनिश्श्रेयसमिति सर्वं समञ्जसम् ॥

इति श्रीनारायणार्यानुगृहीतायां नीतिमालायां निश्श्रेयसनिर्णयाधिकारो दशमः ॥

नीतिमाला सम्पूर्णा ॥

# वैदिकाभरणव्याख्या ।

# मुकुरः

श्रीमहागणपतये नमः

वाक्चेतोऽतिगचरितं करुणाभरितं कटाक्षहृतदुरितम् ।
विध्वस्तमदनगर्वं व्यतीतसर्वं भजामि हृदि शर्वम् ॥

अपिच—

कर्माणि स्वहितानि कर्तुमखिलानाज्ञापयत्येष यो
यातानामपथे यथोचिततरं दण्डं विधत्ते च यः ।

यश्चात्मीयशिरस्पदेन सततं तत्वं परं श्लाघते
पर्यायप्रभुसम्मिताय वचसे कस्मैचिदस्मै नमः ॥

त्यागराजमखिराजसेवया प्राप्तधीर्गणपतिस्सुधीमणिः ।
वैदिकाभरणतत्त्वदर्शकं व्यातनोति मुकुरं मुदे सताम् ॥

इहखलु यथावदधीतवेदः परिचितपाणिनीयादिशिक्षाग्रन्थः फणिपतिफणितिपरमचतुरः पण्डितमणिः श्रीमान् गार्ग्यगोपालयज्वा यजुर्वेदीयशाखाविशेषवृत्तिकार्यविशेषविधायकत्वेन प्रवृत्तं अत एव प्रातिशाख्यनामकमपि लक्षणग्रन्थं व्याचिकीर्षुः आदौ ग्रन्थसमाप्त्यादिप्रतिबन्धकदुरितविनाशाय विरचितमविगीतशिष्टसमुदाचारानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलं वेदतदङ्गतदाचार्यनमस्कारात्मकं शिष्यशिक्षार्थमध्येतृश्रोतॄणामानुषङ्गिकमङ्गलसिद्ध्यर्थं च ग्रन्थतो निबध्नन् चिकीर्षितप्रतिज्ञापूर्वकं विवरणकारत्वात् स्वयं प्रेक्षावत्प्रवृत्तिसिद्धये प्रयोजनं विचारयितुमुपक्रमते—**अथकिमर्थमित्यादिना** । **वक्ष्यतीति** । ग्रन्थान्ते इति शेषः । **भाषायामिवेति** । व्यतिरेकदृष्टान्तोऽयम् । यथा भाषाशब्देषु सर्वे विषयः

सर्वत्र तुल्यं प्रवर्तन्ते नैवं वैदिकशब्देषु प्रवर्तन्ते इत्यर्थः । **व्यवतिष्ठन्ते** । व्यवस्थिता भवन्तीत्यर्थः । **अतद्व्यावृत्तेति** । अतेभ्यः तद्भिन्नेभ्यः व्यावृत्तं यद्रूपं तदितरावृत्तित्व-विशिष्टतद्वृत्तिधर्म इति यावत् । **तदनवगतौ** । तज्ज्ञानाभावे । **तन्निर्णयायोगात्** - तद्विषयकनिश्चयासम्भवादित्यर्थः । अयं भावः—तद्विषयकनिश्चयं प्रति तदसाधारणधर्म प्रकारकं ज्ञानं हेतुः । यथा 'अयं घटः' इति ज्ञाने घटत्वात्मकतदसाधारणधर्मज्ञानं हेतुः, एवं तत्तत्कार्यप्रवृत्तिं प्रति तत्तत्कार्यासाधारणोद्देश्यतावच्छेदकज्ञानं हेतुः इति वक्तव्यम् । तच्च वैकल्पिकशास्त्रेषु न सम्भवति । तथाहि—'स्वरितो वानुदात्ते पदादौ' इत्यादिविकल्पशास्त्रोद्देश्यभूतस्य पदाद्यनुदात्ताव्यवहितपूर्ववृत्त्युदात्तैकारौकारान्यतरादिरूपस्य स्वरिततदभावोभयादिसाधारणत्वेन अन्यतरनिर्णायकवचनाभावेन वैदिकेषु रूपद्वयस्य वक्तुमशक्यत्वेन च स्वरिततदभावान्यतरविषयकनिश्चयो न सम्भवति । किञ्च, "सर्वे-विधयश्छन्दसि' इति वचनेन विधिमात्रस्य छन्दसि वैकल्पिकत्वबोधनेन सर्वत्राप्येवमेव निर्णयासम्भवः । तस्मादेतादृशविकल्पविधीनां विषयविशेषव्यवस्थापनेन निर्णयार्थमिदमा-वश्यकमेवेति ॥

ननु वैकल्पिकार्थविधीनां निर्णयार्थं आवश्यकेऽपि अत्र शास्त्रे नित्यत्वेन मूल-शास्त्रोक्तानां 'उदस्स्थास्तम्भ्वोः पूर्वस्य' इत्यादीनां केषाञ्चिद्विधीनां 'उत्पूर्वस्सकारो व्यञ्जनपरः' इत्यादिभिः पुनरिह कथनं पिष्टपेषणवदयुक्तमेव स्यादिति शङ्कां समाधत्ते—**तन्नान्तरीयकतयात्विति** । ननु छन्दोविषयाणां विकल्पशास्त्राणां निर्णायकमिदमित्युक्तौ 'दीधीवेवीटाम्' इत्यादीनामपि निर्णेतव्यत्वापत्त्या तदनिर्णयात् न्यूनतापत्तिरित्याशङ्कां पद्यरूपेण परिहरति **नच शाखाविशेषस्थमित्यादिना** । पूर्वप्रपञ्चितेऽर्थे पर्यवसितमाह—**तस्मात्तत्तदिति** । अखिललौकिकवैदिकशब्दसाधारण्येन प्रवृत्तत्वेन सामान्यशास्त्रभूतानां शिक्षाव्याकरणानां शाखाविशेषवृत्तिकार्यविशेषप्रतिपादकत्वेन विशेषशास्त्रभूतस्य प्रातिशाख्य-स्याविरोधेनैव प्रवृत्तिरितितु फलितार्थः ॥

**संज्ञापरिभाषमिति** । समाहारद्वन्द्वः । **प्रस्तूयतइति** । प्रारभ्यतइत्यर्थः । तत्र हेतुमाह—**तस्यविषयतयेति** । तस्य संज्ञापरिभाषस्य विषयत्वेन स्वोद्देश्यज्ञानसाधनद्वारा उपजीव्यत्वेनेत्यर्थः । 'षोडशादितः स्वराः' इत्यादिभिर्विधायिष्यमाणानां कासाञ्चित्सं-

ज्ञानां वर्णसमाम्नायघटककतिपयवर्णोद्देश्यकत्वेनैव प्रवर्तिष्यमाणतया उद्देश्यज्ञानाय वर्णसमाम्नायस्यप्रथममपेक्षितत्वेन सएव प्रथममुपदेष्टव्य इति भावः । **अधिकारार्थ इति** । अधिकारार्थएवेत्यर्थः । तत्रैव हेतुं पृच्छति **कुतइति** । समाधत्ते **परिभाषणादिति** । अयं भावः—'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ' इत्यादिकोशादेव अथादिशब्दानां अधिकारार्थकत्वस्य सिद्धत्वेन पुनरत्रपरिभाषाकरणं नियमार्थं इति वक्तव्यम् । नियमश्च—अथादिशब्दानामत्र शास्त्रे अधिकारादय एव अर्थाः, नत्वानन्तर्याद्याः इति । एतादृशनियमानङ्गीकारे तु अधिकाराद्यर्थस्यापि अत्रानुक्तानामानन्तर्याद्यर्थानामिव लोकादेव उपस्थितौ सिद्धायां सूत्रमेवेदं व्यर्थतामापद्येत । अतस्तत्सार्थक्याय नियमोऽसौ अवश्याङ्गीकरणीयः । सति च नियमे अर्थान्तराणामनुपस्थित्या आनन्तर्याद्यर्थवर्णनं केषाञ्चिदसङ्गतमेवेति ॥

ननु अथशब्दस्य अधिकारएवार्थः, नान्यः इति नियमाङ्गीकारे अथशब्दस्य मङ्गलार्थकत्वे सत्यपि प्रकृते वक्तुमशक्यत्वेन शिष्टपारम्पर्येण ग्रन्थादावनुष्ठीयमानस्य मङ्गलस्याकृतत्वापत्त्या न्यूनतापत्तिः । नचानार्षग्रन्थेष्वेवमङ्गलाचरणावश्यकता । ऋषीणां पुनस्तपोमहिम्नैव विघ्ननिवारणस्य सुशकत्वेन तेषां मङ्गलाचरणमनावश्यकम् । अदृष्टचरश्च सूत्रात्मकेषु ग्रन्थेषु मङ्गलाचरणमिति भ्रमितव्यम् । ऋषीणां तपोबलेनैव विघ्ननिवृत्तिसम्भवेऽपि तद्बल रहितानां अवरेषां महर्षिभिरेव मङ्गलस्याचरणात् काकथा अस्माकमिति अवश्यानुष्टेयत्वबुद्धिसिद्धये तेषामपि तदनुष्ठानस्य आवश्यकत्वात् । दृष्टञ्चैतत् मूलशास्त्रे 'वृद्धिरादैच्' इति प्रथमसूत्रे । तत्रहि भाष्ये 'उद्देश्यवचनं पूर्वं विधेयस्य ततः परम्' इति न्यायेन सर्वत्रैव व्याकरणे पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा, इति नियममुक्त्वा 'वृद्धिरादैच्' इत्यत्र संज्ञां पूर्वं निर्दिशता पाणिनिना कुतोऽसौ नियमो नानुसृतः इत्यभिप्रायेण 'कथं "वृद्धिरादैच्" इति' इतिप्रश्नपूर्वकम् 'एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रायुङ्क्त' इत्यादिना कथञ्चिदपि मङ्गलाचरणस्यावश्यकत्वेन तदर्थमेव तादृशनियममतिलङ्घ्यापि वृद्धिपदमादौ प्रयुक्तमिति प्रतिपादितम् । तस्मात् ऋषीणामपि मङ्गलाचरणस्यावश्यकतया अत्र अथ शब्दस्य मङ्गलार्थकत्वाभावे तदनाचरणरूपन्यूनतापत्तिरिति चेत्, न; भवगवतः परमपुरुषस्य स्मारकं अवर्णं आदितः प्रयुञ्जानेन सूत्रकृता लोकोत्तरस्य मङ्गलस्य आचरि-

तत्वात् नात्र अथशब्दस्य मङ्गलार्थकत्ववर्णनावश्यकता । स्पष्टा चेयं रीतिः 'अथ शब्दानुशासनम्' इति महाभाष्यप्रथमवाक्यव्याख्यावसरे भाष्यप्रदीपोद्योते। यद्वा अधिकारार्थत्वेन प्रयुज्यमानस्याप्यथशब्दस्य श्रवणमात्रेण मङ्गलसिद्धिः, अन्यार्थत्वेन नीयमानदधिघटादिदर्शनवत् । 'ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ स्यातां माङ्गलिकावुभौ ।' इति वचनात् । स्पष्टा चेयं रीतिः—'अथातो ब्रह्मजिज्ञासा' इति वैयासिकसूत्रगताथशब्दार्थनिरूपणावसरे भाष्यटीकादौ ।

परेतु कोशादनेकार्थकानामपि अथादिशब्दानां अर्थविशेषप्रत्यायकत्वस्य प्रकरणादिनैव सिद्धत्वात् 'त्वथैवेति' परिभाषाकरणमेव तावद्व्यर्थम् । अत एव 'त्वथैव' इति परिभाषामनारभमाणैरपि महाभाष्यकारैः 'अथशब्दानुशासनम्' इत्यारम्भे 'अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते'. इति विवरणमकारि । एवञ्च अथशब्दस्यैव प्रकृते मङ्गलार्थकत्ववर्णनमपि योयुज्यतेतराम् । ध्वनितञ्चेदं 'नानन्तर्यार्थः' इति प्रकृतानुपयोगिनं आनन्तर्यार्थत्वं परं व्यवच्छिद्य मङ्गलार्थकत्वमव्यवच्छिन्ददानेन ग्रन्थकृतैव । न च 'सकृत्प्रयुक्तः शब्दः सकृदर्थं प्रत्याययति' इति न्यायसत्त्वेन सकृदुपात्तस्य अथशब्दस्य अर्थद्वयवर्णनमसङ्गतमिति वाच्यम्; सूत्रेष्वनेकार्थकत्वेन एकशब्दप्रयोगस्यालङ्कारत्वेन अदोष(त्व)ात् । तस्मान्नात्र काप्यनुपपत्तिः इत्याहुः । **व्यक्तमिति** । अत्वकत्वादिविशिष्टमित्यर्थः । **यत्र समुदितानामिति** । समाम्नायते अस्मिन्निति समाम्नाय इति बाहुलकः अधिकरणे घञ् इति भावः । समुदितानामाम्नायः अभ्यासः यस्मिन् सः इति बहुव्रीहिर्वा । समाम्नायः अस्मिन्नस्तीति अर्शआद्यजन्तो वा । पक्षत्रयेऽपि यावद्वर्णघटितसमुदायोऽर्थः । ह्रस्वभूतैकारौकाराभावे महाभाष्योक्तिं प्रमाणयति—**तदुक्तमिति** । **राणायनीया इति** । तेनान्ये नाधीयत इति भाष्याभिप्रायः । अत एव तत्रैव भाष्ये 'नैव हि लोके नान्यस्मिन् वेदे अर्ध एकारः अर्ध ओकारो वा अस्ती' इत्युक्तम् । **परिमाणभेदेति** । मात्राभेदेत्यर्थः । **पञ्चमं नासिक्यमिति** । 'हकारान्नणमपरान्नासिक्यम्' इति सूत्रेण इति भावः । **एकविंशे निराकरिष्याम इति** । निराकरणप्रकारश्चैवम्—हकारान्नणमपराइ(दि) त्यत्र गुणविधिस्तु नैव घटते, गुणगुणिवाचकपदयोस्सामानाधिकरण्यसद्भावस्थले एव तद्विधिस्वीकारात् । यथा—'पूर्वः स्वरोऽनुनासिकः', 'समानाक्षराण्यनुनासिकानि' इति च । अत्र

च 'हकारात्' इति 'नासिक्यम्' इति च स्पष्टमेव विभिन्नविभक्तिकत्वम्। किञ्च नासिक्यशब्दस्य गुणवाचित्वमेव न सम्भवति, तस्य 'तत्र भवः' इत्यर्थक 'शरीरावयवाच्च' इति विहितयत्प्रत्ययान्तत्वात्। नासिक्यस्य भावः इति विग्रहे तु 'योपधाद्गुरूपोत्तमाद्वुञ्' इति वुञ् प्रत्यये 'रामणीयकम्' इत्यादिवत् 'नासिक्यकम्' इत्यापत्तिः। कथञ्चिदणादिप्रत्ययकल्पनेन नासिक्यशब्दस्य गुणवाचित्वसमर्थनेऽपि उद्देश्यस्य षष्ठ्यन्तत्वाभावेन अन्वयानुपपत्त्या गुणविधित्वस्य वक्तुमशक्यत्वात्। किञ्च गुणविधित्वस्वीकारे 'वर्णः कारोत्तरः' इति सूत्रविहितकारशब्दोत्तरसंज्ञायाः 'न विसर्जनीयजिह्वामूलीय' इत्यादिसूत्रेण नासिक्येषु प्रतिषिद्धत्वात् 'न हकारः' इति सूत्रस्थहकारशब्देन नासिक्यत्वगुणविशिष्टस्य हवर्णस्य ग्रहणाभावेन तस्य अघोषसंज्ञाप्रतिषेधो न स्यात्। एवञ्च 'अपैवास्मै तद्ध्नुवते' इत्यादौ दोषः स्यात्। तस्मादक्षमैरपि वर्णान्तरागमविधिरेव स्वीकरणीय इति॥

परे तु 'हकारान्' 'नणमपरान्' इति पदच्छेदेन 'नासिक्यम्' इत्यस्य च द्वितीयान्तत्वेन गुणगुणिवाचकयोः सामानाधिकरण्यस्य अभ्याहतत्वात्, व्यक्त्यभिप्रायेण बहुत्वस्य 'घटान् द्रव्यमाचक्षते इत्यादाविवानुनासिक्यम्' इत्येकवचनस्य च उपपत्तेः, 'लः परस्मैपदम्' 'तङानावात्मनेपदम्' इत्यादिमूलशास्त्रीयसूत्रेष्विव भिन्नवचनकत्वेऽपि सामानाधिकरण्यसम्भवात्, प्रत्युत वर्णान्तरागमविधिमभ्युपगच्छतस्तवैव 'नासिक्यम्' इति द्वितीयान्तनिर्देशः प्रतिकूलीभवति, 'अःकार आगमविकारि' इति परिभाषाविरोधात्। पूर्वतरसूत्रे निर्दिष्टस्य 'नासिक्याः' इति प्रथमान्तपदस्य इह सूत्रे आगमविधित्वं प्रति प्रयोजनत्वेनाश्रयणन्तु 'पृष्ठताडनेन दन्तभङ्गापत्तिः' इति न्यायमेवानुसरति। किञ्च 'नासिक्याः' इति क्वचित्प्रथमान्तनिर्देशः तत्प्रकरणस्यैव वर्णान्तरागमविधायकत्वं बोधयतीति कथनं अत्यन्तमसङ्गतमेव, उत्तरसूत्रस्याप्यागमविधायकत्वापत्तेः। अपिच गुणविधित्वेन भवदभिमतोत्तरसूत्रसाहचर्यात् अस्यापि गुणविधित्वमेव न्याय्यम्। नासिक्यशब्दस्य गुणवाचित्वं न सम्भवतीत्यादिकथनन्तु न प्रकृतार्थप्रतिकूलम्, 'समानाक्षराण्यनुनासिकानि' इतिवत् सामानाधिकरण्येनैव उपपत्तेर्दर्शितत्वात्। यत्तु गुणविधित्वस्वीकारे नासिक्येषु कारशब्दोत्तरसंज्ञायाः न विसर्जनीय' इत्यादिना

प्रतिषेधात् 'न हकारः' इतिसूत्रस्थहकारशब्देन अस्यग्रहणानापत्तिरिति तत्रैव सूत्रे 'अपैवासै तद्ध्रुवते' इत्यत्र दूषणमुद्धाटितम्, तत्र पृच्छामः, नविसर्जनीयादिसूत्रस्थ-नासिक्यपदेन नासिकास्थानोत्पन्नानामखिलानामपि ग्रहणमभिमतम्? उताहो केषाञ्चिदेव? नाद्यः, नकारो णकारः इत्यादावपि कारशब्दप्रतिषेधापत्तेः। किञ्च नविसर्जनीयादिसूत्रे विसर्जनीयादीनाम् 'अकारो व्यञ्जनानाम्' इति विहिताकारोऽपि न भवतीति भवत्सिद्धा-न्तात् 'ङः', 'नः' इत्यादेरप्यनापत्तेः। अनुस्वारस्यापि नासिक्यत्वात् सिद्धे पृथग्ग्रहण-वैयर्थ्याच्च। नद्वितीयः, 'तद्ध्रुवते' इत्यत्रदूषणकथनस्य निर्मूलत्वापत्तेः। तस्मात् नविसर्जनीयादिसूत्रस्थनासिक्यपदार्थस्तावदित्थं निर्णेतव्यः—नासिक्यपदेन सामान्यवाचि-ना तद्विशेषाणां यमानामेव ग्रहणम् नान्येषाम् इत्यवश्यमङ्गीकर्तव्यम्। अन्यथा पूर्वोक्तासाङ्गत्यापत्तेः। अत्रचार्थे तत्र सूत्रे पृथगनुस्वारग्रहणं लिङ्गम्। अन्यथा नासिक्य-त्वादेव सिद्धे किं पृथग्ग्रहणेन? किञ्च मूलशास्त्रे अयोगवाहपदार्थत्वेन भाष्योक्तानां अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानां मध्ये यमव्यतिरिक्तानां अखिलानामपि स्पष्टमुपात्तत्वात् नासिक्यपदेनापि तत्रोक्तानां यमानामेव ग्रहणावश्यम्भावात् त एवनासिक्य-पदार्थः। एवञ्च सत्येव मकारः णकारः इत्याद्युपपद्यते, अनुस्वारग्रहणञ्च सार्थकं भवति। तथाच नासिक्यत्वविशिष्टस्य हकारस्य कारशब्दोत्तरसंज्ञायाः सुसंपादत्वेन 'नहकारः' इत्यत्र तस्य ग्रहणस्य पितामहेनापि दुर्निवारत्वेन 'तद्ध्रुवते' इत्यादौ दूषणोक्तिर्दूरापास्तैव। एवञ्च गुणविधित्वे न कोऽप्यनुपपत्तिलेशः। किञ्च अत्रापि वर्णान्तरत्वस्वीकारे नासिक्यानां पञ्चत्वापत्त्या 'चत्वारश्च यमास्तथा' इति पाणिनीयशिक्षाविरोधः। 'हकारान्नणमपराच्च' इत्येतावति सूत्रे कृतेऽपि पूर्वसूत्रान्नासिक्यपदमनुवर्तते, एकवचनान्तत्वेनविपरिणामेनैव इष्टसिद्ध्या पुनर्नासिक्यग्रहणं पूर्वविहितनासिक्यापेक्षया वैलक्षण्यं द्योतयितुमेव। तच्च गुणविधित्वरूपमेवेति सूत्रकृतोऽपि गुणविधिरेवाभिमतः। अन्यथा तु नासिक्यग्रहणं न कुर्यादेव। आस्तां नाम आगमविधित्वम्, तथापि हकार एव तादृश आगमः नतु वर्णान्तरमिति सर्वथापि वर्णान्तरत्वं व्याहतमेव। किञ्च नहि एवंविधवर्णान्तरविधाय-कत्वस्वीकारे किमपि फलमुपलभामहे ऋते शिक्षाविरोधात्। तस्माद्गुणविधित्वमेव न्या-य्यमित्याहुः॥

**जातीनामेवसंख्योक्तेति** । ननु अत्वादिरूपाया जातेरेकत्वात् आकारादीनामेकत्वेनैव परिगणयितव्यत्वेन षोडशत्वहान्या 'षोडशादितः स्वराः' इति संख्यानानुपपत्तिः । व्यक्तिपक्षे तु व्यक्तीनामानन्त्यात् नतरां षोडशत्वोपपत्तिः । तस्मात् कतरं पक्षमाश्रित्य षोडशत्वमत्रोच्यत इति चेत्, अत्रोच्यते—जातिपक्षमाश्रित्यैव षोडशत्वोपपत्तिः, अत्वादिरूपाया जातेरेकत्वेऽपि ह्रस्वत्वदीर्घत्वप्लुतत्वानां परस्परभिन्नत्वात् तत्समानाधिकरणतत्तज्जातेरपि भेदाभ्युपगमेन एकाप्यत्वादिः त्रिधा भिद्यते । इत्थञ्च षोडशत्वोपपत्तिः । न च एवमुदात्तत्वानुदात्तत्वादीनामपि भिन्नत्वात् तत्समानाधिकरणतत्तज्जातेरपि भेदस्याङ्गीकर्तव्यतया षोडशत्वानुपपत्तितादवस्थ्यमिति वाच्यम्, षोडशत्वेन परिगणयितुः सूत्रकारस्य उदात्तत्वादिसमानाधिकरणजातिभेदस्यानभिमतत्वात् । न च उदात्तत्वादिसमानाधिकरणजातेरेव भेदः सूत्रकृत्संमतइत्यस्तु, तावतापि षोडशत्वोपपत्तेरिति वाच्यम् । उदात्तत्वादीनां गुणत्वेन गुणानाञ्च स्वसमानाधिकरणजातिभेदकत्वस्य गवांदावदृष्टत्वेन 'अभेदका गुणा इत्येव न्याय्यम्' इति मूलशास्त्रे सिद्धान्तितत्वेन च तत्समानाधिकरणजातिभेदस्य वक्तुमशक्यत्वात् । तस्मान्नानुपपत्तिरिति बोध्यम् ॥

**अथ नवादितः समानाक्षराणि** । **षष्ठ्यन्ततया विपरिणम्यत इति** । आदितः इत्यनेन कस्यादौ इति षष्ठ्यन्तस्यैवाकांक्षितत्वादिति भावः । **महासंज्ञाकिमर्थमिति** । 'संज्ञा च नाम यतो न लघीयः' इति महाभाष्येण सर्वेभ्योऽपि लघुभूतस्यैव शब्दस्य संज्ञात्वौचित्यात् किमर्थंगु रुसंज्ञाकरणमिति भावः ॥

**द्वेद्वेसवर्णे ह्रस्वदीर्घे** । **त्रीन् गणान् समाश्रित्येति** । अत्रवीप्सावचनं महासंज्ञाकरणञ्च लिङ्गम् । सजातीयो वर्णः सवर्णः इति व्युत्पत्त्या सवर्णपदस्य सजातीयवर्णवाचितयाभिन्नजातीयह्रस्वदीर्घयोरसवर्णत्वात् । अथ वा सवर्णपदमावर्त्य एकेन ह्रस्वदीर्घयोर्विशेषणेन सजातीयह्रस्वदीर्घेत्याद्यर्थलाभेन नानुपपत्तिः । यथावा मूलशास्त्रे 'सर्वादीनि सर्वनामानि' इति सूत्रेऽपि संज्ञाभूतसर्वादिशब्दानां संज्ञावारणाय 'सर्वनामानि' इत्यस्य आवृत्त्या एकस्य सर्वादिविशेषणत्वं अपरस्य संज्ञाबोधकत्वं **कैयटशेखरादौ** 'संज्ञोपसर्जनीभूताः' इति वार्तिके उक्तम्, तथा अत्राप्याश्रयणे विरोधाभावात् । **सप्तम्यन्तस्येदंरूपमिति** । अत्रापि व्याख्याने यथा 'ब्राह्मणाभ्यां कृतं देहि' इत्यत्र

वाक्ये सकृदुपात्तस्यापि ब्राह्मणाभ्यामित्यस्य कृतशब्दप्रयोगे तृतीयान्तता, देहिशब्द-प्रयोगे चतुर्थ्यन्तता च, एवं सवर्णे इत्यस्य ह्रस्वदीर्घविशेषणत्वे सप्तम्यन्तत्वम्, विधेय-बोधकत्वे तु प्रथमान्तत्वम् ; इति सङ्गतमेवोभयार्थकत्वं सवर्णपदस्य । स्पष्टा चेयं रीतिः 'सरूपाणामेकशेषः' इति सूत्रे **शब्देन्दुशेखरे** तद्व्याख्यादिषु ॥ ननु यथा संज्ञाकरणा-भावेऽपि 'अन्तस्थापरश्च सवर्णमनुनासिकम्' इत्यादौ प्रयुक्तस्य सवर्णपदस्य सारूप्यार्थकत्वमाश्रित्य उपपत्तिः दृश्यते, एवमेवात्रापि सिद्ध्या संज्ञाप्रणयनस्यैव तावत् वैयर्थ्यमापद्यते इति शङ्कते—**यद्येवमित्यादिना । ह्रस्वदीर्घयोरसरूपत्वादिति ।** एवञ्च 'सवर्णमनुनासिकम्' इत्यादाविव सारूप्यार्थकत्वेनैव सिद्ध्या सूत्रस्य वैयर्थ्यमिति शङ्कैव नोपपद्यते इत्यर्थः, ह्रस्वदीर्घयोः सावर्ण्यानापत्तेः । उक्तमर्थमुपसंहरति—**तस्माद्यथोक्त इत्यादिना ।** परेतु सूत्रमिदं स्पष्टार्थमेव । समानो वर्णः सवर्णः इति विग्रहे समानशब्दस्य 'ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु' इति सूत्रेण सभावे सवर्णशब्दस्य निष्पत्त्या तस्य सदृशवर्णार्थकत्वेन, सादृश्यस्य च एक-जातीयत्वप्रयुक्तस्य ग्रहणेन सर्वत्र इष्टसिद्धिः । प्रसिद्धञ्च लोके सवर्णविवर्णपदयोः सजातीयविजातीयबोधकत्वम् 'अणुदित्' सूत्रस्थ**शब्देन्दुशेखरग्रन्थे** प्रतिपादितम् । स्पष्टीकृतञ्चैतत् '"वर्णाश्रमाचारवान्" इत्यादौ सवर्णशब्दवाच्यत्वं जातेरिवात्रापि' इत्यादिना **सदाशिवभट्टीये** । सूत्रारम्भेऽपि 'नान्तस्थापरमसवर्णम्' इत्यत्र अन्तस्थात्व-रूपसमानधर्मवतो वर्णस्यैव सवर्णपदेन ग्रहणमवश्यमङ्गीकरणीयम् । एवमन्यत्रावश्या-श्रयणीयस्य सजातीयवर्णार्थकत्वस्य ग्रहणेनैवात्रापि इष्टसिद्ध्या सूत्रस्य स्पष्टार्थत्वमेव । न च सूत्राभावे 'नान्तस्थापरमसवर्णम्' इत्यत्र अन्तस्थात्वेन साजात्यम्, समानाक्षर-विषये तु अत्वादिना साजात्यमित्यत्र किं विनिगमकम् इति वाच्यम् । व्याख्यानेनैव निर्णयसंभवात् । तत्रापि 'अन्तस्थापरश्च सवर्णमनुनासिकम्' इत्यत्र 'संय्यँन्ताः' 'सवँव्त्सरः' इत्यादौ यकारवकारादिसिद्धये यत्वादिना साजात्यम्, 'नान्तस्था-परमसवर्णम्' इत्यत्र 'सूनर्यसि' 'अथर्वणः' इत्यादौ पूर्वाङ्गत्वसिद्धये अन्तस्थात्वेन साजात्यमित्यत्र व्याख्यानस्यैवशरणीकरणीयत्वात् । 'नाकारपरौ' इति सूत्रे 'अकारपरौ' इत्येव पदच्छेदः, नतु 'आकारपरौ' इत्यत्र व्याख्यानमेव निर्णायकमिति भवतैव वक्ष्य-

माणत्वाच्च । किञ्च 'दीर्घं समानाक्षरे' इति सूत्रे 'समानाक्षरे इति किम्' इत्याशङ्क्य 'एत एतान् ग्रहानपश्यन्' 'भूत्याऐन्ध' इति भवतैव प्रत्युदाहारि । तत्र यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिः तन्निमित्तातिरिक्तसर्वनिमित्तकत्वस्य प्रत्युदाहरणेषु अवश्यंभावेन प्रकृते 'दीर्घं समानाक्षरे' इति शास्त्राप्रवृत्तेः समानाक्षरत्वरूपनिमित्तवैकल्यप्रयुक्तत्वेन तदतिरिक्तसवर्णत्वरूपनिमित्तस्य 'एतएतान्' इति प्रत्युदाहरणेषु सद्भावावश्यकतया एकारादीनामपि परस्परं सावर्ण्यमभ्युपेयमेव । तच्च सावर्ण्यं न संज्ञारूपम्, विध्यभावात् । किन्तु सजातीयवर्णत्वरूपमेवेति त्वयापि मदुक्तार्थकत्वमङ्गीकृतमेव । एवञ्च अनेनैव समानाक्षरेष्वपि सिद्धया सवर्णसंज्ञाकरणं निरर्थकमेव । न च केवलयौगिकत्वस्वीकारे प्लुतपूर्वेऽपि सावर्ण्यापत्त्या दीर्घापत्तिरिति वाच्यम्; 'न प्लुतपूर्वम्' इति निषेधसूत्रस्य 'दीर्घं समानाक्षरे' इति सूत्रात्परत्र करणेन तेनैव दीर्घस्य प्रतिषेधेन अदोषात् । तस्मात्संज्ञाकरणं स्पष्टार्थमेवेति दिक् इत्याहुः ॥

**इदमेवेति** । इदमपीत्यर्थः । तेन फलान्तरमपि पूर्वसूत्रोक्तं ग्रहीतव्यम् । **तत्कार्यमेव प्रतिषिध्यत इति** । संज्ञाकरणस्य कार्यार्थत्वेन तत्प्रतिषेधस्य कार्यप्रतिषेध एव पर्यवसानादिति भावः । **नियतलिङ्गसङ्ख्यावन्त इति** । तथा च अमरः 'विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः' इति । **अन्तर्जन्यत्वादिति** । परेतु अन्तः स्पर्शोष्मणोर्मध्ये तिष्ठन्तीत्यपि निर्ब्रुवते । **शक्त्यवच्छेदेनेति** । समूहसामान्यविषयिकाया वर्गपदनिष्ठशक्तेः वर्णविशेषभूतस्पर्शावान्तरगणमात्रविषयकत्वेन सङ्कोचेनेत्यर्थः । **स्पर्शमात्रसमूहस्य** । यावत्स्पर्शात्मकसमूहस्य ॥

**येत्विति** । एतत्तत्त्वं प्रागेवावोचाम । **णकारो वेतिप्रयुञ्जानैरिति** । 'वृद्धिरादैच्' इति सूत्रे इति शेषः । **वैयाकरणैः** । भाष्यकारैरित्यर्थः । **उपध्मानेन जन्यत्वादिति** । उश्च पश्च उपौ उकारपकारौ इत्यर्थः । तौ ध्मायते उच्चार्येते अनेनेति उपध्मानं ओष्ठस्थानं तेन जन्यत्वादित्यर्थः । रूढत्वाच्च न वर्णान्तरेष्वतिप्रसक्तिः । **नासिकायां भवाइति** । 'स्पर्शादनुत्तमात्' इति सूत्रविहिता यमाः इत्यर्थः । **प्रात्यभावादिति** । नच 'वर्णः कारोत्तरः' इत्यस्य वर्णबोधकः 'अ' इत्यादिः कारशब्दोत्तरः सन् वर्णस्य

आख्या भवति इत्यर्थेन विसर्जनीयादिपदानामपि वर्णबोधकत्वात् कथं प्राप्त्यभावः इति वाच्यम्; वर्णशब्दवाच्यः 'अ' इत्यादिः कारशब्दोत्तरः सन् तस्य आख्या भवति इत्यर्थेन विसर्जनीयादिपदानां वर्णशब्दवाच्यत्वाभावादप्राप्तेः । **वर्णसमुदायादपीति** । 'चकारः' 'एवकारः' इत्यादाविवेति भावः । **इकारान्नणमपरान्नासिक्यमितीति** । वस्तुतस्तु चिन्त्यमिदम्, 'नासिक्यम्' इत्यस्य द्वितीयान्तत्वेन प्रथमान्तत्वाभावात् ॥

**आसन्न सन्देहे । न व्यवहितैरिति** । 'पूर्वश्च' इत्यादौ नियमेन जायमानायाः कस्मादित्यवध्याकांक्षायाः अव्यवहितपूर्ववृत्तिपदोपस्थित्यैव शान्तत्वेन व्यवहितपदान्तरस्य उपस्थितिर्नास्ति इत्यर्थः । एवं उत्तरसूत्रविषयेऽपि । 'लपरौ' इत्यादौ नियताया विशेष्यद्वयविषयकांक्षाया अपि अव्यवहितसमीपस्थपदद्वयविषयकज्ञानेनैव उपक्षीणत्वेन पदान्तरोपस्थितिर्नास्तीति भावः । इत्थञ्च सन्निहितपदपरित्यागपूर्वकासन्निहित पदग्रहणे प्रमाणाभावमूलकप्रत्यासत्तिन्यायसिद्धार्थानुवादकं इदं सूत्रद्वयमिति तात्पर्यम् । वस्तुतस्तु अस्य सूत्रस्य फलान्तरं 'पूर्वजेप्रभृति' इति सूत्रे वदिष्यामः । **कस्यवर्ग इति** । तद्घटितो वर्ग इत्यर्थः । **नतु स्वरूपोपलक्षणत्वमाश्रित्येति** । अयं भावः—लोके हि पूर्वत्वपरत्वादीनां प्रायोणोपलक्षणत्वेनैव प्रतीत्यनुभवः । यथा 'एतत्पूर्वो ब्राह्मणो भोज्यताम्' इत्यादौ तत्पूर्वदेशस्थ एव भोजयितव्य इति न नियम्यते, किन्तु तमाहूय स्थलान्तरेऽपि तस्य भोजनं क्रियते, एवमिहाप्याश्रयणे 'द्यावापृथिवी' 'पूर्वश्च' इत्यनेन द्यावापृथिवीशब्दपूर्वदेशस्थस्यैव तत् कार्यमिति न स्यात् । तथाच सति तत्पूर्वत्वोपलक्षितस्य यावती शब्दस्य 'यावती पूर्णमासी' इत्यत्रापि प्रग्रहत्वं स्यात्, तन्मा भूत् इति इदमारभ्यते । एवमुत्तरसूत्रेऽपि बोध्यम् । ननु अस्तु पूर्वत्वादीनामुपलक्षणत्वेनैव लोके प्रतीत्यनुभवः । तथापि इह शास्त्रे तदाश्रयणमशक्यमिति ब्रूमहे । तथाहि—यद्यत्र पूर्वत्वादीनामुपलक्षणत्वमुररीकरिष्यत. तर्हि सर्वेषामपि यावतीशब्दादीनां प्रग्रहत्वादिप्राप्त्या सामान्येन 'यावती च' इत्यादिरूपेण सूत्राणां कर्तव्यत्वापत्त्या 'द्यावापृथिवी' 'पूवश्च' इत्यादिसूत्रकरणमेव नैरर्थक्यमवाप्स्यत् । अत एव एतादृशपरिभाषारम्भाभावेऽपि 'इको यणचि' इत्यादौ मूलशास्त्रे पूर्वत्वपरत्वादीनां विशेषणविधयैव निवेशो दृश्यते । उपलक्षणतया तु न कुत्रचिदपि दृश्यते । किञ्च सत्यपि परिभाषारम्भे परिभाषाघटकपूर्वा-

त्तरपदार्थविषये विशेषणत्वं वा उपलक्षणत्वं वा इति संशये परिभाषारम्भसामर्थ्येन विशेषणत्वमेव, नतु उपलक्षणत्वमिति तत्रापि सूत्रारम्भसामर्थ्यमेव शरणीकरणीयम् । तस्मात्तत्रतत्र तत्तद्वचनसामर्थ्यादेव उपलक्षणत्वस्य अप्रसक्तौ किमर्थमिदं सूत्रद्वयमितिचेत् - साधुपृष्टमायुष्मता शास्त्रार्थयाथातथ्यवेदिना तथापि वचनसामर्थ्याश्रयणे प्रतिपत्तिगौरवापत्त्या मध्यमाधिकारिणां तादृशधीकौशल्याभावेन तेषां स्पष्टप्रतिपत्तये सूत्रद्वयमित्यभिप्रायान्नात्र वैयर्थ्यशङ्का ॥

**तेनच समानकालइति** । अत्र तेन इत्यस्य अकारोच्चारणाधिकरणकालेनेत्यर्थः । अकारेणेतिविवरणस्यापि अयमेवार्थः । सादृश्यञ्च अत्र अन्यूनानतिरिक्तपरिमाणवत्त्वेन बोध्यम् । तेन दीर्घादौ नातिप्रसक्तिः, अतिरिक्तकालत्वात् ।

**द्विस्तावानिति** । द्विगुणिततावत्कालवानित्यर्थः । द्विमात्राकालविशिष्ट इतिफलितम् । एवमुत्तरसूत्रे त्रिगुणिततावत्कालविशिष्ट इत्यर्थो बोध्यः ॥

**मण्डूकप्लुतिन्यायेनेति** । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकारा इति भावः ॥

**समाहारइति** । समाह्रियते अस्मिन् उदात्तानुदात्तत्वे इति समाहारः । बाहुलकोऽधिकरणे घञ्प्रत्ययः । अथवा समाहारः अस्मिन्नस्तीतिसमाहारः इति अर्शआद्यजन्तत्वेन व्युत्पादनीयम् ॥

**नानापदवदिङ्ग्यमसंख्याने । 'अप्यकारादि' इति वचनसामर्थ्यादिति ।** तद्धि 'देवाशीका' इत्यादिना श्वाशब्दस्य विधीयमानो ह्रस्वः 'अश्वावन्तम्' इत्यत्रापि प्रवर्ततामित्येतदर्थं आरभ्यते । यदितु व्याकरणसिद्धस्यापि पदत्वेन ग्रहणं स्यात् तदा 'अश्वावन्तम्' इत्यत्र अइति नञः श्वा इत्यस्य च पृथक्पदत्वादेव सिद्धे ह्रस्वे तत् व्यर्थंस्यादिति नात्र व्याकरणसिद्धस्य पदत्वेन ग्रहणमितिभावः । वस्तुतस्तु चिन्त्यमिदम् । 'अश्वावन्तम्' इत्यत्र अश्वशब्दात् मतुप्प्रत्यये सति 'मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' इतिसूत्रेण दीर्घे सति निष्पत्त्या व्याकरणरीत्यापि अइत्यस्य चपृथक्पदत्वाभावेन तदर्थं 'अप्यकारादि' इति वचनस्यावश्यकत्वेन तस्य ज्ञापकत्वासम्भवात् । तस्मात् 'अप्यकारादीत्यादि वचनसामर्थ्यात्' इत्यत्रादिपदोपादानेन 'अन् कारादिच' इति सूत्रग्रहणेन तस्य ज्ञापकत्वं कथञ्चिदुपपाद्यमित्यभिप्रायो वर्णनीयः । अतएव आदिग्रहणं सार्थकम् ।

# University Notes

## AGRICULTURAL COLONISATION SCHEME

Two years ago, to consider the question of colonising by unemployed graduates a part of the land owned by the University, the Syndicate appointed a committee consisting of Nawabzada Sadaatullakhan, Deputy Director of Agriculture, Madras ; Rao Bahadur M. R. Ramaswami Sivan, Retired Principal, Agricultural College, Coimbatore ; Dr. B. V. Narayanaswami Naidu, Professor of Economics, Annamalai University ; Mr. N. Viswanatha Ayyar, Registrar, Annamalai University ; and Mr. Sundaram, the then Assistant Director of Agriculture, Cuddalore. On the report of this Committee the Syndicate decided to introduce an agricultural colonisation scheme which was inaugurated on the 2nd May, 1938 by the Rt. Hon'ble V. S. Srinivasa Sastriar, Vice-Chancellor. In pursuance of this scheme ten acres each were allotted to the graduates who presented themselves on the opening day.

## RESEARCH DEGREES

The following students were awarded M.Sc. Degree at the Convocation held in December, 1937 :—

| | |
|---|---|
| Mr. S. Sriraman .. | Magnetic Susceptibilities of solutions of certain salt in water. |
| Mr. V. Pasupati .. | Studies in Naphthalene series: Synthesis of polyhydroxy-derivative of Naphthalene. |
| Mr. P. Lakshminarasimha Rao . | Synthetical experiments on the group of Alkaloids. |

The following research degrees were awarded during the year :—

M. Litt.

C. Jagannathachari, M.A. .. Thesis : Foreign Trade of India.

M.Sc.

P. R. Venkataraman, B.Sc. ..

## PROHIBITION IN SALEM DISTRICT

Mr. C. Jagannathachari, M.A., M.Litt., Research Student in Economics has been deputed by the Syndicate to study the working of Prohibition in the Salem District. He is working under the direction of Dr. B. V. Narayanaswami Naidu, Professor of Economics. The report will be published in due course.

* * * * *

Mr. S. K. Ekambaram, B.A., B.Sc. (Hons.), who took his Honours Degree in Mathematics from this University has been awarded a Government of India Scholarship for further studies in Cambridge.

* * * * *

Mr. A. V. Venkateswaran, B.A. (Hons.), who took his Honours Degree in English Language and Literature from this University has come out successful in the recent Audit and Accounts Service Competitive Examination.

* * * * *

## UNIVERSITY PUBLICATIONS

The following books are in the press and will be published shortly:—

1. Jagannatha Pandita by V. A. Ramaswami Sastriar, M.A.
2. Trimsacchloki, Edited by K. Rama Pisharoti, M.A.
3. A Text Book of Chemistry in Tamil by N. Anantavaidyanathan, M.A.
4. History of Gingee and Its Rulers by C. S. Srinivasachariar, M.A.
5. "Experimental Chemistry for Intermediate Students" by M. L. Sitaraman, M.Sc.
6. Distributive Co-operation by V. G. Ramakrishna Ayyar, M.A.

## Reviews

The brochure entitled "the Meḷarāgha mālika of Mahavaidyanatha Sivan," edited by Pandit S. Subramanya Sastri, F.T.S., is sure to be welcomed by all the true lovers of Karnataka music. It serves to introduce to the wider India and even to the west one of the most intriguing intricacies of the highly advanced science and art of the South Indian Music . The general outlines are written in English, the present day lingua franca of the civilised world, while the notations are given in Nagari Characters. The latter aspect has its own advantages in that it is likely to reach a far wider Indian audience than the use of English notations would enable it to do.

Mahavaidyanatha Aiyar was the McCormack of South India. And he was also a perfect Beethoven without any of Beethoven's native defects. And the brief life-sketch of this human land-lark would help the readers to understand the real soul of Mahavaidyanatha Aiyar that thrilled his listeners to ecstacy and that still stir his countrymen to reverent admiration.

The introduction furnishes the requisite keys to unravel the wondrous intricacies of the Rāgha Mālīka, this marvel of music. It lucidly explains the principles and methods that form the basis and supply the keys for this rare and elaborate but superb castle in the wonderland of music. It gives all the naively ingenious and yet natural manipulations of the seven notes or swaras that lead to this miracle of melody, and the scientific Katapayâdhi formulae, and the artistic permutations in well-arranged tables and chakras which luminously explain and tersely elucidate the formation, structure and sweet sound-functions of the Melakarta Ragas with their exquisite blend and harmony.

Of course the controversy as regards the reckoning of 16 instead of 12 notes or fret places, and the practicability of singing only 32 and not the 72 raghas is not referred to, as perhaps it has no place in this monograph which aims only to give to the readers in a nutshell a brief but clear outline of the Rāghamālika of Mahavaidyanatha Aiyar. Many modern musicians however declare that the system of evolving 72 Karta Ragas is a purely artificial mathematical device utterly unrelated to the practical art of music, and unadapted to the framework of the gamut or the normal places of the really recognisable natural notes or swaras. Whether the Mēlakarta-rāgha-mālika in 'its plenary phase is capable of being sung by any musician is a question which we laymen

must leave to the musical experts to decide. The present brochure serves its purpose splendidly. It completely elucidates how the Rāgha-mālika is conceived and developed with the normal swaras and anuswaras adapted and manipulated on clear scientific lines. I commend it cordially to all lovers of music in the hope that it will receive their sympathy and support.

BHARATI.

## ACKNOWLEDGMENTS

*Brown University, Rhode Islands :*

*Selected topics in function theory of a complex variable by Otto Syasz.*

*Theory of Abstract spaces by David Tamarkin*

*The Service*

*Lingnan Science Journal*

*The Modern Student*

*The Empire Times*

*Madras Y.M.C.A. Bulletin*

*Subodin*

*Government College Miscellany*

*Karnataka College Miscellany*

*Indian Swarajya*

*The Journal of Greater India Society*

*A Journal of Indian Renaissance*

*The Lingaraj Miscellany*

*The Madras Law College Magazine.*

*Rektorwechsel ander Universitet Leipzig*

*Travaux De L'Institut Mathematique De Tbilissi I*

*Academy Des Sciences De L'U. R. S. S.—Filial Georgienne*

*On the Devonian Coelacanthids of Germany with special reference to the Dermal Skeletar (Stockholm).*

*Ethnology, Folklore and Archaelogy in the U.S.S.R.*

*E. A. Weiss : Sinfuhrung In Die Linien Geometrie Und Kinematik*

| | | |
|---|---|---|
| *Proceedings of the Durham Philosophy Society Volume* | *3* | *Parts 4–5* |
| | *4* | *3–5* |
| | *5* | *1–5* |
| | *6* | *1–5* |
| | *7* | *2–4* |
| | *8* | *1-5* |
| | *9* | *1–2* |

*Osaka Imperial University : Collected papers from the Faculty of Science*

| | | |
|---|---|---|
| *Series A* | *Mathematics* | *Vol. IV.* |
| *B* | *Physics* | ” ” ” |
| *C* | *Chemistry* | ” ” ” |

*Man in India, Volume XVIII, No. 1 (January-March)*

*Spolia Zeylanica.*

*Bulletin of the Calcutta Mathematical Society.*

*Scripta Mathematica.*

ACKNOWLEDGMENTS (Continued)

*Philosophy—the Journal of the British Institute of Philosophy.*
*Hamburgische Universitat-Keden.*
*Report of the South Indian National Association and Ranade Library.*
*Financia Expertus, Udipi.*
*The Orient Gong.*
*Kungl Sveuska Veteuskaspsakademiens Handlingar Tredje Serien Band 14 Nos. 1 to 3.*

1. *Das Wachstum Der Korper Lange Des Menschen.*
2. *Studies in the Gems Astelia Banks Et Solander.*
3. *Examen Rosarum Sneciae Granskringavden Sveuska Florans Rosa-Former.*

*Etudes Sur Un Probleme De Majoration.*
*Government Victoria College Magazine, Palghat.*
*The Journal of the Madras Geographical Association.*
*Wealth and Welfare.*
*Hermathena: Literature, Science and Philosophy.*
*The Indian Historical Quarterly.*
*Annales de Université de Paris, Vol. XIII, No. 2.*
*New Indian Antiquary, Vol. I, Nos. 1 and 2.*
*Wealth and Welfare.*

## EXCHANGE LIST

*The Servant of India Society.*
*Hindustan Review.*
*Half Yearly Journal of the Mysore University.*
*Economica, London.*
*Philosophical Quarterly.*
*Journal of the Indian Chemical Society.*
*Reading University Gazette.*
*Mysore Economic Journal.*
*Chemical Abstracts, Easton P.A.*
*The Punjab University Gazette.*
*Journal of the Bombay University.*
*Quarterly Journal of the Mythic Society.*
*Publications by the Oriental Library, Baroda.*
*Publications by Kungl. Universitetes Bibliotek, Uppsala, Sweden.*
*Publications by Tohoku Imperial University, Sendai, Japan.*
*Journal of the Madras University.*
*Bulletin de L'Ecole Francaise d'Extreme-Orient—Ecole Francaise d'Extreme-Orient, Hanoi (Indo-China).*
*Djwa—Java-Institute, Kweekschoollaan, Jogajkarta, Java*
*Varendra Research Society, Rajshahi, Bengal—Annual Report and Monographs*
*Quarterly Journal of the Kannada Literary Academy.*
*Journal of the Andhra Historical Research Society.*
*Indian Culture.*
*Scripta Mathematica.*
*Indian Historical Quarterly, Calcutta.*
*Publications of the Bombay Royal Asiatic Society.*
*The Indian Library Journal.*
*Review of Philosophy and Religion.*
*U.S.S.R. Society for Cultural relations with foreign countries, Russia.*
**'Drama'** *published by the British Drama League, London.*
*Proceedings of the Durham Philosophical Society, Newcastle.*
*Collected papers from the Faculty of Science, Osaka.*
*Bulletin of the Calcutta Mathematical Society.*
*Science and Culture, Calcutta.*
*Indian Co-operative Review, Madras.*
*Epigraphica Indica.*
*Spolia Zeylanica.*
*Publications of the R. Swedish Academy of Sciences, Stockholm.*
*Bijendragen Tet De Taal, Land-En Volken Kunde Van Nederland Sch-Indie-s-Gravenhage.*

EXCHANGE LIST (*Contd.*)

*Monthly Weather Report, Poona.*
*Scientific Reports of the Imperial Institute of Agricultural Research.*
*The Aryan Path.*
*The Mimansa Prakash.*
*Indiana.*
*Vishwa Vani—A journal of Indian Renaissance.*
*Journal of the Madras Geographical Association.*
*Man in India*
*The Poona Orientalist*
*Publications by the Industrial Intelligence and Research Bureau, Simla*
*The Mathematical Teacher, New York*
*Duke Mathematical Journal*
*Publications of the Brown University, U.S.A.*
*Transactions of Tbilissian Mathematical Institute, Russia*
*Lingnan Science Journal*
*London University Gazette*
*The Adyar Library Bulletin.*
*The Indian Historical Quarterly.*

# UNIVERSITY PUBLICATIONS

| Names of Publications | Price | Where available. |
|---|---|---|
| 1. Factory Labour in India By Prof. A. Mukhtar .. | 3 0 0 | University Office, Annamalainagar. |
| 2. Bhoja Raja By Prof. P. T. Srinivasa Ayyangar .. | 1 8 0 | do. |
| 3. Swaramelakalanidhi By Mr. M. S. Ramaswami Ayyar .. | 2 0 0 | do. |
| 4. Naveena Tarkam By Mr. K. R. Applachariar .. | 2 0 0 | do. |
| 5. Text and commentary of *Tattvavibhavana* by Parameswara, a commentary on Vacaspati Misra's Tattvabindu. By Mr. V. A. Ramaswami Sastriar .. | 3 0 0 | do |
| 6. Sri Mukundamala By Prof. K. Rama Pisharoti .. | 3 0 0 | do |
| 7. Svarasiddhanta Candrika By Srinivasayajvan. Edited by Mr. K. A. Sivaramakrishna Sastri .. | 5 0 0 | do. |
| 8. Acoustics By Mr. R. K. Viswanathan .. | 1 8 0 | do. |
| 9. Pari Pattu. By Vidvan R. Raghava Ayyangar .. | 2 0 0 | |
| 10. Trimsacchloki. | | |
| 11. The Story of Distributive Co-operation. | | |
| 12. The University Journal Published by the University—Annual Subscription .. | 7 0 0 (Internal) 10s. (Foreign) | The Editor, The University Journal, Annamalainagar. |

A Text-book in Tamil on Chemistry. —(*In the Press*)

Nyāyakuliśa — Do.

Siddhitraya — Do.

PUBLICATIONS

OF

# The Inter-University Board, India.

| | | | | | |
|---|---|---|---|---|---|
| 1. | Handbook of Indian Universities .. | 2 | 0 | 0 | *or* 3s. |
| 2. | Facilities for Oriental Studies and Research at Indian Universities .. | 0 | 8 | 0 | |
| 3. | Facilities for Scientific Research at Indian Universities .. | 0 | 12 | 0 | |
| 4. | Bulletin of the Inter-University Board, India, No. 1 to 13 .. | 1 | 0 | 0 | *each* |
| 5. | Biological Outlook on life and its Problems.—By J. Arthur Thomson, M.A., LL.D., Regius Professor of Natural History, University of Aberdeen .. | 0 | 2 | 0 | |
| 6. | Third Conference of Indian Universities .. | 1 | 0 | 0 | |
| 7. | Training of Teachers in Indian Universities .. | 0 | 8 | 0 | |
| 8. | Annual Report of the Inter-University Board for 1935-36 .. | 1 | 0 | 0 | |
| 9. | Bibliography of Doctorate Theses in Science and Arts accepted by Indian Universities from January, 1930 .. | 0 | 8 | 0 | |

POSTAGE AND V. P. CHARGES EXTRA.

*Available from*

THE BANGALORE PRESS,
"LAKE VIEW"
*Mysore Road, Bangalore City.*

# MYSORE ECONOMIC JOURNAL.

The only Journal of its kind published regularly on the 7th of each month for over twenty years. Has a number of contributors and reviewers attached to it. Bright and topical in its contents, it has ever stood out for progressive and suggestive comments on public affairs and well being. Sir Roper Lethbridge called it the "Most admirable Journal". Annual subscription Rs. 6.

From the Book Department, books on economic matters can be always ordered. The following books are available for sale from stock:

PLANNED ECONOMY FOR INDIA by Sir M. Visvesvaraya, K.C.I., LL.D. Price Rs. 6.

MADURA SOURASHTRA COMMUNITY by K. R. R. Sastry, M.A., M.L., F.R. ECON. S. Price Re. 1.

INDIAN CASTE SYSTEM by C. Hayavadana Rao, B.A., B.L., F. R. ECON. S. Price Re. 1.

STUDIES IN RURAL ECONOMICS by S. Kesava Iyengar, M.A. Price Rs. 8.

TOWARDS NATIONAL SELF SUFFICIENCY by Dr. P. J. Thomas, M.A., B.LITT., PH.D. Price As. 4.

MYSORE GAZETTEER (3 VOLS.). Edited by C. Hayavadana Rao, B.A., B.L. Price per set Rs. 20. Can also be had in parts at prices varying from Rs. 2 to Rs. 8 per volume.

*Postage extra in all cases*

*Apply to:—*

MANAGER, "Mysore Economic Journal",
No. 19, Gundopunt Buildings, Siddicutta,
BANGALORE CITY.

# RATES OF ADVERTISEMENT

| Particulars. | Per issue. | | | Per two issues. | | |
|---|---|---|---|---|---|---|
| | Rs. | A. | P. | Rs. | A. | P. |
| Back Cover | 15 | 0 | 0 | 28 | 0 | 0 |
| Inside Back Cover | 10 | 0 | 0 | 18 | 0 | 0 |
| Inside Page | 8 | 0 | 0 | 15 | 0 | 0 |
| Inside Half Page | 4 | 0 | 0 | 8 | 0 | 0 |